ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ/1219/450/છ, તા.03/07/2019-થી મંજૂર

# आयुर्वेदः २

## मध्यमा १

## ( ધોરણ 11 )

### प्रतिज्ञापत्रम्

भारतं मम देशः।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति।
मम मानसे देशस्पृहा अस्ति। समृद्धिसहितं
विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति
आदरभावं धारयिष्यामि।
प्रत्येकेन सह शिष्टव्यवहारं करिष्यामि।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि।
तेषां कल्याणे समृद्धौ च एव मम सुखम् अस्ति।

**मूल्यम् : ₹ 27.00**

नमसो मा ज्योतिर्गमय

**गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्**
**'विद्यायनम्', सेक्टर 10-ए, गांधीनगरम् - 382010**

© गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, गान्धीनगरम्
अस्य पाठ्यपुस्तकस्य सर्वेऽधिकाराः गुजरातराज्यपाठ्यपुस्तकमण्डलहस्तकाः सन्ति। अस्य पाठ्यपुस्तकस्य कश्चिदपि भागः केनापि रुपेण गुजरातराज्य-पाठ्यपुस्तकमण्डलनियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्यते।

**विषयसलाहकार**
श्री बालमुकुन्द दवे
**लेखनसंपादनम्**
डॉ. ओमकार बरगे **( कन्विनर )**
डॉ. विष्णुप्रसाद रावलः
श्री विनोदकुमार चौधरी
श्री विशालकुमार महेता
श्री अभिषेक उपाध्याय
**समीक्षणम्**
वैद्या दिपाली शुक्ल
वैद्य किशोर सताणी
डॉ. स्वाति शाह
श्री हित शुक्ल
**भाषाशुद्धिः**
श्री ललित पटेलः
**संयोजनम्**
डॉ. क्रिष्ना दवे
(विषय-संयोजकः -अंग्रेजी)
**निर्माणायोजनम्**
श्री हरेन शाह
(उपनियामकः - शैक्षणिकः)
**मुद्रणसंयोजनम्**
श्री हरेश एस. लीम्बाचीया
(उपनियामकः- उत्पादनम् )

## प्रस्तावना

प्राच्यगुरुकुलपरम्परानुसारम् अध्ययनं कुर्वतां-छात्राणां कृते प्राचीनार्वाचीनयोः अध्ययनाध्यापनयोः पद्धत्योः समन्वयं कृत्वा गुजरात राज्य-माध्यमिकोच्चतर माध्यमिक शिक्षणसमितिः (बोर्ड) द्वारा नूतना-अभ्यासक्रमसंरचना कृता अस्ति। गुजरातसर्वकारद्वारा प्रमाणिताः मानिताः च अभ्यासक्रमाः सन्ति।

गुजरातसर्वकारद्वारा प्राप्तमान्यतायाः **आयुर्वेदः २ मध्यमा १ ( धोरण 11 )** इति विषयस्य नूतनाभ्यासक्रमानुसारं सज्जीकृतमिदं पुस्तकं-प्रकाशनात् प्राक् विषयज्ञैः सर्वाङ्गीणतया-समीक्षितं संसूचितपरिवर्तनानुसारं हस्तलिखितेषु लेखेषु योग्यतया संशोधनानन्तरं प्रकाशितमस्ति।

प्रस्तुतं पाठ्यपुस्तकं कक्षानुसारम् उपयोगि परिशुद्धं च कर्तुं मण्डलद्वारा कृते प्रयत्नेऽपि न्यूनतापरिपूर्णार्थं विद्वद्भिः सूचिताः सूचनाः सादरं स्वीकरणीयाः एव।

**पी. भारती** (IAS)
नियामकः
ता.06-07-2019

कार्यवाहकःप्रमुखः
गान्धीनगरम्

**प्रथमावृत्ति : 2019**
**प्रकाशक** : गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, 'विद्यायन', सेक्टर 10-ए, गान्धीनगरप्रातिनिध्येन पी.भारती, नियामकः
**मुद्रक** :

# मूलभूतकर्तव्यानि

**प्रत्येकं भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः। ***

( क ) संविधान प्रति प्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रीयगीतस्य च आदरः।

( ख ) स्वातन्त्र्याय अस्मीयराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनम् अनुसरणं च।

( ग ) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डिततायाश्च समर्थनं च।

( घ ) देशस्य रक्षणं राष्ट्रियसेवायै उद्घोषाणायां जातायां तदनुसरणञ्च।

( च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः परं स्थित्वा, समस्तभारतीयेषु साम्मनस्यसमानबन्धत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

( छ ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तदवग्रहः।

( ज ) वनानां तडागानां नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तद्वर्धनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

( झ ) वैज्ञानकिमानसाय मानवतावादाय जिज्ञासायै भावनाभिगमाभिबोधः।

( ट ) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च।

( ठ ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (६. तः १४) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

---

* भारतीयं संविधानम् : अधिनियमः 51–क

# अनुक्रमणिका

## रचनाशारीरम्


१. शरीरोपक्रमणीयशारीरम् । १

२. अभिनिवृत्ति-शारीरम् । ८

३. परिभाषाशारीरम् । १५

४. मृतशरीरसंशोधनम् । २२

५. गर्भशारीरम्। २५

६. अस्थिशारीरम् । ३५

७. सन्धिशारीरम् । ४२

८. संन्धिशारीरम् । ४८

९. त्वक्शरीरम्। ५२

१०. मर्मसंशोधनम् । ५६


## क्रियाशारीरम्


११. क्रियाशरीरस्य मूलभूतसिद्धान्ताः। ६२

१२. दोषः ६८

१३. वातदोषः ७२

१४. पित्तदोषः ७५

१५. कफ़दोषः ७९

१६. प्रकृतिवर्णनम्। ८२

१७. आहारवर्णनम्। ८५

१८. आहारपाकवर्णनम्। ८९

१९. अवस्थापाकवर्णनम्। ९५

२०. अग्निवर्णनम्। ९८

# विभाग : १ रचनाशारीरम्

# १ शरीरोपक्रमणीयशारीरम्

सर्वैः प्राणिभिः शरीरं धार्यते। किन्तु किन्नाम शरीरमिति केनाऽपि न ज्ञायते। अत्र शास्त्रानुसारम् आयुर्वेदानुसारं च अस्माभिः शरीरस्य ज्ञानं कारयते। शरीरम् अपि यन्त्रवत् अस्ति। शरीरे नानाविधानि यन्त्रचालकसाधना रूपाणि अवायवानि सन्ति। यथा यंत्रसञ्चालने साधनानि आवश्यकानि तथैव शरीरेऽपि सन्ति।

आयुर्वेदस्य प्रयोजनं -

यथा-चरकमते-''स्वस्थस्य स्वास्थ्यरक्षणम् आतुरस्य विकारप्रशमनं च।'' अस्यार्थः यत् स्वस्थव्यक्तेः स्वास्थ्यरक्षणं, रुग्णस्य विकारोपशान्तिः च कर्तव्या इति। रक्षणयोग्यं स्वास्थ्यं, प्रशमनयोग्यविकारश्च शरीरे एव भवति। अतः एतस्य द्वयस्य प्रयोजनार्थं शरीरस्य प्राकृतिकस्वरूपस्य ज्ञानं नितराम् आवश्यकं भवति। प्राकृतिकवैकारिकस्वरूपयोः दोषधातुयुक्तस्य शरीरस्य मूलभूततत्त्वानाम् अङ्गप्रत्यङ्गानां च वास्तविकं ज्ञानं न भवति तावता आयुर्वेदस्य प्रयोजनस्य संगतिः न जायते।

आयुर्वेदानुसारं शरीरस्य ज्ञानानन्तरं तस्य प्रयोजनमपि अस्माभिः ज्ञातव्यम्। आयुर्वेदस्य संहिताग्रन्थाः, संग्रहग्रन्थाः, च सन्ति, तेषु प्रत्येकम् अङ्गस्य विस्तारपूर्वकं वर्णनम् अस्ति तथा अष्टाङ्गायुर्वेदस्यापि वर्णनमस्ति। ग्रन्थेषु सर्वविषयेभ्यः विविधानि नामानि दत्तानि। यथा सूत्रस्थानं, निदानस्थानं, शारीरस्थानमित्यादि। अस्मिन् शारीरस्थाने संपूर्णाङ्गरचनायाः क्रियायाः च वर्णनम् अस्ति। रचनाशारीरे सूक्ष्मस्थूलशरीरयोः वर्णनं विद्यते। डॉ. गणनाथसेनमहोदयेन प्रत्यक्षशारीर नामकंग्रन्थे उक्ते शरीरस्य खण्डितावयवानां ज्ञानं, शरीरावयवानां कर्तनेन यत् प्रत्यक्षं ज्ञानं प्राप्यते तस्य विवरणं यस्मिन् शास्त्रे वर्तते तत् प्रत्यक्ष शारीरम्। अस्यापरं नाम रचनाशारीरम्। चिकित्साशास्त्रे शारीरज्ञानस्य महत् प्रयोजनमस्ति तदस्माभिः विशेषतया ज्ञातव्यम्।

### शरीरोपक्रमणीयशारीरम्

**शरीरोपक्रमः** - शरीरस्य संपूर्णज्ञानं शरीरोपक्रमः। प्राकृतस्य शरीरस्य ज्ञानं भवेच्चेत् विकृतिं ज्ञातुं शक्नुमः। तज्ज्ञात्वा व्याधिविनिश्चयं कृत्वा चिकित्सा सुलभा भवति।

### १. शरीरशारीरयोः व्याख्या

**शरीरशब्दस्य व्युत्पत्तिः** - यथा वैयाकरणैः निर्मितः प्रत्येकं शब्दः स्वकीयां विशेषतां द्योतयति तथैव आयुर्वेदज्ञैः शरीरशब्दस्याऽपि व्युत्पत्तिः क्रियते। 'शृ' धातोः 'इरन्' प्रत्ययपूर्वकं शरीरशब्दः निष्पद्यते।

**शरीर शब्दस्य निरुक्तिः** - ''शीर्यते तत् शरीरम्'' (चक्रपाणिदत्तः) प्रतिक्षणं शीर्यमाणम् इति शरीरम् ।

यस्य सततं क्षरणं भवति अन्ते च नाशमेति तच्छरीरम् इति कथ्यते। शरीरेऽस्मिन् 'चयः' (Anabolism) 'अपचयः' (Catabolism) इति क्रियाद्वयं सततं भवति अतः क्षरणक्रियया सह शरीरस्य वृद्धिरपि भवति। बाल्यावस्थायां क्षयोपक्षया वृद्धिरधिका भवति। मध्यावस्थानन्तरं क्षरणक्रियायाः आधिक्यं भवति। अन्ते च अस्य शरीरस्य नाशः भवति।

**शारीरस्य व्याख्याः**

(१) एवं विवर्धितः स यदा हस्त-पाद-जिह्वा-घ्राण-कर्ण-नितम्बादिभिः अंङ्गैरुपेतः तदा शरीरमिति संज्ञां लभते।

सु.शा. ५/२

यदा स्त्रियः गर्भाशये पुरुषशुक्रस्य स्त्री-आर्तवस्य च संयोगान्ते प्रकृतिविकाराभ्यां सर्वमेकरूपं भवति तदा सः गर्भः कथ्यते। तस्मिन् पुनः पञ्चमहाभूतानां प्रक्रियया हस्त-पाद-जिह्वा-घ्राण-नितम्बादि-अंङ्गप्रत्यङ्गानां निर्माणं भवति तत् शरीरमिति संज्ञां लभते।

(३) तत्र शरीरं नाम चेतनाधिष्ठानभूतं पञ्चमहाभूतविकारसमुदायात्मकं समयोगवाहि। (च.शा. ६/४)

अर्थात् पञ्चभूतसमन्वितं स्वरूपं शरीरमस्ति। अस्मिन् चेतनायाः (आत्मनः) अधिष्ठानं वर्तते। अयमात्मा शरीरे वसति अतः शरीरि इति संज्ञां लभते। भगवद्गीतायां शरीरं क्षेत्रं आत्मा क्षेत्रज्ञश्च उक्तः। ''इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते''।

**शारीरम्**

**शारीरस्य व्याख्याः**

(१) शरीरमधिकृत्य कृतं शास्त्रं शारीरम्। अर्थात् शरीरमाधारीकृत्य यत् शास्त्रं तन्त्रं वा रचितं तत् शारीरम् उच्यते।

(२) इत्यत्र जन्म-मरणं यतः सम्यगुदाहृतम् ।

शरीरस्य ततः स्थानं शारीरमिति उच्यते।

अस्मिन् प्रकरणे शरीरस्य जन्मनः मृत्योश्च विवरणं कृतमस्ति अतः शारीरं वा शारीरस्थानमिति कथ्यते।

(३) **''शारीरस्थान''**

शरीरं चिन्त्य सर्वं देवमानुषसम्पदा।

सर्वभावैर्यतस्तस्माच्छारीरं स्थानमुच्यते॥ च.शा.८/६९

सर्वे आयुर्वेदज्ञाः सर्वभावैः दैवसम्पद्, मानुषसम्पद् इत्युभाभ्यां प्राणवतां शरीरस्यैव चिन्तनं कुर्वन्ति। एतस्माद् कारणात् अस्य स्थानस्य नाम शारीरस्थानम्।

**२. षडङ्ग-शारीरम्**

**शरीरस्य षडङ्गता**

सम्पूर्णं शरीरं षट्सु विभागेषु विभाजितं कृतमस्ति। अतः आचार्यैः षडङ्गं कथितमस्ति। चरकमतानुसारम् -

**''तत्रायं शरीरस्यांगविभागः, तद्यथा द्वौ बाहू द्वे सक्थिनी शिरोग्रीवम्, अन्तराधिः इति षडङ्गम्।''** (च.शा. ७/५)

सुश्रुतमतानुसारम् - ''तच्च षडङ्गं शाखाश्चतस्त्रो मध्यं पञ्चमं षष्ठः शिर इति।'' (सु.शा. ५/३)




**षडङ्ग शारीरम्**

(i) चतस्त्र शाखाः

२ ऊर्ध्वशाखा (Upper extremities)

२ अधोशाखा (Lower extremities)

(ii) मध्यशारीरम् (Trunk)- वक्षः (Thorax), उदरम् (Abdomon), (३) शिरः (Head & Neek)

## ३. अङ्गप्रत्यङ्ग -विभागः

अङ्गम्-अर्थात् षडङ्गशरीरं तस्य उपर्युक्तं वर्णनम् ।

प्रत्यङ्गम् - ''अवयवम् अवयवं प्रति यः अवयवः तत् प्रत्यङ्गम् उच्यते।'' [अरुणदत्त अ.हृ.शा. ३/१]

सर्वेषाम् अवयवानां लघूनि अवयवानि भवन्ति तानि प्रत्यङ्गं नाम्ना अवगन्तव्यानि।

प्रत्यङ्गस्य विभागद्वयं वर्तते।

(१) बाह्यप्रत्यङ्गम् (२) आभ्यन्तरप्रत्यङ्गम्

(१) बाह्यप्रत्यङ्गानि : मस्तकोदर-पृष्ठ-नाभि ललाट नासा-चिबुक-बस्ति-ग्रीवा इत्येताः एकैकाः । (सु.शा. ५/४)

मस्तकम्, उदरम्, पृष्ठः, नाभिः, ललाटं, नासिका, चिबुकं, बस्ति, ग्रीवा इत्येते अवयवाः शरीरे एकैकाः भवन्ति। एते आहत्य नवसंख्याकाः सन्ति।

(२) कर्णनेत्रभ्रुशंखांसगण्डकक्षा-स्तनवृषणपार्श्वस्फिक्जानु बाहूरुप्रभृतयो द्वे-द्वे विशतिरंगुल्यः स्त्रोतांसि वक्ष्यमाणानि। (सु.शा. ५/४)

(१) आभ्यन्तरप्रत्यङ्गानि-चरक मते निम्नाकिंतानि प्रत्यंगानि सन्ति

| | | |
|---|---|---|
| जङ्घापिंडिके | - | २ |
| ऊरूपिंडिके | - | २ |
| नितम्बौ | - | २ |
| वृषणौ | - | २ |
| शेफः | - | १ |
| स्तनौ | - | २ |
| श्लेष्मभुवौ | - | २ |
| बाहुपिण्डिके | - | २ |
| चिबुकम् | - | १ |
| ओष्ठौ | - | २ |
| सृक्कण्यौ | - | २ |
| दन्तवेषकौ | - | २ |
| तालुः | - | १ |
| त्रिकास्थिपार्श्वौ | - | २ |
| वंक्षणौ | - | २ |
| कुकुन्दरौ | - | २ |
| बस्तिशीर्षः | - | १ |
| उदरम् | - | १ |
| गलशुण्डिका | - | १ |
| उपजिह्विको | - | २ |
| गोजिह्विका | - | १ |
| गण्डै | - | २ |
| कर्णशष्कुल्यौ | - | २ |
| कर्णपुत्रकौ | - | २ |
| अक्षिकूटे | - | २ |
| अक्षिवर्त्मानि | - | ४ |
| अक्षिकनीनिके | - | २ |
| भ्रूवौ | - | २ |
| अवटुका | - | १ |
| हस्तपादतलहृदयानि | - | ४ |
| | | ५६ |

**सुश्रुत** मते – प्रत्यङ्गानि असंख्यानि सन्ति। किन्तु कानिचन गणयितुं शक्यानि अधः लिख्यते ।

| | | | | | |
|---|---|---|---|---|---|
| त्वक् | – | ७ | धमनी | – | २४ |
| कला | – | ७ | मर्मम् | – | १०७ |
| आशयंम | – | ७ | दोषः | – | ०३ |
| धातुः | – | ७ | मलः | – | ०३ |
| सेवनी | – | ७ | कण्डरा | – | १६ |
| अस्थिः | – | ३०० | जालं | – | १६ |
| सन्धिः | – | २१० | कूर्चा | – | १६ |
| स्नायुः | – | ३०० | मांसरज्जुः | – | ०४ |
| पेशी | – | ५०० | संघातः | – | १४ |
| सिरा | – | ७०० | | | |

## ५. शारीर ज्ञानप्रयोजनम्

यः चिकित्सकः पूर्णरूपेण शरीरं जानाति, स एव मनुष्याय सुखप्रदं आयुर्वेदशास्त्रस्य ज्ञानं पूर्णरूपेण प्राप्नोति।

**शरीरे चैव शास्त्रे च दृष्टार्थः स्याद्विशारदः।**

**दृष्टश्रुताभ्यां सन्देहमवापोह्य चरेत् क्रियाः॥ ( सु. शा. ५/५१ )**

यदि कोऽपि आयुर्वेदचिकित्सायां निपुणीभवितुं वाञ्छति, तदा शरीरे एवं शास्त्रे च दक्षो भवेत्। प्रत्यक्षसिद्धान्तकयोः ज्ञानं प्राप्य चिकित्सकेन चिकित्साकर्म कर्तव्यं। आयुर्वेदीयशरीरे दार्शनिकं प्रत्यक्षं च विषयद्वयमेव समायाति। प्रत्यक्षरूपे शरीरस्य–अङ्गप्रत्यङ्गानां संख्या–आकृत्यादीनां ज्ञानं भवति। दार्शनिकरूपे सूक्ष्मशरीरस्य मूलभूत घटकानां सैद्धान्तिकज्ञानमपि आवश्यकमस्ति।

## ४. शारीरशास्त्रविभागः

मानवशरीरस्य अध्ययनाय विविधपद्धतयः सन्ति। केषाञ्चित् शरीरस्थानामङ्गप्रत्यङ्गानां अध्ययनं बहिरेव दृष्ट्वा कर्तुं शक्यते। केषाञ्चित् अवयवाः शरीरान्तरे स्थिताः सन्ति, तदङ्गानां रचना एवं क्रियासम्बन्धिज्ञानं प्राप्त्यर्थं शारीरस्य विभागद्वयं कृतमस्ति। तद् यथा (१) रचनाशारीरम् (२) क्रियाशारीरम्।

**रचनाशारीरम्** –

''**रचनाप्रतिपादिकं शारीरं रचनाशारीरम्।**'' यस्मिन् विज्ञानान्तर्गत – शरीरस्य अवयवानां रचनासम्बन्धिज्ञानस्य अध्ययनं क्रियते तद्रचनाशारीरं वा प्रत्यक्षशारीरं (Anatomy) कथ्यते ।

अनेन विज्ञानेन अस्माभिः विशेषतया अस्थि, सिरा धमनी – मांसपेशी हृदयादीनां अवयवानाम् स्थितिः, आकारः, स्वरूपम् च ज्ञायते। एवञ्च केनाङ्गेन सह केषामवयवाना प्रत्यङ्गानां समीपता वर्तते, तज्ज्ञानमपि भवति। तथा च अङ्गप्रत्यङ्गानां संस्थानरचना एवं तत्पोषणकर्त्रीणांक नाडीनां वर्णनमपि अत्रैव समायाति।

**क्रिया-शारीरम् -**

"**क्रियाप्रतिपादकं शारीरं क्रियाशारीरम्।**" शरीरस्थानां विभिन्नाङ्गप्रत्यङ्गानाम् अवयवानां च क्रियायाः ज्ञानप्रदं विज्ञानं क्रियाशारीरं (Physiology) कथ्यते ।

हृदयपाचनसंस्थानामाशयादि - अवयवानां विभिन्नकार्याणि अनेन विज्ञानेन ज्ञायते। यथा हृदयं कीदृक् कार्यं करोति? रक्तप्रवाहः कथं भवति, भोजनपाचनक्रिया केन प्रकारेण भवति, धातुनिर्माणं, वातादिदोषाणां क्रिया-इत्यादीनां वर्णनमस्ति।

सुश्रुतसंहितायां शारीरस्थानस्य (१०) दशाध्यायाः सन्ति। तत्र सूक्ष्मशरीरचना, भ्रूणविज्ञानं शरीररचनया सह क्रियाशरीरस्यापि वर्णनं कृतमस्ति।

श्रीदामोदर शर्मा गौड़द्वारा अभिनवशारीरे एतादृशाः शरीरविभागाः वर्णिताः कथिताश्च सन्ति।

**( १ ) अभिनिवृत्तिशारीरम् (Developmental Anatomy)**

(क) धातुभेदशारीरम् (Componental Anatomy)

(ख) गर्भावक्रान्तिशारीरम् (Embryology)

**( २ ) विचयशारीरम् (General or gross Anatomy)**

(क) अंङ्गविभागशारीरम् (Topology)

(ख) संख्याशारीरम् (Systamatic Enumeration)

**( ३ ) अङ्गविनिश्चयशारीरं वा मृतशोधनशारीरम् (Practical Anatomy)**

**( ४ ) व्याकरणशारीरम् (Descriptive Anatomy)**

(क) अस्थिव्यूहशारीरम् (ख) सन्धिव्यूहशारीरम्

(ग) स्नायुव्यूहशारीरम् (घ) पेशीव्यूहशारीरम्

(ङ) स्त्रोतोव्यूहशारीरम् (च) कोष्ठाङ्गव्यूहशारीरम्

(छ) उत्तमाङ्गशारीरम्

**( ५ ) मर्मशारीरम्** (vital Parts Applied Anatomy)

**( ६ ) प्रमाणशारीरम्** (Metrical Anatomy)

(क) अङ्गुलीप्रमाणशारीरम् (Somatometry)

(ख) अञ्जलीप्रमाणशारीरम् (Volumetry)

**( ७ ) दोषधातुमलशारीरम्** (Functional Anatomy or Physiology)

**( ८ ) विकृतिविज्ञानीयशारीरम्** (Morbid Anatomy or Pathological-Anatomy)

**आधुनिकमतानुसारमध्ययनदृष्ट्या शरीरविभागाः**

(१) शवच्छेदनम् (By Dissection) (२) सैद्धान्तिकम् (By Theory)

**( १ ) शवच्छेदनदृष्ट्या शरीर विभाजनम् विभक्तं क्रियते ।**

(क) उर्ध्वशाखाः अधःशाखाः (Upper & Lower Extremities)

(ख) वक्षस् (Thorax)

(ग) उदरम् (Abdomen)

(छ) ग्रीवा (Neck)

(ङ) शिरः (Head)

(च) अवयवाः (Organs)

**( २ ) सैद्धान्तिकदृष्ट्याऽपि विभागानेके शरीरस्य दृश्यन्ते।**

(१) सांस्थानिकशारीरम् (Systematic Anatomy)

(२) प्रादेशिकशारीरम् (Regional Anatomy)

(३) पृष्ठशारीरम् (Surface Anatomy)

(४) गर्भशारीरम् (Embryology)

(५) सूक्ष्मरचनाशारीरम् (Histology)

(६) तुलनात्मकशारीरम् (Comparative Anatomy)

(७) व्यवहारशारीरम् (Applied Anatomy)

## स्वाध्यायः

**१. बहुवैकल्पिकप्रश्नानां योग्यम् उत्तरं चिनुत।**

(१) रचनाप्रतिपादकं शारीरम् -

(क) क्रियाशारीरम् (ख) द्रव्यगुणः (ग) रचनाशारीरम् (घ) आयुर्वेदः

(२) सुश्रुतसंहितायाः शारीरस्थानस्य कति अध्यायाः सन्ति?

(क) ११ (ख) १२ (ग) ९ (घ) १०

(३) शरीरम् अधिकृत्य कृतं तन्त्रम् -

(क) शारीरम् (ख) शरीरम् (ग) सुश्रुतसंहिता (घ) रचना

(४) सुश्रुतमतानुसारम् अस्थिनां संख्या -

(क) २०६ (ख) ३०० (ग) २०० (घ) २१०

(५) चरकमतानुसारं प्रत्यङ्गानां संख्या -

(क) ६० (ख) ५६ (ग) ५४ (घ) ५०

(६) शरीरस्य अङ्गविभागाः -

(क) पञ्च (ख) षट् (ग) सप्त (घ) अष्ट

(७) मर्मसंख्या:

(क) षडधिकशतम्  (ख) सप्ताधिकशतम्  (ग) अष्टाधिकशतम्  (घ) पञ्चाधिकशतम्

**२. प्रश्नानाम् एकैकवाक्येन उत्तराणि लिखत।**

(१) शरीरशब्दे क:धातु: ?

(२) सुश्रुतमते बाह्यप्रत्यङ्गानि कति सन्ति?

(३) शरीरोपक्रम: अर्थात् किम्?

(४) चक्रपाणिदत्तमते शरीरस्य व्याख्या का?

(५) रचनाशरीरस्य अपरं नाम किम्?

**३. लघुत्तराणि लिखत।**

(१) महाभूतानां नामानि लिखत।

(२) शरीर शारीरयो: व्याख्यां लिखत।

(३) चरकोक्तप्रत्यङ्गानि लिखत।

(४) शरीरज्ञानप्रयोजनं किम्?

(५) षडङ्गशारीरमर्थात् किम्?

**४. सविस्तरम् उत्तरं लिखत।**

(१) शरीररचनाया: महत्त्वं लिखत।

(२) शरीरस्य ज्ञानं कथमावश्यकमस्ति तल्लिखत।

(३) शरीरशास्त्रस्यविभागनामानि लिखत।

•

# २ अभिनिवृत्तिशारीरम्

अभिनिवृत्तिशब्दस्यार्थः निष्पन्नता एवं पूर्तिः भवति। यत्र घटकैः तत्त्वैः वा शरीरनिर्माणं भवति अथवा येषां साहाय्येन शरीरावयवानां सूक्ष्मांशतः स्थूलावस्थापर्यन्तं निर्माणं क्रियते तद्वर्णनं यस्मिन् शारीरे वर्णित तदभिनिवृत्तिशारीरं कथ्यते। प्रकृतिपुरुषसंयोगत्वात् तात्त्विकसृष्टिरुत्पद्यते। अस्य विकासक्रमे षोडशविकाराः समुत्पद्यन्ते तैः कार्यसृष्टिः सञ्जायते। सृष्टेः प्रत्येकांशेषु परमाणूनामुपस्थितिः भवति। महाभूतदृष्ट्या चतुष्प्रञ्चप्रकाराः परमाणूनां भवन्ति पार्थिवजलीयाग्नेयवायवीप्रत्येकंयेति। कार्यद्रव्येषु पञ्चमहाभूतानां विद्यमानतास्ति। तथा च तद्विभिन्नरूपं प्रकृतिप्रभावं च बोभूयते। तथाप्यत्र-प्रारम्भिकरूपगुणयोः परिवर्तनं न भवति। मानवशरीरेऽपि पञ्चमहाभूतोपस्थितिः वर्तते तथापि विशेषतः पार्थिवांशाधिकः भवति अतः तदपि पार्थिवशरीरमिति कथ्यते। इदं शरीरस्य मूलभूतघटकानां ज्ञानमावश्यकं वरीवर्त्ति।

**धातुभेदशारीरम्**

धातुशब्दस्योत्पत्तिः 'धारणात् धातवः' इति कथ्यते, भवति च। अतः शरीरस्य धर्तृणां, नित्यवृद्धिकर्तृणाञ्च घटकानां धातुसंज्ञा प्रदीयते। आयुर्वेदविद्भिः चिकित्सापूर्वं शरीरस्य एवं तस्य घटकानां ज्ञानमावश्यकं भवति इति कथितमस्ति। अतः अस्मिन् प्रकरणे धातुभेदात् पुरुषशरीरस्य त्रिगुणात्मकता, त्रिदोषमयता एवं दोषधातुमलमूलकता साहित्यस्य पुरुषस्य दिग्दर्शनं क्रियते।

## १. पुरुषशब्दस्य व्याख्या

**पुरुषशब्दस्य व्युत्पत्तिः**

**चक्रपाणिमतानुसारम्**

**''पुरि शरीरे शेते इति व्युत्पत्त्या य आत्मा पुरुषशब्देन -**
**उच्यते तमाह चेतनेत्यादि।'' (च.शा. १/१६ चक्रपाणिः)**

'पुर अग्रगमने' धातोः पुरुषशब्दः सञ्जायते। यस्यार्थो भवति गमनमिति। अर्थात् देहदेहान्तरे लोकलोकान्तरे सूक्ष्मपुरुषस्य गमनं भवति, अतः एव पुरुषः कथ्यते। अग्रगमनत्वाद् ज्ञायते यत् जडीभूतं जगत् पुरुषसंयोगेनैव विद्यमानं वर्तते।

'पुरि आप्यायने' धातोरस्मादपि शब्दोत्पत्तिर्जायते। तदर्थो भवति यत् यदुपस्थितौ निरन्तरं शरीराप्यायनं भवति। अर्थात् प्रीणनपोषणवर्धनादिकर्माणि भवन्ति तत्पुरुषः कथ्यते।

**हिताहारोपयोग एक एव पुरुषवृद्धिकरो भवति**

**पुनर्व्याधिनिमित्त इति। (च.सू. २५/३१)**

**स वा एषः पुरुषोऽन्नरसमयः (तैत्तिरीय उपनिषद्)**

**पुरुषस्यव्याख्या-**

पाञ्चभौतिकसृष्ट्यां आत्मतत्त्वसहयोगेन विकासपरंपरायाः प्रसारः भवति, तदेव चेतनतस्य, तदेव पुरुष इति। अतः लक्षणस्य सामान्यज्ञानमावश्यकमिति।

(१) अस्मिन् शास्त्रे पञ्चमहाभूतशरीरिसमवायः पुरुष इत्युच्यते। (सु.शा.१/२२)

(२) शरीरेन्द्रियात्मसत्त्वसमुदायपुरुषमाचक्षते। (काश्यप)

## २. धातुभेदन पुरुषसंघटनम्

**'' पुरुषधारणाद्धातुः तेन धातुभेदेनेति पुरुषधारणार्थभेदेन '' ( च. शा. १/३ चक्रपाणिः )**

आयुर्वेदज्ञातारः महर्षयः शरीररचना एवं क्रियाशारीरस्य स्वतन्त्रदृष्ट्या पुरुषस्यास्तित्वं प्रस्तुतं कुर्वन्ति पुरुषः धातुभेदेन स्थानोपयोगप्रकृतिकृतिस्थितिसंगठनस्याधारे एकधातुजः, षड्धातुजः, एकादशधातुजः, सप्तदशधातुजः, चतुर्विंशतिधातुज एवं पंचविंशतिधातुजः अस्ति। सएव पुरुषः राशिपुरुषः, कर्मपुरुषः एवं चिकित्साधिकृतपुरुषः नाम्ना दर्शितः।

**पुरुषस्य सामान्यस्वरुपम्**

सामान्यतया पुरुषस्य भेदद्वयमस्ति। (१) शुद्धपुरुषः (२) औपाधिकपुरुषः इति। चेतनाधात्वात्मरूपः शुद्धपुरुषः कथ्यते। यः क्षेत्रज्ञेति नाम्ना ज्ञायते। आयुर्वेदे सुखदुःखाश्रयं राशिपुरुषं कथयन्ति, तदौपाधिकपुरुष इति।

आयुर्वेदेऽस्मिन् पुरुषसंघटनमेतादृक् कृतमस्ति।

| | |
|---|---|
| (१) एकधातुजपुरुषः । | (२) द्विधातुजपुरुषः। |
| (३) त्रिधातुजपुरुषः | (४) षड्धातुजपुरुषः। |
| (५) त्रयोदशधातुजपुरुषः। | (६) सप्तदशधातुजपुरुषः। |
| (७) चतुर्विंशतिधातुजपुरुषः। | (८) पञ्चविंशतिधातुजपुरुषः। |

**एकधातुजपुरुषः** - शुद्धपुरुषो हि एकधातुजपुरुषोऽस्ति। पुरुषोऽयं चेतनाधातुरूपः, निर्विकारः चैतन्येन शरीरे तिष्ठति। यः मनसः पञ्चमहाभूतानां, शब्दस्पर्शरूपरसगन्धादिभावानां दशेन्द्रियाणां चैतन्यतायाः मूलकारणमेवास्ति। सोऽयमेवैकधातुजः पुरुषः वर्तते। शुद्धात्मानिगुर्णे सत्यपि सत्वादिनां संयोगत्वात् सगुणरुपो भवति।

**''चेतनाधातुरप्येकः स्मृतः पुरुषसंज्ञकः। ( च. शा. १/१६ )''**

**निर्विकारः परस्त्वात्मा सत्वभूतगुणेन्द्रियैः,**

**चैतन्ये कारणं नित्यो द्रष्टा पश्यति हि क्रियाः॥ ( च. सू. १/५६ )**

**द्विधातुजपुरुष** : वैकल्पिकभेदेन क्षेत्रक्षेत्रज्ञाग्निसोमीयपुरुषः द्विधातुक उच्यते।

**( १ ) क्षेत्रक्षेत्रज्ञपुरुषः** - पुरुषस्य विभेदेन क्षेत्रम् क्षेत्रज्ञञ्च रूपद्वयं दृश्यते। अत्र यत्क्षीणतां याति एवञ्च क्षयात् सुरक्षितं भवति। क्षेत्रं नाम शरीरम्, क्षेत्रज्ञ नाम आत्मा। यत्र प्रकृतिविकारसमूहः, पञ्चमहाभूतविकारसमूहः सन्निहितं तत्क्षेत्रमस्ति। तेषामेव समुदायस्वरूपे तिष्ठति तत्क्षेत्रज्ञोऽभिधीयते।

**इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते।**

**एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तिद्विदः॥ ( भ. गी. १३/१ )**

**( २ ) अग्निसोमात्मकपुरुषः** - सर्वेषु द्रव्येषु अग्नि एवं सोम अधिष्ठते, तदेव कारणात् पुरुषस्य अग्निसोमात्मकरूपद्वयं वर्तते।

**अग्निसोमात्मकं सर्वं जगत् स्थावरजङ्गमम् ।**

**अग्निसोमात्मकाः सर्वे देहिनस्तु चतुर्विधाः ॥ ( मे.शा. ४ )**

**त्रिधातुपुरुषः** – वैकल्पिकभेदेन त्रिदण्डः, त्रिगुणात्मकः त्रिदोषात्मकः पुरुषः इति प्रकारत्रयेण वर्णितोऽस्ति।

**( १ ) त्रिदण्डात्मकः** – शास्त्रेषु सत्त्वं (मनः) आत्मा एवं शरीरस्य संमिलित स्वरूपः मिलित्वा त्रिदण्डरुपः पुरुषः उच्यते।

यथा

**''सत्त्वमात्मा शरीरं च त्रयमेतत् त्रिदण्डवत्''**

**लोकस्तिष्ठति संयोगात् तत्र सर्वं प्रतिष्ठितम् ॥** (च.सू. १/)

अर्थात् जीवलोकस्याधारः सत्वमात्मा शरीरमस्ति।

**( २ ) त्रिगुणात्मकः** – विद्वद्भिः सत्वरजस्तमोगुणान्वितः पुरुषः त्रिगुणात्मकः कथ्यते, तेन सुखदुःखादिना म् उभयं अनुभवन्ति।

''तत्र कारणानुरूपं कार्यमिति कृत्वा सर्व एवैते विशेषाः सत्वरजस्तमोमया भवन्ति, तदअनत्वात्तन्मयात्वाच्च तद्‌गुणा एव पुरुषा भवन्तीत्यनेके भाषन्ते'' (सु.शा. १/९)

**( ३ ) त्रिदोषात्मकः** – वातपित्तकफादि त्रिदोषाः यस्मिन् सन्ति। सः पुरुषः त्रिदोषात्मकः कथ्यते। एषां विकृतित्वात् शरीरे व्याधिर्जायते मृत्युर्वा भवति।

''वातपित्तश्लेष्माण एव देहसम्भवहेतवः'' (सु.सू. २१/३)

दोषसंयुक्तत्वात् जीवात्मानं त्रिदोषात्मा कथ्यते।

**षड्धातुजपुरुषः** – वैशेषिकदर्शने पञ्चमहाभूतानि एवं जीवात्मनः समुदायस्वरूपं षड्धातुजपुरुषः कथ्यते। सुश्रुतचरकादिभिः शरीरदृष्टौ कर्मपुरुषस्य रूपेण स्वीकृतोऽस्ति पुरुषः।

खाद्वयश्चेतनाषष्ठा धातवः पुरुषः स्मृतः। (च.शा.१/१६)

**त्रयोदशधातुज पुरुषः** – सुश्रुतवचनानुसारम् –

''दोषधातुमलमूलं हि शरीरमिति'' अर्थात् त्रिदोषः, सप्तधातवः त्रिमलाः मिलित्वा शरीरधारकः पुरुषः त्रयोदशधातुजः कथ्यते।

**चतुर्विंशतिधातुजपुरुषः** – सृष्ट्युत्पत्तिमूलभूतोपादानं उत्पादकतत्त्वानि आद्यसांख्यदृष्ट्यां चतुर्विंशतिः मन्यन्ते। अतः तत्त्वानां पुरुषेण सह संबंधः वर्तते। अतः पुरुषः चतुर्विंशतिधातुजेति।

(१) पुनश्च धातुभेदेन चतुर्विंशतिकः स्मृतः।
मनोदशेन्द्रियाण्यर्था प्रकृतिश्चाष्टधातुकी॥ (च.शा. १/१७)

(२) बुद्धीन्द्रियमनोर्थानां विद्याद्योगधरं परम्।
चतुर्विंशतिको ह्येष राशिः पुरुषसंज्ञकः ॥ (च.शा. १/३५)

प्रकृतिविकृतिभेदेन वा धातुभेदेन पुरुषः चतुर्विंशतितत्त्वरूपो भवति। ''एकः मनः + ढश इन्द्रियाणि + पञ्चमहाभूतानि (अर्थाः) एते षोडश (१६) विकाराः एवं अष्टभूतप्रकृति अर्थात् अव्यक्तं, महत्, अहङ्कार एवं पञ्चतन्मात्रा मिलित्वा चतुर्विंशतितत्त्वानि भवन्ति।

**पञ्चविंशतितत्त्वपुरुषः** – प्रायशः सांख्याशास्त्रज्ञाः (२५) पञ्चविंशतितत्त्वानि मन्यन्ते। आयुर्वेदे चरकमतानुसारं २४ एवञ्च सुश्रुतानुसारेण २५ स्वीक्रियते। चरकमते स्वीकृतं अव्यकत तत्त्वं सांख्यावार्याः एवं सुश्रुतः प्रकृतिपुरुष रूपेण द्विधा करोति। अतः ते पञ्चविंशति तत्त्वानि मन्यन्ते।

एवमेषां तत्त्वचतुर्विंशतिर्व्याख्याता।'' (सु.शा.१/४)

''तत्र सर्व एवाचेतन एष वर्गः पुरुषः पञ्चविंशतितमः

कार्यकारणसंयुक्तश्चेतयिता भवति।'' (सु.शा. १/८)

**पाञ्चभौतिकत्वम्**

शरीररचनायाः पूर्वं शरीरस्य पांचभौतिकस्वरूपमेवञ्च तस्य संगठनस्य ज्ञानमावश्यकं वर्तते। अतः तल्लिख्यते भूतशब्दस्य व्युत्पत्तिः – भू सत्तायाम् धातोः निष्पन्नोऽयं शब्दः। यः सत्तावान् भवति सः भूतोऽस्ति। एवञ्च सत्तावान् सत्यपि – उत्पत्तिशीलः अतः भूतः कथ्यते। वस्तुतः सामान्यजीवनोपयोगि मयं वस्तूनि सत्तामयानि उत्पत्तिधर्मशीलानि सन्त्यपि नित्यानि नेति ईश्वर एव नित्यः अतः सः भूतो नास्ति। अतः पृथ्व्यप्तेजोवाप्वाकाश पञ्चतत्वानि एव महाभूतत्वेन ज्ञायन्ते।

**''सर्वं द्रव्यं पाञ्चभौतिकस्मिन्नर्थे'' (च.सू. २६/१०)**

सर्वाणि द्रव्याणि पाञ्चभौतिकानि सन्ति। तथैव महाभूताः अपि पाञ्चभौतिकाः एव सन्ति। पृथ्व्यादिषु महाभूतेषु शब्दादयः गुणाः सम्भवन्ति तत्कारणमस्ति यत् गुणाः आश्रयं विना नाववितष्ठन्ते तेन तेषामपि पाञ्चभौतिकत्वं सिद्धयति। यथा –

पृथिव्यां जलांशः विद्यते । तेजो विना तापोपस्थितिः न जायते । पृथिव्याः मृत्तिकायाः छिद्रेषु वायोरस्तित्वं भवति। सर्वभूत संयोगित्वात् आकाशस्यापि विद्यमानता वर्तत एव। अनेन प्रकारेण जले द्रवाद्रवरुपेण पृथ्वी, जलस्य तरलधर्मे तेजः, जलचरप्राणिनां कृते वायुः, जले आकाशोऽपि विद्यते। तेजसि उज्जवलपार्थिवांशः, जलबिन्दुजनक जलम्, गतिसम्पादक एवं ज्वलनक्रियायाः सहायकवायुः, सर्वसंयोगित्वात्, आकाशो भवति। स्थूलवायौ घनीभूतबाष्परुपजलम्, तापजनकं तेजः, आकाशस्योपस्थितिः भवति। तथैवाकाशे रजरूपपृथ्वी, बाष्परूपजलम्, तापजनकं तेजः, स्पर्शग्राह्यवायुः च भवति।

भावप्रकाशानुसारं महाभूतानां विशेषगुणः –

आकाशस्यगुणलघुः, पृथिव्याः गुरुः, जलस्य स्निग्धम्, वायोः रुक्षः, अग्नेर्तीक्ष्णगुणः भवति।

''लघुर्गरुस्तथा स्निग्धो रुक्षस्तीक्ष्ण इति क्रमात्।

नभोभूवारिवातानां वह्नेरेताः गुणाः स्मृताः॥''

चरकमतेन लिखितमस्ति यत् – पृथ्व्याः खरत्वं, जलस्य द्रवत्वं, वायोश्चलत्वं, अग्नेः उष्णत्वं, आकाशस्य-अप्रतिघातत्वमादि भौतिकगुणाः विद्यन्ते। अनेन प्रकारेणोत्तरोत्तरं आकाशे शब्दः, वायौ शब्दस्पर्शौ, अग्नौ शब्दस्पर्शरूपाणि, जले शब्दस्पर्शरूपरसाः पृथ्व्यां शब्दस्पर्शरूपरसगन्धादि पञ्चगुणाः भवन्ति।

| महाभूतम् | त्रिगुणम् |
|---|---|
| आकाशः | सत्त्वबहुलम् |
| वायुः | रजोगुणप्रधानः |
| अग्निः | सत्त्वं च रजबहुलम् |
| जलम् | सत्त्वं च तमः बहुलम् |
| पृथ्वी | तमः बहुलम् |

**त्रिगुणात्मकत्व**

तथैव सत्त्वादिगुणानां वृत्तिः महाभूतेषु वर्तते। आकाशः सत्वगुणप्रधानः वायुः रजोगुणप्रधानः, अग्निः सत्वरजोगुणप्रधानः, जलम् सत्वतमोगुणप्रधानम्, पृथ्वी तमोगुणप्रधानास्ति। इत्थं भौतिक, पारस्परिक, सात्त्विकादि लक्षणात्मकता तथा पञ्चमहाभूतानां पञ्चगुणेषु विद्यमाने सति सृष्टिरुत्पद्यते। एवञ्च संसारस्य पाञ्चभौतिकता, शरीरस्य पाञ्चभौतिकत्वम्, गर्भशरीरस्य-त्रिदोढोषाणां, धातूनां, मलानां च पाञ्चभौतिकत्वम् सिद्धयति इति।

**सूक्ष्मशरीर वर्णनम्** – सः दिव्यदृष्टीं विना द्रष्टुं न शक्यते तत्सूक्ष्मशरीरम्। तत् शरीरात शरीरं उपैति। अस्यापरं नाम अतिवाहकशरीरं एवं लिङ्गशरीरं अपि।

शरीरस्य भागद्वयं वर्तते।

(१) सूक्ष्मशरीरम् (२) स्थूलशरीरम् इति।

मनोबुद्धयहङ्कारेन्द्रियाणि तन्मात्रान्वितं सूक्ष्मशरीरं भवति।

**कर्मपुरुषनिरुपणम्** – पञ्चमहाभूतैः सह चेतनायाः समुदायस्वरुपमयः पुरुष एव कर्मपुरुषोऽस्ति।

अस्मिन् पुरुषे आरोग्यानारोग्यप्रवृत्तिः दृश्यते।

**''क्षेत्रज्ञः पञ्चमहाभूतशरीरक्षेत्रवित् कर्मपुरुषः'' (च.शा. ३/१०)**

आयुर्वेदः चिकित्सायाः विज्ञानमस्ति। अतः यस्य चिकित्सा कर्तव्या भवति सः कर्मपुरुष उच्यते।।

**पञ्चमहाभूत शरीरिसमवायः पुरुष इति।**

**स एव कर्मपुरुषः चिकित्साधिकृतः ॥ (सु.शा. १/१६)**

पञ्चमहाभूतानां शारीरिणः समन्वयो यत्र भवति स पुरुषोच्यते।

अयं पुरुषः सुखवदुःखेच्छाद्वेषविकारयुक्तो भवति। अस्य पुरुषस्य चिकित्सां चिकित्सकः करोति सः कर्म पुरुषः भवति। अत एव षड्धात्वात्मक पुरुषं, कर्मपुरुषं च चिकित्साधिकृत् पुरुष इति कथ्यते।

## स्वाध्यायः

**१. बहुवैकल्पिकप्रश्नानां योग्यम् उत्तरं चिनुत।**

(१) अभिनिवृत्तिशारीरं नाम किम् ?

(क)शरीरनिर्माणघटकत्वम्   (ख) धातुः   (ग) दोषः   (घ) प्रकृतिः

(२) आयुर्वेदः कस्य विज्ञानमस्ति

(क) चिकित्सायाः   (ख) पेश्याः   (ग) स्नायूनांम्   (घ) धनस्य

(३) रजोगुणप्रधानः कः ?

(क) स्नायुः   (ख) वायुः   (ग) ज्ञानेन्द्रियाणि   (घ) मनः

(४) अग्नौ कस्य गुणस्य प्राधान्यम् ?

(क) रजस्तमोगुणप्राधानम्(ख) सत्वतमसयोः प्राधान्यम्

(ग) सत्वरजोगुणप्राधान्यम्   (घ) एकस्याऽपि न

(५) पृथ्व्यां कस्य अंशः विद्यते ?

(क) ज्ञानस्य   (ख) धनस्य   (ग) शरीरस्य   (घ) जलस्य

(६) क्षेत्रज्ञः अर्थात् कः ?

(क) मनः   (ख) शरीरम्   (ग) आत्मा   (घ) एकाऽपि न

(७) तापजनकं कि ?

(क) तेजः   (ख) लसता   (ग) दुष्टमानवः   (घ) धनम्

**२. वाक्यैकस्मिन् उत्तरं लिखत।**

(१) शरीरस्य कति विभागाः सन्ति ?

(२) अव्यक्तात् किं समुत्पद्यते ?

(३) का नाम पञ्चतन्मात्रा इति लिखत।

(४) एकादशेन्द्रियाणि कानि सन्ति ?

(५) महत्तत्वात् किं समुत्पद्यते ?

**३. अधोलिखित-प्रश्नानां लघूत्तराणि लिखत।**

(१) कर्मपुरुषः कः कथ्यते ?

(२) विकारः नाम किम् ?

(३) त्रिधातुजपुरुषः कोऽस्ति ?

(४) किं नाम मूलप्रकृतिः कथ्यते ?

**४. सविस्तारम् उत्तरं लिखत।**

(१) अभिनिवृत्तिशारीरं नाम किम्? लिखत।

(२) धातुभेदेन पुरुषसंगठन कथं भवति?

(३) चतुर्विंशतिपुरुषः कथं भवति?

(४) शरीरस्य पाञ्चभौतिकत्वं नाम किम्?

(५) सूक्ष्मशरीरं नाम किम्?

**५. यथायोग्यमुत्तरं संयोजयत।**

| **अ** | **ब** |
|---|---|
| (१) त्रिगुणात्मकः | (१) वातः, पित्तं, कफः |
| (२) त्रिदण्डात्मकः | (२) सत्वरजस्तमः |
| (३) त्रिदोषात्मकः | (३) सत्वः, आत्मा, शरीरम् |
| (४) षड्धातुजः | (४) सूक्ष्मशरीरम् |
| | (५) कर्मपुरुषः |

●

# ३ परिभाषाशारीरम्

**ग्रीवामेढ्रयोरेकैक:**

शारीरशास्त्रे नानाविधा: संज्ञा: प्रयुज्यन्ते। या: अन्यशास्त्रेषु तदर्थेन प्रयुज्यन्ते। तासां विवरणम् अस्मिन् प्रकरणे दर्शितम्।

**१. षड् कूर्चा: ते हस्तपादग्रीवामेढ्रेषु हस्तयोर्द्वौ पाढयोर्द्वौ**

**कूर्चा:** (सु.शा ५/१२)

कुर्चा: षड् भवन्ति। ते हस्तयो: पादयो: ग्रीवायांमेढ्रे च भवन्ति। तस्य संख्या अत्र निर्दिश्यते।

**संख्या**

हस्तयो: - २

पादयो: - २

ग्रीवाया: १

मेढ्रे - १

०६

पेशीस्नायुसिराधमन्याश्च सन्निपात: कूर्चमिव दृश्यते। ''कूर्चा नाम स्नायुधमनीसन्निपाता स्वेष्वेकैका: स्नायुसन्निपाता पञ्चसग्रीवाकक्षवंक्षणभागेष्वेकश्च धमनीसन्निपातो मेढ्रे दृश्यत इत्युच्यते षडिति।''

(हाराणचंद्र)

**२. कण्डरा**

षोडशकण्डरा:-तासां चतस्र: पादयो: तावत्यो हस्तग्रीवापृष्ठेसु तत्र हस्तपादगतानां कण्डराणां नखा: अग्रप्ररोहा: ग्रीवा हृदयनिबन्धिनीनां अधोभागगतानां मेढ्रं श्रोणिपृष्ठनिबन्धिनीनामधोभागगतानां बिम्बमूर्धोरुवक्षोअंसापिण्डादीनां च।

(सु.शा. ५/१०)

षोडश कण्डरा: भवन्ति। तासां चतस्र: पादयो: तथैव हस्तयो ग्रीवायां पृष्ठेऽपि भवन्ति चतस्र:। हस्तयो: पादयो: च या: कण्डरा: भवन्ति तासां प्ररोहा नखा: भवन्ति। ग्रीवाया: प्ररोहं मेढ्रमस्ति। श्रोणी पृष्ठयो: सयोजिकानां कण्डरणाम् अध: प्रान्तस्य प्ररोहं बिम्बमस्ति। एतासां कण्डराणाम् प्ररोहत्वेन मस्तकम् ऊरू, वक्ष:, अंश: पिण्ड:चास्ति।




**आधुनिकमतानुसारं (Tendons of muscles)**

**कण्डरा**-महत्य: स्नायव: प्रोक्ता: कण्डरा-स्तास्तु षोडश:। (भावप्रकाश:)

नखा: - यत् हस्तपादयो: कण्डराणां अधोनिवेश: (Inssrtion) नखानां समीपे भवति।

अर्थात् एतासां कण्डराणां अन्तिमभागात् नखानुत्पति भवति इति न मन्तव्यम्।

मेढ्रम् - मेढ्रम् इत्ययं शब्द: शिश्नवाचक: नास्ति अपितु जननेन्द्रिय वाचकोऽस्ति यस्यापरं नाम गुह्यप्रदेश: (Pubic region) इत्यस्ति। ग्रीवादिस्थानस्य कण्डराणां निवेश: गुह्यप्रदेशे भवति।

बिम्बम् - विम्वम् इत्यस्य कुते श्रेणिबिम्बमिति शब्दलोकप्रसिद्धोऽस्ति अस्य अपरं नाम श्रोणीचक्रम् (Pelvis) इत्यप्यस्ति। श्रोणीपीठयो: कण्डराणां निवेश: श्रोणीचक्रे भवति।

**३. जालम्**

मांससिरास्नाप्वस्थिजालानि प्रत्येकं चत्वारि तानि मणिबंधगुल्फ संश्रितानि परस्परं निबद्धानि परस्परं गवाक्षितानि चेति यैर्गवाक्षितमिदं शरीरम्।

मांसस्य-सिराया:, स्नायुनाम् अस्थीनाञ्च चत्वारि-चत्वारि जालानि भवन्ति। एतानि जालानि मणिबन्धगुल्फाश्रितानि परस्परं बद्धानि संयुक्तानि गवाक्षितानि च सन्ति।

एतेभ्यरेव इदं समस्तं शरीरं गवाक्षितमस्ति।

गवाक्षितमिदं शरीरं कथितस्यास्य अभिप्राय: तदेवास्ति यत् मणिबंधद्वयं गुल्फद्वयं च जालस्थानमिति उक्तं तथापि संपूर्णशरीरं तु जालसमाने प्राप्तिकारणं सिरा: स्नाप्वादीनि अङ्गानि आश्रये (जाले) तद्वद् अनुप्रविष्टानि भवन्ति येन तत् स्थानं जालोदारं भवेत्।

**४. संघात:**

चतुर्दशास्थानां संघाता: तेषां त्रयो गुल्फजानुवङ्क्षणेषु एतेनेतर सक्थि बाहू च व्याख्यातो त्रिकशिरसोरेकैक:।

अस्थिनां चतुर्दशसंघाता: भवन्ति।

| | | |
|---|---|---|
| गुल्फस्य | - | २ |
| जानो: | - | २ |
| वंक्षणस्य | - | २ |
| मणिबन्धस्य | - | २ |
| कूर्पस्य | - | २ |
| अंसस्य | - | २ |
| शिरस: | - | १ |
| त्रिकस्य | - | १ |
| | | १४ |

**संघात:** - प्राय: द्वयधिकास्थिनां सम्मेलनं संघातपदेन ज्ञातव्यम्।



**कूर्पर संधि मध्ये संघात निर्देश**

५. **सीमन्तः** – चतुर्दशैव सीमन्ताः ते च अस्थिसंघातवत् गणनीयाः।

सीमन्ताः चतुर्दशाः सन्ति (ते सीमन्ताः अस्थिसंघातयुक्ताः भवन्ति अतः अस्थिसंघातवत् गणनीयाः। बहुनामाचार्याणां मते सीमन्ताः अष्टादशाः भवन्ति।

अनेन ज्ञायते यत् शिरसः हनुसंघातस्य स्थाने पञ्च सीमन्तान् संगृह्य अन्ये त्रयोदश संघाताः पूर्ववदेव गणनीयाः स्वीकर्तव्याः वा॥ सीमन्ताः पञ्च मूर्ध्निस्युर्गुल्फादिष्वस्थिसंघात॥

(अरुणदत्तटीका)




**करोटि उर्ध्वभाग**

६. **सेवनी** –

**सप्त सेवन्यः शिरसि विभक्ताः पंच।**

**जिह्वा शेफसोरेकैकाः ताः परिहर्तव्या शस्त्रेण॥** **(सु.शा. ५/१५)**

सप्त सेवन्यः सन्ति। शिरसि पञ्च पृथक् पृथक् सेवन्यः परं जिह्वायाः शिश्नस्य च अधोभागे एकैक सेवनी भवति। शस्त्रकर्मणः काले आसां अवधानं प्रदातव्यम्।

**सीवनम्** – सीवनाक्रियायाः यः भागं सम्मिल्यते सः भागः यथा दृश्यते तथा रचनेयमपि दृश्यते अतः एनमपि सीवनमिति कथ्यते। सीवनत्वचा, श्लेष्मलत्वचा, अस्थीनि च अस्मिन् समाहिता (शिश्नस्य सेवनां त्वचा जिह्वायाः श्लेष्मभी त्वचा शिरसः अस्थीनि भवति।)

७. **रज्जूः – ( मांसरज्जूः )**

महत्यां मांसरज्जवश्चतस्त्रः –

पृष्ठवंशमुभयतः पेशीनिबन्धनार्थं सन्ति। पृष्ठवशंस्य उभयतः पेशीबन्धनार्थं द्वे अन्तः द्वे च बहिः भवति।

८. **स्नायुः** – नवस्नायुशतानि। तासां शाखासु षट्शतानि द्वे शते त्रिंशच्चकोष्ठे ग्रीवा प्रत्यूर्ध्वं सप्ततिः।

सु.शा. ५/२९

**स्नायवः** – ९०० (नवशतम्) भवन्ति।

शाखासु – ६००

मध्यशरीरे – २३०

ग्रीवायाम् – ७०

**स्नायूनां प्रकाराः**

स्नायुश्चतुर्विधा–विद्यात्तास्तु सर्वा निबोध मे।
प्रतानवत्यो वृताश्च पृथव्यश्च सुषिरास्तथा॥
प्रतानवत्यः शाखासु सर्वसन्धिषु चाप्यथ।
वृतास्तु कण्डराः सर्वा विज्ञेया कुशलैरिह।
आमपक्वाशयान्तेषु बस्तौ च शुषिराः खलु।
पार्श्वोरसि तथा पृष्ठे पृथुलाश्च शिरस्यथः॥ (सु.शा. ५/३८, ३९, ४०)

स्नायूनां चत्वारः प्रकाराः भवन्ति (१) प्रतानम् (२) वृत्तम् (३) पृथुलम् (४) सुषिरम्।

(१) प्रतानम् – शाखा, सर्व संधिषु (Ligaments)

(२) वृत्तम् – कण्डरा इति अर्थो ज्ञेयः। (Tendons)

(३) पृथुलम् – पार्श्व, उरप्रदेश, पृष्ठः (Flattened tendons or aponeurosis)

(४) सुषिरम् – आमाशयः पक्वाशय, बस्ति (Sphinter muscles)

**स्नायूनां कार्याणि**

नौर्यथा फलकास्तीर्णा बन्धनैर्बहुभिर्युता
भारक्षमा भवेदासु नृयुक्ता सुसमाहिता
एवमेव शारीरेऽस्मिन् यावन्तः सन्धयः स्मृताः।
स्नायुभिर्बहुभिर्बद्धास्तेन भारसहा नराः॥ (सु.शा. ५/३३-३४)

यथा बहुभिः बन्धनेः युक्ता नौका जले भारं वोढुं समर्था भवति तथा शरीरस्य सर्वाः सन्धयः स्थायुभिर्बद्धाः सन्तः मनुष्यस्य भारं वोढुं समर्थाः भवन्ति।

**स्नायुमहत्त्वम् -**

(१) न ह्यस्थीनि न वा पेश्यो न सिरा न च सन्धयः।
व्यापादितास्तथा हन्युर्यथा स्नायुः शरीरिणाम्॥

(सु.शा. ५/३५)

व्यापादिताः विकृतिगताः स्नायवः शरीरिभ्यः मानवेभ्यः यथा पीडां यच्छन्ति तथा तु अस्थीनि पेश्यः शिराः सन्धयोऽपि न यच्छन्ति।

(२) यः स्नायुः प्रविजानाति बाह्याश्चाभ्यन्तरस्तथा।
स गूढं शल्यमाहर्तुं देहाच्छक्नोति देहिनाम्॥

(सु.शा. ५/३६)

यो हि चिकित्सकः बाह्याः (उतानाः) आभ्यान्तराः (गंभीराः) स्नायून् जानाति सः मानवशरीरस्य गंभीरतमं शल्यं आहर्तुं समर्थो भवति।

**९. पेशी -**

पञ्च-पेशीशतानि भवन्ति। तासां चत्वारि शतानि शाखासु कोष्ठे षट्षष्टिः ग्रीवां प्रत्यूर्ध्वे चतुस्त्रिंशत्॥

पञ्चशतं (५००) पेश्यः भवन्ति तेषु ४०० पेश्यः शाखासु, षड्षष्टिः पेश्य (६६) कोष्ठे, चतुस्त्रिंशत् (३४) पेश्यः ग्रीवायां च भवन्ति।

(सु.शा. ५/४५)

**पेश्याः कार्याणि -**

**सिरास्नाप्वास्थिपर्वाणि सन्धयश्च शरीरिणाम।**
**पेशीभिः संवृतान्यत्र बलवन्ति भवन्त्यतः ॥**

**(सु.शा. ५/४९)**

**यढा शरीरधारिणां सिराः स्नायवः अस्थिपर्वणि सन्धयश्च।**
**पेशीभिः रक्षितानि भवन्ति तदैव बलवन्त्ये भवन्ति॥**

(सु.शा.)

''पेश्यः पुनः स्नाप्वाकृतयो मांसमय्यः'' ॥

इन्दु (अष्टांङ्गसंग्रहः टीका)

**पेश्यः स्नायवश्च आकृतौ समानाः भवन्ति।**
**उभयोः एकमेव भेदं वर्तते। स्नायवः स्नायुमया**
**(Fibrous) पेश्यश्च मांसमय्यः (Fleshy) च भवन्ति।**

**स्त्रीणां विशिष्टाः पेश्यः**

**''स्त्रीणां तु विंशतिराधिका दश तासां स्तनयोरेकैक**
**कस्मिन् पञ्च पञ्चेति यौवने तासां परिवृद्धिः।''** **(सुश्रुतसंहिता शारीरस्थानम्) ५/३९**

स्त्रीषु पुरुषाणामपेक्षया विंशतिपेश्यः अधिकाः भवन्ति। तासु एकैकस्मिन् स्तने पञ्च-पञ्च अर्थात् दश पेश्यः भवन्ति। यौवनावस्थायां तस्य वृद्धिर्भवति।

अपत्यपथे चतस्रः तासां प्रसृतेऽभ्यन्तरतो द्वे, मुखाश्रिते बाह्ये च वृते द्वे, गर्भच्छिद्र संश्रितास्तिस्रः। शुक्रार्तव प्रवेशिन्यस्तिस्त्र एव। (सु.शा. ५/३९)

**गर्भाशयाश्रिताः पेश्यः**

(१) अपत्यमार्गगताः - चतस्रः (४) पेश्यः।

(२) गर्भाशयछिद्रसंश्रिताः तिस्रः (३) पेश्यः

(३) शुक्रार्तवप्रवेशिन्यस्तिस्रः (३) पेश्यः

**पेशी स्वरूपम्**

तासां बहलपेलवस्थूलाणुपृथुवृहस्वदीर्घस्थिरमृदुश्लक्ष्णकर्कशभावाः सन्ध्यस्थिसिरास्नायुप्रच्छादका यथाप्रदेशं स्वभावत एव भवन्ति॥ (सु.शा. ५/५२)

एतासां पेशीनां अस्थि संधि सिरा स्नायु इत्यादीनां आच्छादका बहुलपेलव स्थूल-अणु-पृथु, वृत-ह्रस्व-दीर्घ-स्थिर मृदु श्लक्ष्ण कर्कश आदि भावाः स्थानानुसारमेव स्वाभाविकाः एताः भवन्ति।

**स्वाध्यायः**

**१. बहुवैकल्पिकम् उत्तरं लिखत।**

(१) कूर्चाः कति भवन्ति?

(क)पञ्च (ख) सप्त (ग) षट् (घ) नव

(२) कण्डराः कति भवन्ति?

(क) द्वादश (ख) पञ्चदश (ग) षोडश (घ) विंशतिः

(३) श्रोणीपृष्ठयोः संयोजिकानां अधःप्रान्तस्य प्ररोहं किम्?

(क) नखाः (ख) कण्डरा (ग) बिम्बम् (घ) पिण्डम्

(४) ग्रीवादिस्थानस्य कण्डराणां निवेशः कुतः?

(क) उदराधः (ख) गुह्यप्रदेशे (ग) कर्णे (घ) मेढ्रे

(५) द्वयधीक-अस्थिनां सम्मेलनं किम्?

(क) संघातः (ख) वक्षणम् (ग) गुल्फः (घ) अंशः

(६) सीमन्ताः कति सन्ति?

(क) द्वादश (ख) चतुर्दश (ग) त्रयोदश (घ) पञ्चदश

(७) सन्धयः कैः बद्धास्सनः मनुष्यस्य भारं वोढुं समर्थाः भवन्ति?

(क) स्नायुभिः (ख) अस्थिभिः (ग) पेशीभिः (घ) कण्डराभिः

(८) ग्रीवायां कति पेश्यः भवन्ति ?

(क) ३५ (ख) ३६ (ग) ४० (घ) ३४

**२. प्रश्नानाम् एकेन वाक्येन उत्तराणि लिखत।**

(१) शल्यं कर्तुं कः समर्थो भवति?

(२) आकृतौ के समानाः भवन्ति।

(३) अपत्यमार्गगताः कति पेश्यः?

(४) कुशलैः वृत्ताः किं ज्ञेयाः?

(५) प्रतानवृत्तपृथुलसुषिराणि इति कस्य प्रकाराः ?

**३. अधोलिखितप्रश्नानां लघूत्तराणि लिखत।**

(१) षड्कूर्चाणां स्थानानि दर्शयत?

(२) प्ररोहाः कुत्र लेपिताः भवन्ति?

(३) नखप्ररोहाः अर्थात् किम्?

(४) सीमन्ताः कथं गणनीयाः?

(५) सेवन्यः कुत्र कुत्र भवन्ति?

**४. सविस्तरम् उत्तरं लिखत।**

(१) स्नायूनां प्रकारान् लिखत।

(२) पेशीनां कार्यानि लिखत।

(३) गर्भाशयाश्रिताः पेश्यः।

(४) संघातवर्णनम् क्रियताम्।

**५. यथायोग्यमुत्तरं संयोजयत।**

| अ | ब |
|---|---|
| (१) कण्डराः | (a) ६ |
| (२) कूर्चाः | (b) १६ |
| (३) पेश्यः | (c) ९०० |
| (४) स्नायवः | (d) ५०० |

●

# 4 मृतशरीरसंशोधनम्

अस्मिन् विषये शरीरस्य प्रत्येकं अङ्गप्रत्यङ्गानां रचनाया: ज्ञानमावश्यकमस्ति। तढर्थं मृतशरीरस्य अङ्गच्छेदनं महत्त्वपूर्णमस्ति। मृतशरीरस्य अङ्गच्छेदनं कृत्वा प्रात्यक्षिकं शरीररचनाविषयकं ज्ञानं लभते।

तस्मात् समस्तगात्रमविषोपहतमदीर्घव्याधिपीडितम् अवर्षशतिकं नि:सृष्टान्त्रपुरीषं पुरुषमवगाहन्त्यामापगायां निबद्धं पञ्जरस्थं मुञ्जवल्कलकुशशणादीनामन्यतमेनावेष्टिताङ्गप्रत्यङ्गमप्रकाशे देशे कोथयेत् सम्यग् प्रकुथितं चोद्धृत्य ततो देहं सप्तरात्रादुशीरबालवेणुवल्कलकूर्चानामन्यतमेन शनै: शनै: अवघर्षयंस्त्वगादीन् सर्वानेन बाह्याभ्यन्तरानङ्गप्रत्यङ्ग विशेषान् यथोक्तान् लक्षयेच्चक्षुषा।

आयुर्वेदमतानुसारं शरीरगत अङ्ग-प्रत्यङ्गानां प्रत्यक्षं ज्ञानं प्राप्तुं मृतशरीराङ्गंप्रत्यङ्गानां अङ्गप्रत्यङ्गानां अविकलंतां (विकृतिरहतिम्।) इच्छनीया। यस्य मृत्यु: विषेण न अभवत्। यस्य मृत्यो: पूर्वं दीर्घकालं यावत् व्याधिपीडा नाभवत् यस्यायु: शतवर्षं न स्यात्। यस्य आन्त्रं पुरीषं च निसृष्टं तादृशं मृतशरीरं मन्दगमनयुक्तायां नद्यां निबद्ध्य पञ्चरे संस्थाप्य मुञ्जवल्कलै: कुशै शणादिभि: च अङ्गप्रत्यङ्गानां संवेष्टनं कृत्वा अप्रकाशे स्थले कोथयेत्।

तदनु सप्त-अहोरात्रान्ते कुथितं शरीरं नद्या: बहि: निष्कास्य पिञ्जरात् बहि: आनीय, मुञ्जादिवल्कलानां आवरणं दूरीकृत्य च उशीर-बाल-वेणु-वल्कल-कूर्चासु एकया कूर्चया अघर्षयन् त्वचादिबाह्याभ्यन्तर-अङ्ग-प्रत्यङ्गानि चक्षुषा पश्येत्।

**॥ मृतशरीरशोधनमहत्त्वम् ॥**

**तस्मान्नि:संशयं ज्ञानं हर्त्रा शल्यस्य वाञ्छता।**
**शोधयित्वा मृतं सम्यग्दृष्टव्योऽङ्गविनिश्चय:** **सु.शा.5/47**

शल्यशास्त्रे मृतशोधनस्य अत्यधिकं महत्त्वं वर्तते। अत: शल्यतन्त्रस्य ज्ञानंवाञ्छता जनेन मृतशरीरस्य सम्यग् शोधनं कृत्वा अङ्ग-प्रत्यङ्गानाम् अवलोकनं कर्तव्यम्।

**प्रत्यक्षतो हि यदृष्टं शास्त्रदृष्टं च यद्भवेत्।**
**समासतस्तदुभयं भूयो ज्ञानविवर्धनम्॥** **सु.शा.5/48**

शास्त्रज्ञानेन सह प्रत्यक्षज्ञानस्यापि महत्त्वं वर्तते। यत् ज्ञानं प्रत्यक्षं शास्त्रोक्तं च स्यात् तत् द्विर्बद्धं सुबद्धमिति न्यायेन अधिकं ज्ञानवर्धकं प्रामाणिकं च भवति।

**अर्वाचीनमतानुसारं मृतशरीररसंग्रहणम्**

**मृतशरीररक्षणाय (Preservation of Cadaver)**

प्रायश: रसायणानां प्रयोग: क्रियते।

| | रसायणम् | मात्रा (परिणाम्) |
|---|---|---|
| (1) | जलम् (water) | 4 Litre |
| (2) | फॉर्मेलिन-रसायणम् (Formaline) | 3 Litre |
| (3) | ग्लिसरिन-रसायणम् (Glycerine) | 4 Litre |
| (4) | कार्बोलिक एसिड् रसायणम् (Crbolic acid) | 1 Litre |
| | | 10 |

**पद्धति**

मृतशरीरस्य सक्थिप्रदेशात् ऊर्ध्वभागे मध्यभागे च 6 से.मी. भागं संत्यज्य त्वचः गंभीरकलायाश्च अनावरणं कृत्वा तदनु और्वीधमन्याः (femoral artery) ऊपरि लघुछिद्रमेकं कृत्वा सप्रमाणं सज्जीकृतं रसायणमिश्रणं और्वीधमन्या-धारेण'' एंबाल्मिंग यंत्रे (Embalming machine) यंत्रमाध्यमेन शरीरे प्राविशेत्। रासायणिकप्रवेश क्रियान्ते धमनीनिबीडनं कृत्वा शरीरं फोर्मेलिन-रसायणयुक्ते कोष्ठस्थाने स्थापयेत्।

मृतशरीररक्षणाय ग्रीवाप्रदेशस्य मातृकाधमन्याः (Internal Carotid artery) उपयोगोऽपि भवति। अनया रासायणिक-पद्धत्या मृतशरीरसंरक्षणेन तस्मिन् कोथनं न भवति परं च तस्य उपयोगः मृतशोधने बहुवर्षाणि यावत् कर्तुं शक्यते।

**स्वाध्यायः**

**1. बहुवैकल्पिकप्रश्नानां योग्यम् उत्तरं चिनुत।**

(1) शरीररक्षणार्थं कस्याः वनस्पतेः उपयोगः भवति ?

(क) मुञ्जस्य (ख) वल्कलस्य (ग) कुशस्य शणस्य च (घ) उपरोक्तानां सर्वेषाम्

(2) मृतशरीरस्य रक्षणार्थं मृतदेहं कति दिनानि नद्यां स्थापनीयम् ?

(क) 6 (ख) 7 (ग) 8 (घ) 9

(3) मृतशरीरस्य शोधनार्थं घर्षणक्रियायां कस्याः वनस्पतेः उपयोगः भवति ?

(क) उशीरम् (ख) वेणुः (ग) वल्कलम् (घ) पूर्वोक्तानि सर्वाणि

(4) मृतशरीररक्षणार्थं प्रमुखत्वेन कस्य रसायणस्य उपयोग भवति ?

(क) सल्फ्युरिक एसिड् (ख) फोर्मेलिन्

(ग) ॲसिडिक ॲसिड् (घ) सोडा बाय कार्बोनेट्

(5) मृतशरीररक्षणार्थं शरीरे रसायणप्रवेशाय कस्याः धमन्याः उपयोगः भवति ?

(क) और्वीधमनी (femoral artery) (ख) बाह्वी धमनी (Braechial artery)

(ग) कक्षाधरधमनी (Axillary artery) (घ) उदरा महाधमनी (Abdominal artery)

(6) अर्वाचीनमते शरीररक्षणार्थं कियत् जलं युज्यते ?

(क) 5 Litre (ख) 6 Litre (ग) 3 Litre (घ) 4 Litre

(7) शरीररक्षणार्थं कियत् ग्लिसरिन् (Glycerine) आवश्यकम् ?

(क) 2 Litre (ख) 4 Litre (ग) 1 Litre (घ) 3 Litre

**2. प्रश्नानाम् एकेन वाक्येन उत्तराणि लिखत।**

(1) 'समस्तगात्रम्' इत्यस्य अर्थः कः ?

(2) मृतशरीररक्षायै तस्य लेपनं काभिः वनस्पतिभिः कर्तव्यम् ?

(3) मृतशरीरविच्छेदनाय कस्याः वनस्पतेः उपयोगः क्रियते ?

(4) शरीररक्षणार्थं फार्मेलिन-रसायणस्य परिमाणं कियत् भवति ?

(5) मृतशरीरे रसायणप्रवेशाय कस्या: धमन्या: उपयोग: भवति ?

**3. अधोलिखितप्रश्नानां लघूत्तराणि लिखत।**

(1) मृतशोधनस्य महत्त्वं लिखत।

(2) शास्त्रज्ञाने प्रत्यक्षज्ञानस्य किं महत्त्वम् ?

(3) मृतशरीररक्षायै उपयुक्तानां रसायणानां नामामि लिखत ?

(4) 'नि:सृष्टान्त्रपुरीषम्' इत्यस्य कोऽर्थ: ?

**4. सविस्तरम् उत्तरं लिखत।**

(1) आयुर्वेदानुसारं मृतशरीरशोधनपद्धतिं स्पष्टयत।

(2) आधुनिकमतानुसारं मृतशरीररक्षणपद्धतिं दर्शयत।

**5. यथायोग्यमुत्तरं संयोजयत।**

| रसायणम् | मात्रा ( परिमाणम् ) |
|---|---|
| (1) Glycerine | 2 Litre |
| (2) Corbolic acid | 4 Litre |
| (3) Formaline | 3 Litre |
| (4) Water | 1 Litre |

●

# ५ गर्भशारीरम्

**गर्भस्य परिभाषा** – वंशपरम्परायाः हेतुतः ऋतुकाले स्त्रीपुरुषयोः समागमत्वात् गर्भाशये शुक्रशोणितसम्मेलनेन आत्मा स्वकीयशुभाशुभकर्मणा सह प्रविशति। एतत् स्वरूपं गर्भः कथ्यते।

**गर्भव्याख्या**

(१) शुक्रशोणितं गर्भाशयस्थमात्मप्रकृतिविकारसम्मूर्च्छितं गर्भ इत्युच्यते। (सु.शा. ५/७)

अर्थात् गर्भाशये स्थितात्मा प्रकृतिविकारैः युक्तं शुक्रं शोणितं च गर्भः कथ्यते।

(२) शुक्रशोणितजीवसंयोगे तु खलु कुक्षिगते गर्भसंज्ञा भवति। (च.शा. ४/६)

अर्थात् गर्भाशये शुक्रमार्तवजीवानां यस्मिन् काले संयोगः भवति तदा गर्भाभिधानेन ख्यातिं प्राप्नोति। गर्भोऽयं पृथिवी-जल-तेज-वायु-आकाश इत्याख्यानां पञ्चमहाभूतानां विकारोऽस्ति। एवञ्च चेतनायाः आश्रयभूतोऽस्ति।

**शुद्धशुक्रलक्षणम्**



(१) ''स्फटिकाभं द्रवं स्निग्धं मधुरं मधुगन्धि च।

शुक्रमिच्छन्ति केचित्तु तैलक्षौद्रनिभं तथा॥'' (सु. शा. २/११)

स्फटिकसमानं श्वेतद्रवं स्निग्धं मधुरं मधुसमानं गंधयुक्तं तरलस्वरूपं च शुक्रं भवति। केचन विद्वांसः शुक्रं तैलनिभं क्षोद्रनिभं च मन्यन्ते। परञ्च गर्भाधानयोग्यं शुक्रं ''सौम्यस्निग्धश्वेतमधुगन्धिपिच्छिलबहलघृततैलमधुवत् भवति इति। स्फटिकघृतसदृशेन शुक्रेणोत्पन्नौ बालः गौरवर्णः भवति। तैलवर्णेन कृष्णवर्णः, मधुवर्णेन श्यामवर्णः बालकः समुत्पद्यते।

(२) बहलं मधुरं स्निग्धमविस्रं गुरुपिच्छिलम्।

शुक्लं बहु च यच्छुक्रं फलवत्तदसंशयम् ॥ (च. चि. २/५०)

संतानोत्पादकं शुक्रं बहलं, रसे मधुरं, गुणे स्निग्धं, दुर्गंधरहितं गुरुपिच्छिलं, वर्णे शुक्लं तथा स्त्रावसमयऽाधकमात्रान्वितं फलयुक्तं शुक्रं भवति। तेन संततेरुत्पत्तिर्जायते।

**आर्तववर्णनम्**

शरीरक्रियादृष्टौ स्त्रीषु प्रतिमासम् आर्तवस्त्रावः भवति सः गर्भधारणस्य क्षमतां प्रकटयति वा तस्य चिह्नमस्ति। तं रजोऽपि कथ्यते। रजोदर्शनस्य अवधिः आयुर्देशकालजातिव्यक्तिविहाराहारप्रकृत्याधारिताऽस्ति। ग्रीष्ममयभारतप्रदेशे १२ तः १४ वर्षायुषि रजोदर्शनं भवति। शीतलमयदेशेषु १५ तः २० वर्षायुषि रजोदर्शनं भवितुमर्हति।

रजोदर्शनेन सह स्त्रीषु शारीरिकपरिवर्तनमपि द्रष्टुं शक्यते।

(१) बाह्यप्रजननाङ्गानां वृद्धिः

(२) श्रोणी विकासः

(३) कुक्षभगादिप्रदेशेषु केशवर्धनम्

(४) स्तनविकासः

(५) मानसिकपरिवर्तनम् – लज्जाकामवासनेत्यादि:

गर्भधारणवत्याः स्त्रियः आयुः षोडशवर्षाणि मन्यते। किन्तु आधुनिकविज्ञानदृष्टया विंशतिवर्षाणि मन्यत इति। तत्कारणमस्ति यत् विंशतितमे वर्षे शरीराङ्गानां वृद्धिः विकासञ्च सम्यक् भवति। गर्भाधानाय शुद्धार्तवस्यावश्यकता वर्तते।

**शुद्धार्तवस्य लक्षणम् –**

**''शशासृक्प्रतिमं यत्तु यद्वा लाक्षारसोपमम्।**

**तदार्तवं प्रशंसन्ति यद्वासो न विरञ्जयेत्॥'' ( सु.शा. २/१७ )**

शशकरेंक्तसमानं, लाक्षारससमानं, वस्त्रोपरि चिह्नं न भवति तदार्तवं शुद्धार्तवं भवति।

**प्रमाणम् – नैवातिबहुनात्यल्पमार्तवं शुद्धमादिशेत् इति।**

सर्वासु स्त्रीषु प्रमाणं विभिन्नं वर्तते। अतः आयुर्वेदे नाधिकं न स्वल्पं प्रमाणं प्रदत्तमस्ति।

आधुनिकविज्ञानमपि ३०-५० मिली मन्यते स्वीक्रियते च।

(The total quantity of blood lost at each monthly period varies from ३०-५० ml)

**स्रावावधिः**

**( १ ) रक्तमेव स्त्रीणां मासे-मासे गर्भकोष्ठमनुप्राप्य त्र्यहं प्रवर्तमानमार्तवमाहुः ( अष्टाङ्गसंग्रहः )**

**( २ ) दिनत्रयं प्रवृत्तिश्च कुरुते शोणितं स्त्रियाः। पञ्चरात्रानुबन्धि च ( चरकः )**

अनेन प्रमाणेन त्रिर्वापञ्चदिनयावत् स्रावस्य कालः वर्तते। प्रतिमासे पीडारहितः स्रावः भवति। एवञ्च पञ्चाशत्वर्षपर्यन्तं स्रावकालावधिः दर्शितास्ति।

**अन्तःपुष्पम्** – आधुनिक मते स्त्रीणामार्तवस्य भागद्वयं वर्तते। (१) बहिःपुष्पम् (२) अन्तःपुष्पमिति।

बहिःपुष्पम् अर्थात् प्रति मासं गर्भाशयात् योनिमार्गात् निर्गच्छत् रक्तस्रावः तद्रजोस्रावः वा आर्तवः कथ्यते। रजोस्रावानन्तरे काले गर्भाशयः गर्भधारणसक्षमः भवति।

अन्तःपुष्पं शोणितं वार्तवः कथ्यते। शोणितं स्त्रीबीजमपि कथितुं शक्यते। पुरुषेषु यथा शुक्रोत्त्पत्तिहेतवे तद्ग्रन्थिद्वयं भवति, तथैव स्त्रीषु गर्भाशयस्य वामभागे एवञ्च दक्षिणविभागे बीजग्रन्थिः भवति। बीजमिदं युवावस्थायां परिपक्वीभूय बीजग्रन्थ्याः बीजकोषभित्तिकां विभेद्य बहिः आगच्छति।



**परिपक्वस्त्रीबीजम्**

सामान्यतः प्रतिमासं एकमेव बीजं परिपक्वीभूय कोषात् बहिः आगच्छति। तं बीजविपाकं (Ovulation) कथयति।

बीजकोषात् बहिरागतं बीजं बीजवाहिन्यां प्रविशति। तत्र शुक्रस्य संयोगेन गर्भोत्पत्तिः भवति। अर्थात् अन्तःपुष्पात् गर्भस्योत्पत्तिर्भवति। आर्तवस्य एतत् प्रकारं विवरणं आयुर्वेद न लक्ष्यते।

**गर्भाधानम्**

शुद्धशुक्रवतः पुरूषस्य शुद्धार्तवत्याः स्त्रियः ऋतुकाले सहवासे सति शुक्रशोणितयोः सम्मेलनमेव गर्भाधानं कथ्यते। आधुनिकदृष्ट्या संयोगोऽयं बीजवाहिनीमध्येऽथवा गर्भाशये भवति। गर्भाधाने एकः एव शुक्राणुः पर्याप्तोऽस्ति किन्तु गर्भाशयेऽनेके शुक्राणवः प्रविशन्ति। किन्तु तत्रापि प्रबलशुक्राणोः शोणितस्य च मेलनेन गर्भस्य प्रादुर्भावं भवति।

**चरकमतानुसारं** – वायुः जीवं शुक्रेण सह गन्तुं प्रेरयति एवं तत्पश्चात् स्त्रीशोणितेन सह मिलित्वा गर्भस्थापनां करोति। अन्यसंहिताकाराणां दृष्ट्या शुक्रशोणितं विहाय तृतीयं लिङ्गशरीरं भवति। तत् गर्भाशये यदा प्रविशति तदा तन्नावलोक्यते।

**सौम्यं शुक्रमार्तवमाग्नेयमितरेषामप्यत्र भूतानां सान्निध्यमस्त्यणुना विशेषेण, परस्परोपकारात्परस्परानुग्रहात्परस्परानु प्रवेशाच्च। ( सु.शा. ३/२ )**

शुक्रं सौम्यम् आर्तवं च आग्नेयं भवति। किन्तु पञ्चभूतानां परस्परोपकारः अनुग्रहः च अस्ति अतः जल–अग्नि–अतिरिक्तानां भूतानामपि अत्र अल्पामात्रायां विशिष्टं सान्निध्यमस्ति।

**तत्र स्त्रीपुंसयोः संयोगे तेजः शरीराद्वायुः उदीरयति। ततस्तेजोनिलसन्निपाताच्छुक्रं च्युतं योनिमभिप्रतिपद्यते संसृज्यते चार्तवेन, ततोऽग्नीषोमसंयोगात् संसृज्यमानो गर्भो गर्भाशयमनुप्रतिपद्यते। ( सु. शा. ३/३ )**

स्त्रीपुरुषयोः समागमकाले वायुः शरीरात् तेजः प्रकटयति, तदनु तेजः वायुसंयोगेन क्षरितं शुक्रं योनिं प्रविशति तथा आर्तवेन सह संयुज्य अग्निसोमाभ्यां उत्पन्नः गर्भः गर्भाशयस्य आश्रयं करोति।



**शुक्रर्तव संयोगः**

शुक्रशोणितयोः संयोगे यः दोषः प्रबलः भवति तेनैव पुरूषस्य प्रकृत्युत्पत्तिः भवति।

**पश्चमहाभूतस्य गर्भविकास सम्बन्धः -**

तं चेतनावस्थितं वायुर्विभजति। तेजः एनं पचति।

आपः क्लेदयन्ति। पृथ्वी संहन्ति। आकाशं विवर्धयति'' (सु.शा.५/३)

शुक्रार्तवयोः संयोगानन्तरं चेतनायुक्तं गर्भबीजं वायुः विभिनक्ति। तेजसा तत्परिपक्वं भवति। जलमहाभूतद्वारा तस्मिन् क्लिन्नतासमुत्पद्यते। पृथ्वीमहाभूतेन संहननं मिलति। आकाशेन तस्य वर्धनं भवति।

**गर्भसंभवसामग्रयः**

**ध्रुवं चतुर्णां सान्निध्यात् गर्भः स्याद् विधिपूर्वकम्।**

**ऋतुक्षेत्राम्बुबीजानां सामग्र्याद् अङ्कुरो यथा॥** (सु.शा.३/३३)

यथा चतुर्णां ऋतुक्षेत्रजलबीजानां सान्निध्यात् अंकुरं निश्चयेन विधिपूर्वकम् उत्पन्नं भवति तथा ऋतु-क्षेत्र-जल-बीजानां चतुर्णां सान्निध्यात् गर्भोऽपि निश्चयेन विधिपूर्वकं उत्पद्यते।

**बीजम्, बीजभागः, बीजभागावयवः**

यस्य यस्य अवयवस्य बीजे बीजभाग उपतप्तो भवति। तस्य तस्य अवयवस्य विकृतिरुपजायते नोपजायते चानुपतापात्

(च.शा. ३/१७)

**''मानवात् मानवोत्पत्तिर्विवेचनम् -''**

श्लोके उक्तं यत् यदि मानवात् मानवस्य उत्पत्तिर्भवति तर्हि मूर्खात्, अन्धात् बधिरात् च समानरूपी सन्ततिः कथं भवति इति विषये प्रतिपाद्यते। यस्य यस्य अङ्गप्रत्यङ्गानां बीजांशः दूषितः भवति तस्य तस्य अङ्गप्रत्यङ्गानां विकारोत्पत्तिः भवति। यदि बीजांशः दूषितः न भवति तर्हि एकस्मिन्नपि अंगे विकारः न भवति। उक्तकारणैः विकृताङ्गगर्भस्य उत्पत्तिः अविकृतांगगर्भस्य उत्पत्तिः उभयोः समर्थनं स्पष्टम्। अर्थात् अन्धस्य, मूकस्य, बधिरस्य च उत्पत्तौ बीजांशः कारणभूतः परं सर्वांगपरिपूर्णस्य उत्पत्तावपि बीजं कारणभूतं भवति। सर्वाणि इन्द्रियाणि आत्मजानि सन्ति। तेषां बलवत्ता दुर्बलता च दैवकृतास्ति अर्थात् पूर्वजन्मकृत-कर्माधीनास्ति। अतः पितृभ्यां उत्पन्नः गर्भः सदैव न मातापितानुरूपो भवेदिति। अर्थात् बहुधा गर्भः मातापितानु रूपो भवति, कदाचित् न भवति इति।

**( ६ ) गर्भवृद्धिक्रमः**

**प्रथममासः** - ऋतुकाले शुक्रशोणितयोः संयोगे सति एकरात्रिः यावत् कललं (Morula) स्वरूपं धारयति।

- ''तत्र प्रथममासि कललं जायते'' (सु.शा. ३/१८)
- प्रथमरात्रौ कललस्वरूपं धारयति।
- सप्तरात्रौ बुद्बुदावस्थायां भवति।
- पञ्चदशदिने पिण्डस्वरूपं भवति।
- पञ्चविंशतितमे दिने पञ्चमहाभूतैवञ्चात्मनः संयोगः भवति।
- प्रथममासे पिण्डं पञ्चपक्षात्मकपूर्णं स्वरूपं प्राप्नोति।

**द्वितीयमासः – ''द्वितीये शीतोष्मानिलैरभिप्रपच्यमानानांमहाभूतानां संघातो घनः संजायते।''** द्वितीयमासे गर्भः शीतोष्मा अर्थात् वातादिदोषैः परिपक्वं भूत्वा पञ्चमहाभूतमयं घनरूपं भवति। गर्भोऽयं पिण्डाकारस्य भवति तदा पुरुषः, पेश्याकारस्य भवति तदा स्त्री एवं अर्बुदाकारस्य भवति तदा नपुंसकः भवति।



**तृतीयमासः – ''तृतीये हस्तपादशिरसा पञ्चपिण्डका निर्वर्तन्ते''** तृतीये मासे हस्तद्वयं, पादद्वयं, शिरश्च पञ्चाकाराः दृश्यन्ते। मासेऽस्मिन् गर्भः ३ (इंच) लम्बमापः भवति। अन्यान्यङ्गानि स्पष्टस्वरूपाणि न भवन्ति। अस्मिन्नेव मासे जननेन्द्रियस्यापि विकासः भवति। तेन सामान्यतया लिङ्गभेदः ज्ञातुं शक्यते।

**चतुर्थमासः – ''चतुर्थे सर्वांगप्रत्यङ्गविभागः प्रव्यक्ततरो भवति।''** अस्मिन् मासे अङ्गप्रत्यङ्गानां विभागः स्पष्टः भवति। अस्मात् मासतः माता द्विहृदयिनी कथ्यते। तत्कारणमस्ति गर्भस्थ शिशोः अपि स्वयं हृदयं कार्यरतं भवति। मासेऽस्मिन् गर्भस्य लम्बमापः १५ सेमी भवति। अस्मिन् मातुरीच्छा परिपूर्ततेस्य कारणमस्ति यत् गर्भाहारेच्छां करोति। यदि परिपूर्तिः न भवति तदा गर्भेऽस्मिन् विकृतिः समायाति। गर्भस्य विकासः शीघ्रतया भवति अतः पौष्टिकाहारः प्रदेयः भवति।

**पञ्चममासः – ''पञ्चमे मनः प्रतिबुद्धत्तरं भवति''** अत्र – मनोऽतिप्रबुद्धं भवति। अनेनैव कारणेन माता गर्भस्य गतिशीलतायाः अनुभवं करोति। आधुनिक मते गर्भस्य शिरसि केशाः समुद्भवन्ति। अस्मिन् मासेः गर्भस्य मानः लम्ब २३ से.मी. भवति।

**षष्ठमासः – ''षष्ठे बुद्धिः''** अस्मिन् मासे बुद्धिविकासः भवति। त्वचि वसासञ्चयः भवति। एवञ्च नेत्रपक्ष्मभ्रुवामुत्पत्तिः भवति। मासेऽस्मिन् ३० से.मी. लम्बमापः गर्भः भवति।

**सप्तममासः – ''सप्तमे सर्वांगप्रत्यङ्गविभागः प्रव्यकततरः''** अस्मिन् मासे सर्वाङ्गानि विशेषतया स्पष्टीभवन्ति। नेत्रोन्मेलनं भवति। गर्भः मानवस्वरूपे समायाति परिणमति च। ३५ से.मी. लम्बमानस्य गर्भस्य भारः १.५ कि.ग्रा. भवति। जीवोऽयं जीवितुं सक्षमः भवति। तस्मादेव सप्तममासे जन्म भवति सः जीवितुं समथः भवति।

**अष्टममासः – ''अष्टमेऽस्थिरीभवत्योजः''** मासेऽस्मिन् ओज अस्थिरम् भवति। तस्मात् कारणात् अष्टमे मासे प्रसुंत शिशुः जीवतिवा नवा गर्भस्य लम्बमानः ५० से.मी. भवति।

**नवममासः दशममासः च –**

**''नवमदशमैकादशद्वादशानामन्यतमस्मिन् जायते''** नवमे, दशमे, एकादशे द्वादशे वा कस्मिन्नपि मासे प्रसवः भवति। यतो हि निर्माणप्रक्रिया परिपूर्णा भवति अतः गर्भः बहिरागन्तुं सज्जः भवति। गर्भस्य भारः २ त २.५ कि.ग्रा. भवति। गर्भावस्था आधुनिकमते नवमासस्य भवति।



**गर्भोत्पादकभाव :** – गर्भोत्पद्यमानाः भावाः षड् सन्ति। एतैर्भावैः गर्भस्य विभिन्नावयवानां निर्माणं भवति। गर्भोत्पत्ति–हेतवे–मातृपितृजादिषड्भावाः कारणभूताः सन्ति।

**मातृजादिषड्भावैरवयवोत्पत्तिः**

(१) **मातृजभावः** – त्वक्रक्तमांसमेदनाभियकृतप्लीहाफुफ्फुसवृक्कबस्तिपुरूषाधानामाशयपक्वाशय स्थूलांत्रवसादीनां सर्वेषां कोमलावयवानां समुद्भवः मातृजभावेन सम्भवति।

(२) **पितृजभावः** – केशश्मश्रुनखरोमास्थिसिरास्नायुधमनीशुक्रादिकठिनावयवानां समुद्भवः पितृजभावेन सम्भवन्ति।

(३) **आत्मजभावः** – चरकमतानुसारं गर्भेऽस्मिन् आयुराआत्मज्ञानमनेन्द्रियप्राणापानप्रेरणाधारण तथा स्वरवर्णाकृतिषु विशेषता सुखदुःखेच्छद्वेषधृतिबुद्धिस्मृत्यहंकारप्रयत्नादर्यः–आत्मजभावाः वर्तन्ते।

(४) **सात्म्यजभावः** – चरकानुसारम्आरोग्यस्फूर्तिलोलुपताइन्द्रियप्रसन्नतास्वरवर्णवीर्यारोग्यबलादयः सात्म्यजभावाः विद्यन्ते।

(५) **रसजभावः** – गर्भवृद्धिप्राणानुबन्धतृप्तिपुष्टिस्थितिहान्युत्साह–उपचयादयः रसजभावाः सन्ति।

(६) **सत्त्वजभावः** – चरकानुसारं भक्तिशीलशौचद्वेषस्मृतिमोहत्यागशौर्यमात्सर्यभयक्रोधतीक्ष्णता–मृदुतागांभीर्यतादयः सत्त्वजभावाः विद्यन्ते।

**गर्भपोषणम्**

यथामातुस्तु खलु रसवहायां नाड्यां गर्भनाभिनाडीप्रतिबद्धा, साऽस्य मातुराहारवीर्यरसमभिवहति। तेनोपस्नेहेनास्य अभिवृद्धिर्भवति। (सु.शा. ३/३१)

मातुः रसवाहिनीनाडी गर्भस्य नाभिनाड्या सह संयुक्ता भवति। नाभिनाडीयं मातुराहाररसवीर्याणि गर्भं प्रति प्रेरयति तेन उपस्नेहेन गर्भस्याभिवृद्धिः भवति। गर्भाधानसमयात् अपरिणतांङ्गप्रत्यङ्गप्रविभागयुक्तस्य गर्भस्य सर्वशरीरावयवानुसारी रसवहतिर्यग्गामी धमनी इत्यस्य उपस्नेहः एव जीवनं प्रददाति।



गर्भस्य खलु रसनिर्मित्तामारूताध्माननिर्मित्ता च परिवृद्धिर्भवति ॥

''तस्यान्तरेण नाभेस्तु ज्योतिः स्थान ध्रुवं स्मृतम् ।

तदाधमति वातस्तु देहस्तेनास्य वर्धते ॥ (सु.शा.४/५८)

वास्तविकत्वेन गर्भस्य परिवृद्धिः मातुः आहाररस्य रसकारणात् वायु–आध्मानकारणात् भवति। श्लोके उक्तं गर्भस्य नाभ्वन्तरेण उदरगुहायाम् अग्निस्थानं निश्चयेन भवति। वायुः अग्निं प्रध्मापनेन प्रदीपयति येन शरीरं परिवर्धितं भवति। तस्मात् ज्योतिस्थानात् उत्पन्नः वायुः गर्भस्य मांसलपिण्डस्य प्रध्मापनेन यथा परितः स्रोतसां विदारणं करोति तथा गर्भस्य वृद्धिः भवति।

**अपरानिर्माणम्**

गृहितगर्भाणामार्तववहानां स्रोतसां वर्त्मान्यवरूध्यन्ते गर्भेण, तस्माद् गृहीतगर्भाणामार्तवं न दृश्यते। ततस्तदधः प्रतिहतमूर्ध्वमागतमपरं चोपनीयमानमपरेत्यभिधीयते शेषं चोध्वतरमागतं पयोधरावभिप्रतिपद्यते, तस्माद् गर्भिण्यः पीनोन्नतपयोधरा भवन्ति। (सुश्रुत संहिता)

गर्भवतीनाम् आर्तववहस्त्रोतसां मार्गः गर्भद्वारा पिहितः भवति। अतः गर्भाधाने सति गर्भवतीनाम् आर्तवस्त्रावः न भवति। यदा आर्तवस्त्रावः न भवति तदा अधोगतं, ऊर्ध्वगतम्, उत्तरकाले परिवर्धितं च आर्तवम् अपरा नाम्ना ज्ञायते। शेषम् आर्तवं इतोऽपि ऊर्ध्वं गत्वा स्तनयोः याति येन गर्भवतीनां स्तनवृद्धिः भवति।

**नाभिनाडीनिर्माणम्**

मातुस्तु खलु रसवहायां नाड्यां गर्भनाभिनाडी प्रतिबद्धा साऽस्य मातुराहाररसवीर्यमभिवहति। तेनोपस्नेहेनास्य अभिवृद्धिर्भवति। असञ्जाताङ्गप्रत्यङ्गप्रविभागमानिषेकात् प्रभृति सर्वशरीरावयवानुसारिणीनां रसवहानां तिर्यग्गतानां धमनीनामुपस्नेहः जीवयति। (सुश्रुत संहिता)

मातुः रसवहानाड्या सह नाभिनाडी बद्धा भवति। सा नाभिनाडी मातुः आहारं रसं वीर्यं (शक्तिं) गर्भं प्रति प्रापयति। तेनोपस्नेहेन गर्भस्य अभिवृद्धिः भवति। गर्भाधानकालात् अपरिणताङ्गप्रत्यङ्गप्रविभागेभ्यः सर्वशरीरावयवनुसारीणं रसवहं तिर्यग्गामी धमनीनाम् उपस्नेहेन जीवनं ददाति।




**(अ) गर्भपोषणं, गर्भस्य आभुग्न स्थिती दर्शक ५ वा ६ मासस्य गर्भ**




**(ब) अपरा व गर्भनाभी नाडी**

**आयुर्वेद मतानुसारण :**

| **अवयवनाम** | **अवयवोत्पत्तिः** |
|---|---|
| (१) यकृत्, प्लीहा | रक्तप्रसादात् |
| (२) फुप्फुसः | रक्तफेनप्रसादात् |
| (३) उण्डुकः | रक्तकीट्टात् |
| (४) आन्त्रम्, गुदा, बस्ति | कफरक्तयोः प्रसादभागस्य पित्तेन पाचने सति। |
| (५) जिह्वा | कफरक्तमांसप्रसादात् |
| (६) स्त्रोतसः | पित्तयुक्तवायुप्रयोजनानुसारं स्त्रोतसाम् उत्पत्तिं करोति। |
| (७) पेशी | पित्तयुक्तवायुमांसे प्रविशन् पेशीनाम् उत्पत्तिं करोति। |
| (८) सिरा, स्नायुः | मेदस्य स्नेहभागं पृथक् सन् सिरास्नायुम् उत्पादयति। |
| (९) वृक्कम् | रक्तमेदप्रसादात्। |
| (१०) वृषणम् | मांसरक्तकफमेदप्रसादात्। |
| (११) हृदयम् | रक्तकफप्रसादात्। |

**गर्भाशये गर्भस्थितिः**

स्त्रियः गर्भाशये गर्भः संकुचिताङ्गः अभिमुखश्च सन् स्थाति। प्रसवकाले स्वभावादेव शिरसः बलात् योनिं प्रति याति।

तत्र तेजोधातुः सर्ववर्णानां प्रभवः, स यदा गर्भोत्पत्तौ अब्धातुप्रायः भवति तदा गर्भं गौरं करोति, पृथिवीधातुप्रायः कृष्णं, पृथिव्याकाशधातुप्रायः कृष्णश्यामं तोयाकाशधातुप्रायो गौरश्यामम्। यावत्वर्णमाहारमुपसेवते गर्भिणी तावत्वर्णप्रसवा भवति इति एके भाषन्ते।

पंञ्चमहाभूतेषु तेजो धातुः सर्ववर्णानाम् उत्पत्तौ हेतुभूताः।

| **वर्णः** | **पञ्चमहाभूतप्राधान्यम्** |
|---|---|
| (१) गौरः | जलम् |
| (२) कृष्णः | पृथ्वी |
| (३) कृष्णश्यामः | पृथिवी, आकाशम् च |
| (४) गौरश्यामः | जलम्, आकाशम् च |



**गर्भवर्णोत्पत्तिः**

**गर्भवृद्धिकरभावाः**

कात्स्र्येन गर्भवृद्धिकराः इमे भावाः भवन्ति।

तद्यथा-कालयोगः, स्वभावसंसिद्धिः, आहारसौष्ठवम् अविघातश्चेति ॥ च.शा. ६/१२॥

संपूर्णतया गर्भवृद्धिकराः एते भावाः सन्ति।

ते इत्थं वर्तन्ते।

(१) कालयोगः – गर्भस्य मासानुमासिक वृद्धिः कालाधारेण भवति इति कालयोगः।

(२) स्वभावसंसिद्धिः - प्राकृतरूपेण शरीरस्य वृद्धिः एनमेव अदृष्टमित्यपि कथ्यते।

(३) आहारसौष्ठवम् - आहारसम्बद्धानाम्- आदेशानाम्
उपदेशानां विधीनां च समयोगः आहारसौष्ठवम्।

(४) अविघातः - शरीरवृद्धौ बाधकभावानामयोगः अतियोगः मिथ्यायोगश्च मा भूः इति अविघातः।

**स्वाध्यायः**

**१. बहुवैकल्पिकप्रश्नानां योग्यम् उत्तरं चिनुत।**

(१) ''सौम्यः'' इति कस्य गुणोऽस्ति?

(क) आर्तवस्य (ख) शुक्रस्य (ग) गर्भस्य (घ) क, ख उभौ

(२) गर्भोत्पादकवस्तुषु क्षेत्रं इति कस्य संबद्धम्?

(क) शुक्रस्य (ख) आर्तवस्य (ग) गर्भाशयस्य (घ) जलस्य

(३) अधस्तनेषु गर्भवृद्धिकरभावः नास्ति।

(क) कालः (ख) स्वभावसंसिद्धिः (ग) आहारसौष्ठवम् (घ) बीजम्

(४) हृदयोत्पत्तिः कस्मिन् मासे भवति?

(क) प्रथमे (ख) तृतीये (ग) चतुर्थे (घ) षष्ठे

(५) बद्धेरुत्पत्तिः कस्मिन् मासे दर्शिता?

(क) चतुर्थे (ख) पञ्चमे (ग) षष्ठे (घ) सप्तमे

(६) शोणितफेनप्रभवः कः?

(क) हृदयम् (ख) फुप्फुसः (ग) वृक्कः (घ) उण्डुकः

(७) पुण्डरीकेण संदृशं केनावयवेन संबद्धितम्?

(क) प्लीहायाः (ख) हृदयेन् (ग) वृषणेन (घ) बस्तिना

(८) जलधातुप्रधानातयाः कारणात् गर्भवर्णः ______ भवति।

(क) गौरः (ख) कृष्णः (ग) कृष्णश्यामः (घ) गौरश्यामः

**२. प्रश्नानाम् एकेन वाक्येन उत्तराणि लिखत।**

(१) गर्भः कललस्वरूपं कस्मिन् मासे प्राप्नोति?

(२) गर्भव्याख्यां लिखत।

(३) आर्तवस्रावमर्यादां स्पष्टयत।

(४) गर्भाशये गर्भस्य प्राकृतस्थितेः वर्णनं कुरूत।

(५) मनसः उत्पत्तिः कस्मिन् मासे भवति?

**३. अधोलिखितप्रश्नानां लघूत्तराणि लिखत।**

(१) पञ्चमहाभूतानां गर्भविकासे योगदानं स्पष्टीकुरुत।

(२) दौहद संकल्पनां लिखत।

(३) शुक्रार्तवयोः शुद्धस्वरूपवर्णनं कुरुत।

(४) सप्तममासस्य गर्भस्थितिवर्णनं कुरुत।

**४. सविस्तरम् उत्तरं लिखत।**

(१) ध्रुवं चतुर्णां सान्निध्यात् गर्भस्यात् विधिपूर्वकम्।
ऋतुक्षेत्रांम्बुबीजानां सामग्र्यात अंकुरो यथा॥

(२) सविस्तरं गर्भोत्पादकभावं लिखत।

(३) गर्भपोषणं स्पष्टीकुरूत।

**५. यथायोग्यमुत्तरं संयोजयत।**

| | |
|---|---|
| (१) प्रथममासे | दौहृदवस्था |
| (२) तृतीयमासे | कलल-स्वरूपम् |
| (३) चतुर्थमासे | अस्थिरओजः |
| (४) अष्टममासे | पञ्चपिण्डस्वरूपम् |

# ६ अस्थिविज्ञानम्

**अस्थिपरिचय :** मानवशरीराधाराभूतानि अस्थीनि सन्ति। शरीरस्य सर्वाङ्गप्रत्यङ्गावयवषड्धातूनामाधारः अस्थीनि एव सन्ति। मानवस्य गमनावगमनादिक्रियाः व्यवस्थितास्थिषु सत्सु संभविताः सन्ति। एतेषामस्थिनामुपरि पेशी वर्तते। पेश्यावृत्तानि अस्थीनि सन्ति।

**सुश्रुतमतानुसारम् अस्थिवर्णनम्**

**''आभ्यन्तरगतैः सारैर्यथा तिष्ठन्ति भूरुहाः।**

**अस्थिसारैस्तथा देहा ध्रियन्ते देहिनां ध्रुवम्॥''**

(सु.शा. ५/२१)

यथा वृक्षाः स्वाकीयान्तःसारभागेनावृत्ताः सन्ति तथैव जीवधारिणः देहिनोऽपि अस्थिसाराधारिताः वर्तन्ते । शरीरस्य सर्वोत्तमं कठिनधातुरस्थि वर्तते। मेदात् अस्थिनः समुत्त्पत्तिर्भवति। गर्भेऽस्मिन् पितृजभावात् अस्थीनि सञ्जायन्ते। पाञ्चभौतिकानि अस्थीनि वर्तन्ते तथापि वायुदोषाश्रितानि सन्ति। तस्मात् वायोरधिष्ठानं मन्यते। सर्वधातूनां स्वकीयः धात्वाग्निः भवति। अस्थ्यग्निः रसात् सारं एवं किट्टं विभाजनं करोति। सारभागात् अस्थिधातोः मलस्वरूपेण नखाः रोमाणि च समुद्भवन्ति।

**अस्थिसंख्या-**

**(१) वेदवादी** - चरकाष्टाङ्गहृदयाष्टाङ्गसंग्रहकाश्यपसंहिता - याज्ञवल्क्यादिनां मते ३६० (षष्ठयुत्तरत्रिशतम्) अस्थीनि सन्ति। तत्र दन्तनखचणकास्थिनां गणनां भवति।

**(२) शल्यतन्त्रवादी** - सुश्रुतभावप्रकाशमते ३०० अस्थीनि सन्ति।

**(३) आधुनिकमते** - २०० अस्थीनि एवश्च कर्णस्य षडस्थीनि तरुणास्थीनि मिलित्वा २०६ अस्थीनि सन्ति।

**षडङ्गादृष्ट्याऽस्थिसंख्या**

| | | | |
|---|---|---|---|
| - शाखासु | ३० × ४ | = | १२० |
| - मध्यशरीरे | | = | ५० |
| - ग्रीवोपरि | | = | ३६ |
| | | | २०६ |

**अध:शाखाया: अस्थीनि**

- पादाङ्गुलिषु अङ्गुलिनलकास्थीनि
 - (Phalanges) = १४
- पादशलाका: - (Metatarsal) = ०५
- पादकूर्चास्थि - (Tarsal) = ०७
- अन्त:जङ्घास्थि - (Tibia) = ०१
- बहि:जङ्घास्थि - (Fibula) = ०१
- जान्वस्थि - (Patella) = ०१
- ऊर्वस्थि - (Femur) = ०१

 एकशाखायाम् = ३०
 शाखाद्वयस्य ३० × २ = ६०

**उर्ध्वशाखाया: अस्थीनि**

- हस्ताङ्गुलिषु अङ्गुलिनलकास्थीनि -
 (Phalanges) = १४
- हस्तशलाका: - (Metacarpal) = ०५
- हस्तकूर्चास्थीनि - (Carpus) = ०८
- अन्त:प्रकोष्ठास्थि - (Ulna) = ०१
- बहि:प्रकोष्ठास्थि - (Radius) = ०१
- प्रगंडास्थि - (Humerus) = ०१

 हस्तैकस्मिन् = ३०
 हस्तद्वयस्यास्थीनि ३० × २ = ६०
 अध:शाखाद्वस्य = ६०
 उर्ध्वशाखाद्वयस्य = ६०
 मिलित्वा = १२० अस्थीनि सन्ति।




**अस्थिपिञ्जरम्**

**मध्यशरीरस्य अस्थीनि**

- श्रोणीफलकास्थीनि - (Hipbone) = ०२
- त्रिकास्थि - (Sacrum) = ०१
- अनुत्रिकास्थि - (Coccyx) = ०१
- पृष्ठस्य कशेरुकास्थीनी - (Thoracic Vertebraes) = १२
- कटिभागस्य कशेरुका: - (Lumber Vertebrae) = ०५
- पर्शुकास्थीनि - (Ribs) = २४
- उर:फलकास्थि - (Sternum) = ०१
- अक्षकास्थि - (Clavical) = ०२
- अंसफलकास्थि - (Scapula) = ०२

= ५०

**शिरसः एवं ग्रीवायाः अस्थीनि - (Bones of head & Neek)**

| | | |
|---|---|---|
| - ग्रीवायाः कशेरुकास्थीनि - (Cervical Vertebrae) | = | ०७ |
| - अधोहन्वस्थि - (Mandible) | = | ०१ |
| - उर्ध्वहन्वस्थि - (Maxilla) | = | ०२ |
| - ताल्वास्थि - (Palatines) | = | ०२ |
| - नासास्थि - (Nasal bone) | = | ०२ |
| - गण्डास्थि - (Zygomatic bone) | = | ०२ |
| - नासामध्ये शुक्तिकास्थि - (Inferiarturbinate bone) | = | ०२ |
| - नासामध्यस्थसीरिकास्थि - (Vomer) | = | ०१ |
| - नेत्रमध्ये अश्रुपीठास्थि - (Lacrymal bone) | = | ०२ |
| - ग्रीवाग्रभागे, जिहवामूले - (Hyoid bone) | = | ०१ |
| (अर्धचन्द्राकारकण्ठिकास्थि) | | **२२** |

**मस्तिष्के कपालास्थीनि (Bones of skull)**

| | | |
|---|---|---|
| - पुरःकपालास्थि - (Frontal bone) | = | ०१ |
| - पार्श्वकपालास्थि - (Parietal bone) | = | ०२ |
| - पश्चात्कपालास्थि - (Occipital bone) | = | ०१ |
| - कर्णाधार शंखास्थि - (Temporal bone) | = | ०२ |
| - कपालतले जतुकास्थि - (Sphenoid) | = | ०१ |
| - झर्झरास्थि - (Ethmoid bone) | = | ०१ |
| - कर्णमध्येत्रीणि लघ्वस्थीनि - (Ossicles of the Ear) | = | ०६ |
| | | **१४** |

**आधुनिक मते अस्थि बंधारणम्**

**सामान्यरचना -**

**बन्धारणम्** - अस्थिषु मुख्यवस्तुद्वयमस्ति मृदुः कठिनञ्च। मृदुवस्तुतः स्नायवः (Slander fibrous lamellae), कठिनतः (Solid matter), क्षारपदार्थाः (Calcium salts) मृदुस्नायुकठिनक्षारपदार्थाः परस्परं सम्मील्य अस्थीनि सञ्जायन्ते।



**अस्थिरचना**

**अस्थिपटलानि - (Periosteum & Endosteum)**

सर्वाणि अस्थीनि सूक्ष्मरक्तवाहिनीतन्तुभिः निर्मितानि आवृत्तानि च भवन्ति। तत्पटलं नाशयति तदा अस्थिनः अपि विनष्टानि भवन्ति। तत्कारणं यत् पटलेन नूतनास्थि आवश्यकतानुसारं निर्मीयते। एवञ्च शुद्धरक्तमपि तस्मिन्नस्थीनि प्रेरयति।

बृहन्नलकास्थिषु अन्तःभागः मृदुतामयः भवति। तस्मिन् मज्जा-धातुः वर्तते। मृदुभागेऽपि पटलावृत्तं (Endosteum) वर्तते। तद्मज्जाधातुम् आधारः प्रददाति।



अस्थिपोषणम्

**अस्थिनां पोषणम्** - सर्वेषु अस्थिषु नानाविधानि छिद्राणि भवन्ति। तैश्छिद्रैः धमनीभिः अन्तः प्रविश्य नानासूक्ष्मशाखां गत्वा अस्थिनां कृते शुद्धरक्तं प्रदीयते। नलकास्थिषु एकं वा द्वयमेव छिद्रं विद्यते। येन बृहद्धमनी अन्तःप्रविश्य अस्थिनां अन्तःभागे स्थितमज्जाधातुमपि शुद्धरक्तं प्रददाति। अन्यस्मात् छिद्रात् अशुद्धरक्तवाहिनी नाडी बहिरागच्छति। एवञ्च लघुरसायनी सूक्ष्मज्ञानतन्तवः अस्थिषु प्रसारिताः भवन्ति।

**अस्थीनि कठिनानि कथं भवन्ति? (Ossification)**



धृतनवजन्मबालकस्य शरीरे कोमलास्थीनि तरुणास्थीनि अधिकानि च भवन्ति। मानवः पञ्चविंशतिवर्षस्य भवति तावत्कालपर्यन्तं अस्थीनि अधिकाधिककठिनानि भवन्ति। तदा लघूनि अस्थीनि सम्मील्य बृहदस्थि भवति अतः अधिकसंख्या न्यूना भवति। श्वासनली, पर्शुकास्थिभिः संलग्नानि तरुणास्थीनि सदैव कोमलानि भवन्ति किन्तु वृद्धावस्थायां क्षारप्रभावेण कठिनानि भवन्ति कानिचिद् इति।

बालकस्य तरुणास्थिषु कठिनास्थीनि भवन्ति तदा तद्क्रियायाः नाम Process of Ossification कथ्यते। सर्वाणि अस्थीनि मध्यभागतः अस्थिकेन्द्रबिन्दुता प्रथम कठिनानि भवन्ति। तत्परिवर्तनेन संपूर्णास्थि कठिनं भवति।

नलकास्थिषु एतत्प्रक्रिया विविधभागेषु प्रभवति। नलकास्थिषु मध्यनलकार्थम् एकः तदन्तिमभागार्थम् एकः अस्थिकेन्द्रबिन्दुः भवति। पूर्वं मध्यनलकस्यास्थिकेन्द्रं कार्यं करोति। तेन मध्यनलकं कठिनं भवति। तत्पश्चात् अन्तिमभागकठिनं भवति। सम्मील्य सम्पूर्णनलकास्थि कठिनं भवति।

**एतानि पञ्चविधानि भवन्ति तद्यथा कपालरूचकतरुणवलय-नलकसंज्ञानि।**

**अस्थिप्रकाराः**



कपालास्थि

**उदा.** अंसफलकास्थि



रुचकास्थि

**उदा.** दंत



तरुणास्थि

**उदा.** कर्णपाली



नलकास्थि

**उदा.** प्रगण्डास्थि



वलयास्थि

**उदा.** पर्शुका



अण्वस्थि

**उदा.** हस्तकूर्चास्थि

**अस्थिनां प्रकाराः**

एतानि पञ्चविधानि भवन्ति; तद्यथा – कपालरुचकतरूणवलयनलकसंज्ञानि। तेषां जानुनितम्बांसगण्डतालुशंखशिरः सु कपालानि, दशनास्तु रूचकानि, घ्राणकर्णग्रीवाक्षिकोषेषु तरूणानि, पार्श्वपृष्ठोरस्सु वलयानि, शोषाणि नलक संज्ञकानि॥ सु.शा. ५/२०॥

(१) कपालास्थीनि – जानुः, नितम्बः, अंसः, तालुः, गण्डः, शंखः, शिरः इत्येतेषां अस्थीनि।

(२) रूचकास्थीनि - दन्ताः रूचकास्थियुताः भवन्ति।

(३) तरूणास्थीनि - घ्राणं, कर्णः, ग्रीवा, अक्षिकोषः एतेषु तरूणास्थीनि भवन्ति।

(४) वलयास्थीनि - पार्श्वः, पृष्ठः, उरः इत्यत्र वलयास्थीनि भवन्ति।

(५) नलकास्थीनि - शेषाः नलकास्थीनि भवन्ति।

**अस्थिकार्याणि**

**तस्माच्चिरविनष्टेषु त्वक् मांसेषु शरीरिणाम्।**

**अस्थीनि न विनश्यन्ति साराण्येतानि देहिनाम् ॥** सु.शा. ५/२२

**मांसान्यत्र निबद्धानि सिराभिः स्नायुभिस्तथा।**

**अस्थीन्यालम्बनं कृत्वा न शीर्यन्ते पतन्ति वा ॥** सु.शा. ५/२३

- यथा वृक्षाः स्वशरीरान्तर्गतसारसहाय्येन स्थिताः भवन्ति तथा प्राणिनां देहः अस्थिनां सहाय्येन धृताः भवन्ति। अतः प्राणिनां शरीरात् त्वक्-मांसयोः नाशे सत्यपि अस्थीनि नष्टानि न भवन्ति। अस्थिनामवलम्बनं कृत्वा सिराभिः स्नायुभिश्च मांसं अस्थिषु बद्धं भवति तच्छरीरे इतस्ततोऽपि न गच्छति नाशमपि न एति।

- अस्थीनि शरीरस्य आकारं दृढतां च रक्षति स्थापयति च।
- शरीरस्य गमनागमने सहायं करोति।
- शरीरस्य कोमलावयवानां रक्षणं करोति।
- अस्थिषु मृदुभागे स्थितमज्जाधातुतः रक्तकणाः शुक्राणि च उत्पादयन्ति। (आधुनिकमतः)
- पार्थिवधातूनामपि रक्षणं करोति।

**स्वाध्यायः**

**१. बहुवैकल्पिकप्रश्नानां योग्यम् उत्तरं चिनुत।**

(१) आधुनिकमतानुसारं कति अस्थीनि सन्ति?

(क) २०६ (ख) ३०० (ग) ३६० (घ) २००

(२) मस्तिष्कस्य अस्थिसंख्या का?

(क) ६ (ख) ८ (ग) ९ (घ) ७

(३) एकशाखायाः अस्थिसंख्या का वर्तते?

(क) ३० (ख) ३२ (ग) २८ (घ) ३४

(४) शल्यतन्त्रवादानुसारं अस्थिसंख्या का?

(क) ३१० (ख) ३०० (ग) २०६ (घ) ३६०

(५) शिरग्रीवयोः अस्थिसंख्या का ?

(क) २० (ख) २१ (ग) २२ (घ) २३

(६) ऊर्ध्वशाखायाः अस्थिसंख्या वर्तते।

(क) ३० (ख) ३१ (ग) ३२ (घ) ३३

(७) आर्युर्वेदमतानुसारं अस्थिप्रकाराः सन्ति।

(क) ३ (ख) ४ (ग) ५ (घ) ६

(८) दन्तस्य अस्थिप्रकारः कः ?

(क) कपालास्थि (ख) रूचकास्थि (ग) वलयास्थि (घ) तरूणास्थि

**२. प्रश्नानाम् एकेन वाक्येन उत्तराणि लिखत।**

(१) पादे कति कूर्चास्थीनि भवन्ति ?

(२) जान्वस्थि कुत्र आगतमस्ति ?

(३) श्रोणीफलकस्य संख्यां लिखत।

(४) ग्रीवायां कति कशेरूकाः आगताः सन्तिः ?

(५) एकस्मिन् हस्ते कति अस्थीनि भवन्ति ?

**३. अधोलिखितप्रश्नानां लघूत्तराणि लिखत।**

(१) वेदवादिनां मते कति अस्थिसंख्या वर्तते।

(२) षडङ्गदृष्ट्या अस्थिसंख्यां लिखत।

(३) आधुनिकमतानुसारम् अस्थिसंख्यां प्रतिपादयत।

(४) ऊर्ध्वशाखायाः अस्थिनां नामानि लिखत।

(५) अस्थि-प्रकारान् लिखत।

**४. सविस्तरम् उत्तरं लिखत।**

(१) अस्थिनां कार्यं किमस्ति ?

(२) अस्थि कठिनं कथं भवति तल्लिखत।

(३) अस्थिनां बन्धारणं लिखत।

(४) अस्थि प्रकाशन् लिखत।

**५. यथायोग्यमुत्तरं संयोजयत।**

(१) रूचकास्थि - दन्ताः

(२) नलकास्थि - पार्श्वम्

(३) वलयास्थि - घ्राणम्

(४) तरूणास्थि - जानुः

(५) कपालास्थि - ऊर्वस्थि

# ७ सन्धिविज्ञानम्

**सन्धिपरिचयः** – प्राणिनां शरीरमस्थ्याधारितं वर्तते। सर्वाण्यस्थीनि अस्थिपिञ्जरे सन्धिभिः परस्परं संयुक्तानि सन्ति। तेषूपरि नानाविधमांसपेश्यः प्रस्तारिताः सन्ति। सिराधमनयःतासं पोषणं कुर्वन्ति तथा च अस्थिनां गमने सहायकरूपाः भवन्ति।

**सन्धिशब्दस्योत्पतिः** – सम् उपसर्गपूर्वकं धा धातोः कि प्रत्यये। भवति आलोपे सति सन्धिशब्दस्योत्पत्तिर्भवति तस्यार्थः संगमः भवति।

**सन्धिलक्षणं वा परिभाषा–**

(१) अस्थिसंयोगस्थानम् **( च.शा. ७/१४ )**

(२) सन्धयङ्गञ्चांगसन्धानाद् देहे प्रोक्ताः कफान्विताः **( शार्ङ्गधरः ५/५६ )**

यत्रास्थिद्वयं मिलति तत्र सन्धिः सञ्जायते। तस्य मुख्यप्रकारद्वयं वर्तते। (१) चलसन्धिः (२) अचलसन्धिः।

**''शाखासुहन्वोः कट्यां च चेष्टावन्तस्तु सन्धयः।**
**शेषास्तु सन्धयः सर्वे विज्ञेया हि स्थिरा बुधैः॥''** **( सु.शा. ५/२५ )**

पादहस्तहनुकटिषु चलसन्धिः विद्यते। अन्यत्र सर्वेषु स्थानेषु अचलसन्धिः वर्तते। केचन त्रिविभागाः मन्यन्ते।

**चलसन्धिः** (१) बहुचेष्टा – Movable
(२) अल्पचेष्टा – Mix Joint Amphiarthrosis or Slightly movable

**अचलसन्धिः** (३) अचेष्टा – Synarthrosis of Immovable Joints




**आधुनिकमतानुसारेण अस्थिसन्धिप्रकाराः**

**रचनानुसारेण प्रकारा :**

– Fibrous joint – स्नायुसूत्रमयसन्धिः

- Cartilaginous joint - तरुणास्थिमयसन्धि:।
- Synovial joint - श्लेष्मधराकलापुरमयसन्धि:।

**कार्यानुसारेण प्रकारा: :**

- Synarthrosis - अचलसंधि
- Amphiarthrosis - अल्पचलसन्धि:
- Diarthrosis - चलसन्धि:

अनेन वर्गीकरणानुसारेण हस्तपादहन्वादिषु बहुचेष्टासन्धि: वर्तते। अतस्तत्रास्थीनि स्वत: अधिकभ्रमणं कुर्वन्ति। करोडरज्जावादिअल्पचेष्टासन्धि: विद्यते। तत्रास्थीनि शनै: शनै: भ्रमणं कुर्वन्ति। अन्यत्रस्थानेषु अचेष्टासन्धिर्भवति, तत्रास्थीनि किञ्चिदपि भ्रमणं कर्तुं न शक्नुवन्ति। यथा मस्तिष्कादिषु।

प्राचीनशरीरविद: आकृत्या सन्धे: अष्टप्रकारान् दर्शयन्ति।

''कोरोदुखलसामुद्गप्रतरस्तुन्नसेविनी।

**काकतुण्डं मण्डलं च शंखावर्तोऽष्टसन्धय:॥''** **सु.शा. ५/२७**

(१) कोरसन्धि: (२) उदुखलसन्धि: (३) सामुद्गसन्धि: (४) प्रतरसन्धि: (५) तुन्नसेवनी (६) वायसतुण्डसन्धि: (७) मण्डलसन्धि: (८) शंखावर्त:

**(१) कोरसन्धि:** - अस्मिन् सन्धौ बहुचेष्टासन्धि: वर्तते। तत्रास्थीनि परस्परं मुक्ततया भ्रमणं कुर्वन्ति। एतादृक्सन्धौ अस्थिन: अन्तिमभागस्य गर्तमयांस: (नतोदरा:) भवन्ति। द्विणीयास्थिन: भागांस: उन्नतोदरभाग: भवति। तस्मात् कारणात् परस्परं भ्रमति कोरसन्धेश्चत्वार: प्रकारा: सन्ति।

(१) खल्लकोर: - Condyloid यथा मणिबन्ध: कूर्चास्थिशलाका च

(२) परस्परकोर: - Sad-dle joint यथा अंगुष्ठमूलम्

(३) चक्रकोर: - Pivot Joint यथा प्रथमग्रीवाकशेरुका द्वितीयग्रीवाकशेरुका च

(४) संदशकोर: - Hinge Joint यथा कूर्परसन्धि:



**खल्लकोर:**



**परस्परकोर:**





चक्रकोर



संदशकोरः



**( २ ) उदुखलसन्धिः** – Ball & Socket Joint बहुचेष्टासन्धिः वर्तते। उदूखलाकारास्थिनः भागः द्वितीयास्थिनः मस्तिष्काकारभागः सम्मील्य स्वतः परिभ्रमति। यथा स्कन्धवंक्षणयोः सन्धिः दन्तदन्तमूलभागस्यापि सन्धिरुदुखले आगच्छति।



**उदूखलसन्धि**

**( ३ ) सामुद्‌गसन्धिः** – A variety of Amphiarthroses अल्पचेष्टासन्धिः विद्यते। अंसपीठगुदभगनितम्बेषु सामुद्राः।




**( ४ ) प्रतरसन्धिः** – Arthrodia समानास्थीनि परस्परं परिभ्रमन्ति। प्रकारत्रयमस्ति।

(i) चलप्रतरः – श्वेष्मकलागते सति स्वतः परिभ्रमणं करोति। हस्तपादकूर्चास्थिसन्धिः।

(ii) युक्तप्रतरः – चलप्रतरतः अल्पचेष्टासन्धिः भवति।

जंघास्थिप्रकोष्ठास्थिसन्धिरागच्छति।

(iii) दृढप्रतरः – पृष्ठवंशे कशेरुकायाः सन्धिः प्रवर्धन-कमध्यभागस्य सन्धिः

**( ५ ) तुन्नसेवनीसन्धिः** – Suture मस्तिष्कस्य कपालास्थिषु दृश्यते। तत्प्रकारद्वयमस्ति।

(i) सीमंतसेवनी – शिरसः कपाले दृश्यते

(ii) ग्रस्तसेवनी – जतूकास्थिसीरिकास्थिमध्यभागेऽस्ति।



**( ६ ) वायसतुण्डसन्धिः** – अधोहनुशंखास्थिनः हनुसन्धिस्थालकमध्यभागस्य सन्धिः।



**( ७ ) मण्डलसन्धिः** – श्वासनाड्यः – तरुणास्थिमध्यभागसन्धिः।



**( ८ ) शंखावर्तः** – कर्णस्य तरुणास्थिमध्यभागसन्धिः।



शंखावर्तः

**त एते सन्धयोऽष्टविधाः – कोरोलूखलसामुद्गप्रतरतुन्नसेवनीपायस्तुण्डमण्डलशंखावर्ताः। तेषामंगुलिमणिबन्ध-गुल्फजानुकुर्परेषु कोराः सन्धयः, कक्षावंक्षणदशनेषु उलुखलाः, अंसपीठगुदभगनितम्बेषु सामुद्गाः, ग्रीवापृष्ठवंशयोः प्रतराः, शिराः कटीकपालेषु तुन्नसेवन्यः हनोरुभयतस्तु वायसतुण्डः कण्ठहृदयनेत्रक्लोमनाडीषु मण्डलाः, श्रोत्रश्रृंगाटकेषु शंखावर्ताः। तेषां नामाभिरेवाकृतयः प्रायेण व्याख्याताः ॥ सु.शा. ५/२७॥**

| **सन्धिप्रकाराः** | | **सन्धिस्थानानि** |
|---|---|---|
| १. कोरः | – | अङ्गुलिमणिबन्धगुल्फजानुकूर्परेषु |
| २. उदुखलाः | – | कक्षावंक्षणदशनानेषु |
| ३. सामुद्गाः | – | अंसपीठगुदभगनितम्बेषु |
| ४. प्रतरः | – | गीवापृष्ठवंशस्योः |
| ५. तुन्नसेवनी | – | शिराः कटीकपालेषु |
| ६. वायस्तुण्डः | – | हनोरुभयतः |
| ७. मण्डलः | – | कण्ठहृदयनेत्रक्लोमनाडीषु |
| ८. शंखावर्ताः | – | श्रोत्रश्रृंगाटयोः |

चलसन्धिरचनां – एतेषु सन्धिषु द्वित्रीणि अस्थीनि तरुणास्थिद्वारावृत्तान्मिभागः कार्यं कुर्वन्ति भागद्वयं स्नायुकोषस्नायुरज्जुरद्वारा परस्परं बद्धीभूतमस्ति तेन विमुक्तः (विभक्ताः) न भवति। परस्परघर्षणेन स्वतः परिभ्रमणं करोति, तयोर्मध्ये श्लेष्मधरकलापुटं वर्तते। तत्र श्लेष्मा परिपूर्णः वर्तते। अधोभागाः बहुचेष्टसन्धिषु कार्यं कुर्वन्ति।

(१) अस्थिसन्धेयभागः (२) तरुणास्थीनि (३) स्नायवः (४) श्लोष्मधराकलेति

अल्पचेष्टसन्धिः स्नायुकोषश्लेष्मधरकलापुटकं च न भवति। उभयोर्मध्ये सूक्ष्मस्नायुमयपटलं भवति।

सन्धिसंख्या चरकमते – २०० (द्विशतम्) सन्ति।

| | | |
|---|---|---|
| सुश्रुतमते | – २१० सन्ति। | |
| शाखायाम् | – १७ × ४ | = ६८ |
| मध्यशरीरे | – | = ५९ |
| शिरोग्रीवामध्ये | – | = ८३ |
| सम्पूर्णा सन्धिः | | = २१० |

सन्धिकार्यम् – शरीरेऽस्थिसन्धेः कारणात् सर्वाः चेष्टाः सरलतया भवन्ति।

## स्वाध्यायः

**१. बहुवैकल्पिकप्रश्नानां योग्यम् उत्तरं लिखत।**

(१) संपूर्णशरीरस्य सन्धिसंख्या वर्तते।

(क) ६८ (ख) ८३ (ग) २१० (घ) २२०

(२) सन्धिप्रकाराः कति सन्ति?

(क) ६ (ख) ८ (ग) ४ (घ) ५

(३) बहुचेष्टावान् सन्धिः कः वर्तते।

(क) प्रतरः (ख) सामुद्ग (ग) उदुखलः (घ) तुन्नसेवनी

(४) चरकमते सन्धिप्रकाराः –

(क) २ (ख) ३ (ग) ४ (घ) ५

(५) सन्धेः मुख्यप्रकाराः कति सन्ति?

(क) २ (ख) ३ (ग) ४ (घ) ५

(६) हनुसन्धिः कस्य सन्धेः प्रकारः ?

(क) कोरस्य (ख) उदुखलस्य (ग) वायसतुण्डस्य (घ) शंखावर्तस्य

(७) पृष्ठवंशे कः सन्धिः भवति ?

(क) सामुद्गः (ख) प्रतरः (ग) उदुखलः (घ) कोरः

(८) कक्षासन्धिः कस्मिन् सन्धौ वर्तते ?

(क) उदुखले (ख) सामुद्गे (ग) प्रतरे (घ) तुन्नसेवन्याम्

**२. प्रश्नानाम् एकेन वाक्येन उत्तराणि लिखत।**

(१) उदुखलसन्धिः कुत्र आगतः वर्तते ?

(२) मण्डलसन्धिः कुत्र वर्तते।

(३) शंखावर्तसन्धिः कुत्र वर्तते ?

(४) कोरसन्धेः प्रकारान् लिखत।

(५) तुन्नसेवनीसन्धेः कति प्रकाराः ?

**३. अधोलिखितप्रश्नानां लघूत्तराणि लिखत।**

(१) उदुखलसन्धिः नाम किम् ?

(२) बहुचेष्टसन्धिषु के के कार्यं कुर्वन्ति ?

(३) शाखायां कीदृशः सन्धिः आयाति ?

(४) अष्टौ सन्धिप्रकारान् लिखत

(५) सामुद्गसन्धिं वर्णयत।

**४. सविस्तरम् उत्तरं लिखत।**

(१) अस्थिसन्धेः प्रकारान् लिखत।

(२) चलसन्धिः नाम किम् ?

(३) प्रतरसन्धिविषये विस्तरेण लिखत।

**५. यथायोग्यमुत्तरं संयोजयत।**

| | |
|---|---|
| (१) सामुद्गसन्धिः | (१) वंक्षणम् |
| (२) उलुखलसन्धिः | (२) अंसचक्रम् |
| (३) कोरसन्धिः | (३) जंघास्थिसन्धिः |
| (४) प्रतरसन्धिः | (४) जानुसन्धिः |
| | (५) पृष्ठवंशः |

•

# ८ कलाशरीरम्

**कलाव्याख्या –**

(i) धात्वशयान्तर मर्यादा: कला: इति ज्ञायते।

(ii) कला नाम शरीरस्थधातुषु, आशयेषु च पृथकत्वं विभिन्नतां च करोति तादृक्, शरीरस्य एक: उपाङ्ग:। यथा काष्ठस्य छेदनेन सारभाग: दृश्यते तथा मांसस्य छेदनेन धातव: दृश्यन्ते।

(iii) ''**यथा हि सार: काष्ठेषु छिद्यमानेषु दृश्यते।**

**तथा धातुर्हि मांसेषु छिद्यमानेषु दृश्यते'' ॥ सु.शा. ४/६ ॥**

**स्नायुभिश्च प्रतिच्छन्नान् सन्ततांश्च जरायुणा।**

**श्लेष्मणा वेष्टिताश्चापि कलाभागांस्तु तान् विदु: ॥ सु.शा. ४/७ ॥**

धातूनां आश्रयीभूता: कला: सप्त भवन्ति।

एता: कला: स्नायुतन्तुभि: प्रतिष्ठिता:, जरायु–आवरणेन व्याप्ता:, श्लेष्मणा निर्मिता: बोध्या:। अत्र ''धातु हि मांसेषु'' इति पदे धातुशब्देन् रक्तधातुबोध: भवति।

''**वृक्षाद्यथाभिप्रहतात् क्षीरिण: क्षीरमावहेत्।**

**मांसादेवं क्षतात् क्षिप्रं शोणितं संप्रसिच्यते ॥ सु.शा. ४/११ ॥**''

अर्थात् शरीरस्य सर्वेषां धातूनाम् ऊपरि एकम् आवरणं भवति तदेव कला इति शब्देन ज्ञेयम्। एतदावरणं स्नायुभि: जरायुसदृशेन जालेन, श्लेष्मणा च निर्मितमस्ति अत: स्नायव: जारायु: श्लेष्मा च कलाया: उपादानकारणमस्ति। किन्तु प्रत्येकस्मिन् कलायां एते त्रय: भवन्तु इति अनिवार्य नास्ति त्रिषु कस्यचिदेकेन द्वयो: मिश्रणेन वा कलाया: निर्माणं भवति। आधुनिकपाश्चात्य परिभाषानुसारेण स्नायुप्रतिच्छन्नं (Fibrous) जरायुसततं (serous) श्लेष्मणा वेष्टितं (Mucous) इति कथयितुं शक्नुम:। कथनस्यास्य आशय: शरीरे या: कला: सन्ति ता: स्नायुवीया:, जरायुसमा:, श्लेष्मला: च सन्ति।

**कलाप्रकारा:**

**( १ ) ''तासां प्रथमा मांसधरा नाम, यस्यां मांसे सिरास्नायुधमनीस्रोतसां प्रताना भवन्ति ॥ सु.शा. ४/८ ॥**

''**यथा बिसमृणालानि विवर्धन्ते समन्तत:।**

**भूमौ पङ्कोदकस्थानि तथा मांसे सिरादय:'' ॥ सु.शा. ४/९ ॥**

सप्तकलासु प्रथमा मांसधरा कलाऽस्ति। अस्या: मांसधराकलाया: मांसे सिरा, स्नायु:, धमनी, स्रोतसां शाखाप्रशाखा च भवन्ति। अत्र नवमे श्लोके उक्तं यथा पङ्कयुक्ते जले कमलमृणालानि वा तेषां तन्तव: भूमिं परित: विवर्धन्ते तथा मांसधराम् आश्रित्य सिरा: विवर्धन्ते।

**( २ ) ''द्वितीया रक्तधरा नाम मांसस्याभ्यन्तरत:, तस्यां शोणितं विशेषतश्च सिरासु यकृत्प्लीह्नोश्च भवति ॥**

''**वृक्षाद्यथाभिप्रहतात् क्षीरिण: क्षीरमावहेत्।**

**मांसादेव क्षतात् क्षिप्रं शोणितं संप्रसिच्यते ॥ सु.शा. ४/१०-११ ॥**''

सप्तकलासु द्वितीया रक्तधरा कला अस्ति। सा मांसे भवति। तत्र सिरासु, यकृति, प्लीहायां च रक्तं विशेषतया भवति॥ यथा क्षीरिण: वृक्षस्योपरि प्रहारं कुर्मश्चेद् क्षीरं निर्वहति तथा मांसस्योपरि प्रहारे सति रक्तं निर्वहति।

**( ३ )** ''तृतीया मेदोधरा नाम, मेदो हि सर्वभूतानाम् उदरस्थमण्वस्थिषु च, महत्सु च मज्जा भवति ॥ **सु.शा. ४/१२ ॥**''

''स्थूलास्थिषु विशेषेण मज्जा त्वभ्यन्तराश्रितः।

अथेतरेषु सर्वेषु सरक्तं मेद उच्यते॥''

शुद्धमांसस्य यः स्नेहः सा वसा परिकीर्तिता॥ **सु.शा. ४/१३**॥

सप्तकलासु तृतीया मेदोधरा कलाऽस्ति। मेदः सर्वभूतानाम् उदरे लघु–अस्थिषु च भवति। महत्सु अस्थिषु मज्जा भवति। ११॥ अत्र श्लोकानुसारं – विशेषरूपेण महत्सु अस्थिषु मध्यभागे मज्जा भवति अण्वस्थिषु मेदः भवति स च सरक्तमेदः इत्यपि कथ्यते। शुद्धमांसस्य यो हि स्नेहः सः वसा इति कथ्यते। आयुर्वेदे शरीरगत स्नेहः (Fat) इत्यस्मै मज्जा, वसा, मेदः, रक्तमेदः इति चत्वारः शब्दाः प्रयुज्यन्ते। महत्सु अस्थिषु या मज्जा भवति सा पीतवर्णस्य भवति। अस्मै (yellow mar row) इत्यापि कथयितुं प्रभवामः। अण्वस्थिषु रक्तमज्जा भवति अतः अस्मै (Red marrow) इति शब्दः युज्यते। शुद्धमांस अर्थात् केवलं मांसस्य यः स्नेहः (Fat) वर्तते सः वसा इत्यस्ति अस्मै 'Fat content of the flesh' इति शब्दः ज्ञेयः। इतोऽपि यः भेदः वर्तते सः वपावहनं त्वगधस्य स्नेहः ज्ञेयः।

**( ४ ) चतुर्थी श्लेष्मधरा नाम सर्वसन्धिषु प्राणभृता भवति॥ सु.शा. ४/१४॥**

**''स्नेहाभ्यक्ते यथा ह्यक्षे चक्रं साधु प्रवर्तते।**

**सन्धयः साधु वर्तन्ते संश्लिष्टाः श्लेष्मणा तथा ॥ सु.शा. ४/१५**॥

सप्तकालासु चतुर्था श्लेष्मधरा कलाऽस्ति। या प्राणिशरीरस्य सर्वासु सन्धिषु भवति। श्लोके उक्तं यत्–यथा अक्षोपरि तैललेपनेन चक्रं शीघ्रं याति तथा श्लेष्मयुक्तसन्धयः (Joints) सम्यग् वर्तन्ते।

वक्तव्यम् – अक्षोपरि तैललेपनेन ध्वनिन्यूनता भवति चक्रस्य परं च तेन उभयोः घर्षणमपि स्वल्पं भवति यतः चक्रं अधिककालं यावत् कार्यं करोति रथस्य गत्यमपि आधिक्यं भवति, तद्वदेव श्लेष्मधराकलया निर्गतः श्लेष्मः सन्धिनामन्तभागेषु लिप्तस्सन् ध्वनिम् अवरूणद्धि, घर्षणं न भवति, उष्णतायाः उत्पत्तिः न भवति, अङ्गविकासोऽपि शनैःशनैः भवति, अधिककालं यावत् कार्यं कुवन्ति सन्धयः, तेषां यौगिक स्थितिष्वपि कष्टाधिक्यं न भवति। प्राणी शीघ्रतया सर्वाणि कार्याणि साधयितुं क्षमते।

**( ५ ) पञ्चमी पुरीषधरा नाम, याऽन्तःकोष्ठे मलमभिविभजते पक्वाशयस्था॥ सु.शा. ४/१६॥**

**''यकृत्समन्तात् कोष्ठं च तथाऽन्त्राणि समाश्रिता।**

**उण्डुकस्थं विभजते मलं मलधरा कला॥ सु.शा. ४/१७॥''**

सप्तसु पञ्चमा पुरीषधरा कलाऽस्ति। या कोष्ठे स्थिता सति पक्वशये स्थितं मलं पृथक्करोति। यकृतस्थं, कोष्ठस्थं अङ्गानां समीपवर्तिषु आन्त्रेषु समाश्रिता मलधरा कला उण्डुकस्थमलं (जलमाध्यमेन) विभक्तं करोति।

अन्त्राणि इत्यनेन स्थूलस्य क्षुद्रस्य च बोधः भवति। तथाऽपि मलविभाजनस्य कार्यं केवलं स्थूलान्त्रे भवति अतः 'अन्त्राणि' इत्यनेन स्थूलान्त्रस्य ग्रहणं कर्तव्यम्। **उण्डुकस्थं विभजते मलम्** – मुखेन भुक्तान्नस्य पाचनं, सारभागशोषणं च क्षुद्रान्त्रे भवति। यावत् सारभागः मलभागश्च एकत्र भवति तावत् तद्रवं मलं न कथयितुं प्रभवामः। क्षुद्रान्त्रस्य अन्तं यावत् सारभागस्य प्रायः सर्वांशः शोषितः भवति परं स्थूलान्त्रे केवलं मलं जलमिति भागद्वयमेव भवति। अस्यामवस्थायां स्थूलान्त्रस्य कार्यं केवलं मलस्थितजलशोषणस्यास्ति। स्थूलान्त्रस्य प्रारम्भात् गुदाद्वारं मलं यथाकालं गच्छेच्चेत् अशीतिः (८०) प्रतिशतं जलं शोषितं भवति। यदि मलावरोधेन मलम् अधिककालं यावत् आन्त्रे भवेतर्हि जलस्य अधिकं शोषणं भवति येन कारणेन मलं काठिनतायुतं भवित। कथनस्य आशयः 'उण्डुकगतमलस्य विभागः जलेन क्रियते कार्यमिदं स्थूलान्त्रस्य अन्तरावरणेन भवति।

**( ६ ) षष्ठी पित्तधरा नाम या चतुर्विधमन्नपानमुपभुक्तमाशयात् प्रच्युतं पक्वाशयोपस्थितं धारयति।**

**''अशितं खादितं पीतं लीढं कोष्ठगतं नृणाम्।**

**तज्जीर्यति यथाकालं शोषितं पित्ततेजसा ॥ सु.शा. ४/१८॥''**

सप्तकलासु षष्ठी पत्तिधराकलाऽस्ति। इयं कला आमाशयात् निर्गच्छन् पक्वाशयं प्रति गम्यमानानां चतुर्णाम् अन्नानां धारणंक्रियां करोति। उक्तं चात्र–मनुष्यान्त्रगत अशितं, खादितं, पीतं, लीढं, इति चतु:प्रकारान्नं उचिते काले पित्तस्य तेजसा जीर्णं शोषित च भवति।

**वक्तव्यम्**

अशितं, खादितं, पीतं, लीढमिति चतुर्विधम् अन्नं भवति।

(i) दुग्धं, पानकं च पीत पदार्थौ स्त:। (ii) लीढम्–केचन घट्टपदार्था:

येषां लक्षणे लेहनस्यावश्यकता भवति यथा श्रीखण्ड:, अवलेहश्च। (iii) अशितम्–पूरिका, भक्ता: येषां कृते चर्वणस्य आवश्यकता भवति।

(iv) खादितम् – मोदका:, मिष्टान्नानि च येषां कृते अधिकचर्वणस्य आवश्यकता भवति।

कोष्ठ: – अस्मिन् वक्षगुहाया: उदरगुहायाश्च सर्वेषाम् अङ्गानां समावेश: भवति।

आधुनिकमतानुसारं सामान्यतया भक्षितम् अन्नं पाचितं शोषितं च सत् मलत्वेन स्थूलान्त्रे सार्धचतुघण्टान्ते याति। अर्थात् पाचनशोषणक्रियायै सार्धचतुघण्टाया: (४:३० hours) समय: आवश्यक:। अनेन विवरणेन स्पष्टं भवति यत् पित्तधराकलाया: सीमा आमाशयात् पक्वाशयं यावत् भवति।

**(७) सप्तमी शुक्रधरा नाम, या सर्वप्राणिनां सर्वशरीरर्व्यापिनी॥ सु.शा. ४/२०॥''**

**''यथा पयसि सर्पिस्तु गुडश्चेक्षुरसे यथा।**

**शरीरेषु तथा शुक्रं नृणां विद्याद्भिषग्वरा: ॥।॥ सु.शा. ४/२१॥''**

**''दूयङ्गले दक्षिणे पार्श्वे बस्तिद्वारस्य चाप्यध:।**

**मूत्रस्त्रोत: पथाच्छुक्रं पुरुषस्य प्रवर्तते॥ ॥ सु.शा. ४/२२॥''**

आधुनिकविदुषां मते कला Membrane, fascia, septum स्वरूपिणी अस्ति। यदि अस्या: रचनाया: विषये विचारं कुर्म: तर्हि इयं स्नायुवीया (fibrous membrane), जरायुसमा (Mucous membrance) श्लेष्मला च (Mucous membrane) भवति। अस्य कथानानुसारं सप्तकलानां भाषान्तरं निम्नप्रकारेणास्ति।

(१) मांसधरा कला - Deep fascia, Intermuscular septa

(२) रक्तधरा कला - Endothelial Lining of the blood Vessels and sinuses in the liver and spleen

(३) मेदोधरा कला - Omentum, Deep Fascia

(४) श्लेष्मधरा कला - Synovial membrane

(५) पुरीषधरा कला - Mucous membrane of the colon and rectum

(६) पित्तधरा कला - Mucous membrane of the small intestine

(७) शुक्रधरा कला - Mucous membrane of the vasiculae seminalis, vas deferentia, etc..

**स्वाध्याय:**

**१. बहुवैकल्पिकप्रश्नानां योग्यम् उत्तरं लिखत।**

(१) धात्वाशयान्तरमर्यादा: इति ______

(क) त्वक् (ख) स्नायु (ग) कला (घ) पेशी

(२) मांसस्य अन्तः का कला?

(क) मेदोधरा (ख) रक्तधरा (ग) मांसधरा (घ) श्लेष्मधरा

(३) यकृति प्लीहायां च का विशिष्टा कला?

(क) मांसधरा कला (ख) रक्तधरा कला (ग) मेदोधरा कला (घ) पित्तधरा कला

(४) शुद्धमांसस्य यः स्नेहः सा ______ परिकीर्तिता।

(क) मेदः (ख) वसा (ग) मज्जा (घ) सरक्तः मेदः

(५) बृहदस्थिषु विशेषतया किं भवति?

(क) मेदः (ख) मज्जा (ग) सरक्तमेदः (घ) वसा

(६) सर्वेषु अस्थिषु विशेषतया का कला भवति?

(क) रक्तधरा कला (ख) श्लेष्मधरा कला (ग) पित्तधरा कला (घ) पुरीषधरा कला

(७) मलविभाजनं कस्याः कलायाः कार्यम्?

(क) पित्तधराकलायाः (ख) मलधराकलायाः (ग) रक्तधराकलायाः (घ) मेदधराकलायाः

(८) सर्वशरीरव्यापिनी का कला?

(क) पित्तधरा कला (ख) शुक्रधरा कला (ग) रक्तधरा कला (घ) मांसधरा कला

**२. प्रश्नानाम् एकेन वाक्येन उत्तराणि लिखत।**

(१) षष्ठ्याः-कलायाः नाम किम्?

(२) चतुर्विधम् आहारं लिखत।

(३) रक्तधराकलायाः विशिष्टस्थानं लिखत।

(४) शुक्रधराकलायाः स्थानं किम्?

(५) पञ्चमकलायाः नाम किम्?

**३. अधोलिखितप्रश्नानां लघूत्तराणि लिखत।**

(१) मांसधराकलां स्पष्टयत।

(२) रक्तधराकलां स्पष्टयत।

(३) पित्तधराकलायाः स्थानं स्पष्टयत।

(४) आधुनिकरचनानुसारं शुक्रधराकलायाः स्थानं लिखत।

**४. सविस्तरम् उत्तरं लिखत।**

(१) कलानां व्याख्यां स्पष्टयत।

(२) मेदोधराकलायाः विषये सविस्तरं लिखत।

(३) आयुर्वेदानुसारम् आधुनिकशास्त्रानुसारं च कलां तुलनात्मकरीत्या स्पष्टं कुरुत।

**५. यथायोग्यमुत्तरं संयोजयत।**

(१) मज्जा - मांसस्नेहः

(२) रक्तमेदः - वपावहनम्, अधोत्वक्

(३) वसा - स्थूलास्थि

(४) मेदः - अण्वस्थि

•

| ९ | त्वक्शारीरम् |
|---|---|

त्वचः व्याख्या-तस्य खल्वेवं प्रवृत्तस्य शुक्रशोणितस्याभिपच्यमानस्य क्षीरस्येव सन्तानिकाः सप्त त्वचः भवति। **तासां प्रथमा अवभासिनी नाम, या सर्ववर्णानवभासयति पञ्चविधां च छायां प्रकाशयति, सा ब्रीहेरष्टादशभागप्रमाणा सिध्मपद्मकंटकाधिष्ठाना। द्वितीया लोहिता नाम, व्रीहिषोडशभागप्रमाणा, तिलकालकन्यच्छव्यं व्यंङ्गाधिष्ठाना। तृतीयां श्वेता नाम व्रीहिद्वादशभागप्रमाणा, चर्मदलाजगल्लीमशकाधिष्ठाना; चतुर्थी ताम्रा नाम व्रीहेरष्टभागप्रमाणा, विविधकिलास कुष्ठाधिष्ठाना; पंचमी वेदिनी नाम, व्रीहिपञ्चभागप्रमाणा कुष्ठविसर्पाधिष्ठाना: षष्ठी रोहिणी नाम व्रीहिप्रमाणा ग्रन्थ्यपच्यर्बुद-श्लीपदगलगण्डाधिष्ठाना: सप्तमी मांसधरा नाम, ब्रीहिद्वयप्रमाणा भगन्धरविद्रध्यर्शोऽधिष्ठाना। यदेतत् प्रमाणं निर्दिष्टं तन्मांसलेष्ववकाशेषु, न ललाटे सूक्ष्माङ्गुल्यादिषु, यतः वक्ष्यत्युदरेषु व्रीहिमुखेनांगुष्ठोदरप्रमाणमवगाढं विध्येदिति ॥ सु.शा. ४/४॥**

यथा अग्निना उष्णीकृते दुग्धे सन्तानिका निर्माणे भवति पूर्णपक्वदुग्धे अत्यधिकं क्षीरसन्तानिका उत्पद्यते तद्वदेव त्रिदोषैः विशेषतया पित्तेन गर्भस्य पृष्ठभागे त्वक्निर्माणं भवति।

| क्रम | त्वचः नाम | प्रमाणम् | रोगाधिष्ठानम् |
|---|---|---|---|
| (१) | अवभासिनी | $\frac{1}{18}$ व्रीहि | सिध्मम्, पद्मकंटक |
| (२) | लोहिता | $\frac{1}{16}$ व्रीहि | तिलकालकम्, न्यच्छम्, व्यंगम् |
| (३) | श्वेता | $\frac{1}{12}$ व्रीहि | चर्मदलम्, अजगल्ली, मशकम् |
| (४) | ताम्रा | $\frac{1}{08}$ व्रीहि | किलासम्, कुष्ठम् |
| (५) | वेदिनी | $\frac{1}{05}$ व्रीहि | कुष्ठम्, विसर्पम् |
| (६) | रोहिणी | १ व्रीहि | ग्रंथी, अपची, अर्बुदम्, शिलपदम्, गलगण्डम् |
| (७) | मांसधरा | २ व्रीहि | भगंदरम्, विद्रधि, अर्शम् |




**त्वक्प्रकाराः**

आधुनिककाले प्रत्यक्षी कृत त्वचः रचना - सूक्ष्मदर्शकयन्त्रेण त्वचः परीक्षणं कुर्मश्चेत् बहिरारभ्यः अन्तः भागे निम्नं स्तरं मिलति। (१) शांङ्गं वा कठिनस्तरं (Horney layer) स्तरमिदं 'एपिथेलिअल सेल' इत्यस्य स्तरैः; निर्मिता भवति। अस्य स्तराः बहिः भवन्ति अतः पीडनेन परिस्पन्दनेन च कठिनतमं भवति इयमनवस्था पादयोः तले, हस्तयोः मध्यभागे विशेषतश्च अङ्गुलीनां मूलभागे घट्टेषु सहजतया दृश्यते। अत एव इदं शांङ्गं वा कठिनं स्तरं कथ्यते। यत्र अधिकं पीडनं भवति तत्र अस्य स्तरकाठिन्यं वर्धते। (२) स्वच्छं स्तरम् (stratum lucidum) अस्मिन् स्वच्छस्तराणि भवन्ति, अस्य दैर्घ्यम् अधिकं न भवति। (३) कणमयस्तरम् (Stratum granulosum) अस्मिन् कणयुक्तस्तरस्य द्वयं वा त्रयम् स्तरं भवति। इमानि स्तराणि चिपिटानि कठिनानि परं माल्पिघिअन् स्तरस्य मध्यस्था (संक्रणावस्थिक - Transitional) भवति। (४) वर्णमयस्तरम् - (Malpighian layer) इदं स्तरं बहूनां स्तराणां मेलनेन निर्मीयते। ऊर्ध्वोक्तस्तराणी अस्य स्तरस्य कोषैः निर्मीयते। सर्वोपरि यत् स्तरं भवति तस्य नाशः भवति तदा तदधोगत कोषः (स्तरं) तस्य स्थाने आयाति। अधोपरि प्रति कोषस्तरं इत्थं परिवर्तनं भवति तथा स्तरं कठिनमपि भवति। यदि एतानि स्तराणि सम्मिलितानि भवन्ति तर्हि बाह्यत्वचः निर्माणं भवति।

वर्णयुक्तानां जनानां त्वचि वर्णकं वा रङ्गद्रव्यं भवति येन जनाः, श्यामाः कृष्णाः च दृश्यन्ते। वर्णकस्य अधिकराशिः 'माल्पीघिअन'- स्तरे भवति परं उत्तरोत्तरं न्यूना च भवति। सर्वोपरि कठिनस्तरेऽपि रङ्गद्रव्ये भवति येन रङ्गद्रव्यस्य न्यूनाधिकताकारणात् मनुष्यस्य वर्णः गौरः, श्यामः, कृष्णश्च प्रतिभाति । रङ्गद्रव्यस्य विषये इदं ध्येयं यत् अस्योत्पत्तिः चतुर्थस्तरस्य कोषेण भवति ततश्च इमे रङ्गद्रव्यैः सह सर्वोपरि गच्छति। अनेन स्थानान्तरणेन कोषेषु परिवर्तनमपि भवति। परिवर्तनेन कोषाः कठिनाः भवन्ति रङ्गद्रव्यस्य राश्यपि न्यूना भवति। चतुर्थस्तरे रङ्गद्रव्यस्य वृद्धौ सति त्वचः वर्णः गाढो भवति न्यूनतायां च वर्णः 'नीरक्तः' भवति। किन्तु वर्णस्य यत् ज्ञानं भवति तत्तु बाह्यगतस्तरेणैव भवति। बाह्यत्वचः चतुर्षुस्तरेषु रक्तवाहिन्यः न भवन्ति। एतस्याः पोषणं लसिकाभिः भवति। नर्व नाडीनाम् अग्र (Nerve Fibrils) वर्णमयस्तरस्य कोषेषु भवन्ति। (५) अङ्कुरमयस्तरम् (Papillary layer) - अस्मिन् स्तरे लघूनि अङ्कुराणि भवन्ति। एतानि तान्तवधातुभिः रक्तवाहिनिभिः स्पर्शपिण्डैः (Tactitle corpuscles) नाडीनामग्रैश्च निर्मितानि। हस्तमध्यभागे पादतले अङ्कुराणि दीर्घतमानि, अधिकसंख्यकानि एकरेखागतानि च भवन्ति। एतस्मादेव कारणात् समान्तरतुंगानि भवन्ति। अस्य ऊर्ध्वगतस्तराणि नतानि भवन्ति येन बाह्यत्वचि अपि तुंगानि उत्पन्नानि भवन्ति। एकस्मादेव कारणात् अङ्गुलिषु शंखचक्रादिचिह्नानि उत्पद्यन्ते। आधुनिककाले एतत् सिद्धं जातं यत् एकस्य जनस्य हस्ताक्षराणि अन्येन समानानि भवितुं शक्यते किन्तु अङ्गुलिनां चिह्नं समानं न भवति। अतः मानवस्य परिचयं प्राप्तुं एतत् सहायताप्रदं भवति। (६) जालिमयस्तरम् (Reticular Layer) - अस्मिन् स्तरे जालिका इव तन्तवः प्रसृताः भवन्ति। अस्मिन् रोमकूपः, स्वेदग्रन्थिः, तैलग्रन्थिः केचन् मांसतन्तवश्च भवन्ति। एते मांसतन्तवः रोमकूपैः संबद्धानि भवन्ति। एतानि विहाय वृषणे, शिश्ने, स्तनयोः च त्वचि अपि मांसतन्तवः भवन्ति। अस्याधः उपत्वक् भवति तस्मिन्नेव मेदः, रक्तवाहिन्यः, लसिकावाहिन्यः अवस्थिताः सत्यः ऊर्ध्वगतस्तराणां पोषणं कुर्वन्ति।

अङ्कुरमयं जालिमयं च स्तरं सम्मिल्य अन्तस्त्वक् निर्माणं भवति। अस्य स्थूलता पूर्वोक्त चतुस्तराणाम् अपेक्षया अत्यधिकं भवति।

**'त्वचः प्राचीन-अर्वाचीनस्तरयोः तुलनात्मकं कोष्ठकम्'**

(१) अवभासिनी - Horney layer

(२) लोहिता - Stratum lucidum

(३) श्वेता - Stratum granulosum

(४) ताम्रा - Malpighian layer

(५) वेदिनी - Papillary layer

(६) रोहिणी - Reticular layer

(७) मांसधरा - Subcutaneous tissue and muscles

**त्वचः-कार्याणि**

(१) स्पर्शज्ञानम्

(२) शरीरस्य उष्णतामाननियन्त्रणम्

(३) स्वेदमलनिष्कासनम्

(४) शरीरस्याच्छादनं संरक्षणं च

(५) त्वचि रङ्गद्रव्योत्पत्तिः भवति येन शरीरं विविधवर्णान् रंगानि प्राप्नोति।

(६) शोषणम् - शरीरार्थं यदावश्यकं तदेव ग्राह्यम्।

**स्वाध्यायः**

**१. बहुवैकल्पिकप्रश्नानां योग्यम् उत्तरं चिनुत।**

(१) क्षीरस्येव संतानिका केन संबद्धा?

(क) हृदयेन (ख) कलाया (ग) त्वचा (घ) जरायुणा

(२) आयुर्वेदोक्तं त्वक्स्तराणि कति सन्ति?

(क) ४ (ख) ५ (ग) ६ (घ) ७

(३) $\frac{1}{16}$ व्रीहिः प्रमाणं कस्याः त्वचः?

(क) लोहितायाः (ख) श्वेतायाः (ग) ताम्रायाः (घ) वेदिन्याः

(४) मांसधरा त्वक् इत्यत्र व्याधेः अधिष्ठानमस्ति।

(क) सिध्यम् (ख) कुष्ठम् (ग) किलासम् (घ) भगंदरम्

(५) चतुर्थत्वचः किन्नाम?

(क) लोहिता (ख) श्वेता (ग) ताम्रा (घ) वेदिनी

(६) आधुनिकमतानुसारं त्वचः मुख्यस्तराणि कति?

(क) ५ (ख) २ (ग) ३ (घ) ४

(७) Papillary and Reticular अङ्कुरमयं जालिमयं च स्तरं कस्य भागः?

(क) बाह्यस्त्वक् (ख) अन्तस्त्वक् (ग) कणमयस्तरः (घ) स्वच्छस्तरः

(८) पञ्चविधछाया-प्रकाशित त्वक् का?

(क) अवभासिनी (ख) लोहिता (ग) श्वेता (घ) ताम्रा

**२. प्रश्नानाम् एकेन वाक्येन उत्तराणि लिखत।**

(१) तिलकालकः न्यच्छः, व्यंगः इति व्याधयः कस्मिन् स्तरे भवन्ति।

(२) रोहिणीत्वक्स्तरः कस्य व्याधेः अधिष्ठानम्?

(३) आधुनिकमतानुसारं त्वचः स्तरद्वयम् किम्?

(४) रङ्गद्रव्यस्य उत्पत्तिः कस्मिन् स्तरे भवति?

(५) ताम्रात्वचः प्रमाणं लिखत।

**३. अधोलिखितप्रश्नानां लघूत्तराणि लिखत।**

(१) त्वक्स्तरस्य नामानि प्रमाणानि च लिखत।

(२) त्वचः आयुर्वेदस्तराणांम् आर्वाचीनस्तराणां च तुलनात्मकं वर्णनं कुर्वन्तु

(३) जालिमयस्तरस्य वर्णनं कुर्वन्तु (rericular layer)

(४) मांसत्वचः प्रमाणं लिखत।

**४. सविस्तरम् उत्तरं लिखत।**

(१) आयुर्वेदोक्त त्वयः वर्णनं सविस्तरं क्रियताम्।

(२) अर्वाचीन मते त्वक् वर्णनं सविस्तरं क्रियताम्।

●

# १० मर्मव्याख्या

**किं नाम मर्म? मम नाम मांससिरास्नाय्वास्थिसन्धिसन्निपाताः, तेषु स्वभावत एव विशेषेण प्राणाः तिष्ठन्ति, तस्मात् मर्मस्वभिहतास्तांस्तान् भावानापद्यन्ते॥ सु.शा. ६/१५॥**

**मर्मव्याख्या रचना च**–मांसः, सिरा,–स्नायु,अस्थि, सन्धिः इत्यादीनां संयोगस्थानं मर्म। एतेषु स्वभावादेव विशेषतया प्राणाः भवन्ति। अतः मर्मोपरि आघाते सति जनाः अनेकाव्याध्यावस्थां लभन्ते।

- **मर्माणि नाम मांससिरास्नाय्वस्थिसन्धिसन्निपाताः।**

  **तेषु स्वभावतः एव विशेषेण प्राणाः तिष्ठन्ति॥**
- **मारयन्ति इति मर्माणि ( डल्हणः )**
- **अपि च मरणकारित्वात् मर्म। ( वाग्भटः )**
- येष्वभिहतेषु म्रियन्ते नरास्तानि मर्माणि सुश्रुतेन मर्मस्थानं संरक्ष्य शल्यकर्मकर्तुं कथितमस्ति।
- **मर्म संख्या :**

**''सप्तोत्तरं मर्मशतं शरीरे भवन्ति तानि पञ्चात्मकानि।**

**मांससिरास्नायु तथास्थि सन्धि नान्यानि मर्माणि भवन्ति देहे॥''**

मर्मणां संख्या १०७ (सप्तोत्तरमेकशतम्) वर्तते।

### मर्मस्य प्रकाराः

सप्तोत्तरं मर्मशतम्। तानि मर्माणि पञ्चात्मकानि भवन्ति, तद्यथा–मांसमर्माणि, सिरामर्माणि, स्नायुमर्माणि, अस्थिमर्माणि सन्धिमर्माणि चेति, न खलु मांससिरास्नाय्वस्थिसन्धिव्यतिरेकेणान्यानि मर्माणि भवन्ति, यस्मान्नोपलभ्यन्ते॥ **२॥**

मर्मणां संख्या तेषां निर्माणानुसारं शताधिकसप्त भवन्ति। ते मूलतः पञ्चविभागेषु विभाजिता सन्ति।

(१) मांसमर्म (२) सिरामर्म (३) स्नायुमर्म (४) अस्थिमर्म (५) सन्धिमर्म इत्येतान् पञ्चान् विहाय अन्यत् मर्मस्थानं न भवति। धातून् अङ्गानि च अतिरिक्तं मर्माणि न भवितुं शक्यते।

तत्रैकादश मांसमर्माणि, एकचत्वारिंशत् सिरामर्माणि, सप्तविंशतिः स्नायुमर्माणि, अष्टावस्थिमर्माणि, विंशतिः सन्धिमर्माणि चेति। तदेतत् सप्तोत्तरं मर्मशतम् ॥ **सु.शा. ६/४**॥

पञ्चप्रकारेषु एकादश मांसमर्माणि, एकचत्वारिंशत् सिरामर्माणि, सप्तविंशतिः स्नायुमर्माणि, अष्टौ अस्थिमर्माणि, विंशतिः सन्धिमर्माणि च भवन्ति।

### अङ्गानुसारं मर्मवर्गीकरणम्

तेषामेकादशैकस्मिन् सक्थि भवन्ति, **एतद् इतर** सक्थि बाहू च व्याख्यातौ, उदरोरसर्द्वादश, चतुर्दश पृष्ठे, ग्रीवां प्रत्यूर्ध्वं सप्तत्रिंशत्।

ऊर्ध्वोक्तेषु एकस्मिन् पादे एकादशमर्माणि भवन्ति। तस्याधारेणैव द्वितीयपादस्य बाह्वोः च विवरणं भवति । उदरे उरसि च द्वादश मर्माणि भवन्ति। ग्रीवायाः ऊर्ध्वभागे सप्तत्रिंशत् मर्माणि भवन्ति।

**तत्र सक्थिमर्माणि क्षिप्रतलहृदयकूर्चकूर्चशिरोगुल्फेन्द्रबस्ति जान्वाण्यूर्वीलोहिताक्षाणि विटपं चेति, एतेनेतरत्सक्थि व्याख्यातम्।**

सक्थिगतानाम् एकादशमर्माणां नामानि – क्षिप्रं, तलहृदयं, कूर्चं कूर्चशिरः, गुल्फं, इन्द्रबस्ति, जानु, आणिः, ऊर्वी, लोहिताक्षः विटपश्च अनेनैव अन्यपादस्यापि व्याख्यानं भवति।




**उदरोरसोस्तु गुदबस्तिनाभिहृदयस्तनमूलस्तनरोहिता पलापान्यप स्तम्भौ चेति। पृष्ठमर्माणि तु कटीकतरूण-कुकुन्दरनितम्बपार्श्वसन्धि बृहत्यंसफलकान्यंसौ चेति।**




अन्तराधि मर्मसु उदरोरसोः गुदं, बस्ति, नाभिः, हृदय, स्तनमूलं–स्तरोहितम्, अपलापः अपस्तंभश्च।

पृष्ठमर्मसु कटीकतरूण, कुकुन्दरः, नितम्बः, पार्श्वसंन्धिः बृहती, अंसफलकम्, अंसश्च भवति। उरसः मर्मसु स्तनमूलादि द्वयं, हृदयस्यैकः, उदरस्य त्रयः मर्माणि एकैकानि।

मर्मे :-



**बाहुमर्माणि तु क्षिप्रतलहृदयकूर्चकूर्चशिरोमणिबन्धेन्द्रबस्तिकूर्पराण्यूर्वीलोहिताक्षाणि कक्षधरं चेति, एतेनेतरो बाहुर्व्याख्यातः ॥७॥**

**जत्रुण ऊर्ध्वं (मर्माणि) चतस्त्रो धमन्योऽष्टौ मातृका द्वे कृकाटिके द्वे विधुरे द्वे फणे द्वावपांगौ द्वावावर्तौ द्वावुत्क्षेपौ द्वौ शंखावेका स्थपनी पञ्चसीमन्ताश्चत्वारि श्रृंगाटकान्येकोऽधिपतिरिति।**

**तत्र तलहृदयेन्द्रबस्तिगुदस्तनरोहितानि मांसमर्माणि।**

**एतेषु चत्वारि तलहृदयानि, चत्वारि इन्दबस्तयः, गुदम्, द्वे च स्तनरोहिते मांसमर्माणि भवन्ति।**

**नीलधमनीमातृकाश्रृंगाटकापांगस्थपनीफणस्तन मूलापलापापस्तम्भहृदयनाभिपार्श्वसन्धिबृहतीलोहिताक्षोर्व्यः सिरामर्माणि।**

सिरामर्मसु द्वे नीले, द्वे धमन्यौ, अष्टौ मातृकाः चत्वारि श्रृंगाटकानि, द्वौ अपांगौ, एका स्थपनी, द्वे फणे, द्वे स्तनमूले, द्वौ–अपलापौ, द्वौ **अपस्तंभौ** हृदयं, नाभिः च, द्वे **पार्श्वसन्धी,** द्वे बृहत्यौ, चतस्त्रः लोहिताक्षाः, चत्वारि ऊर्वी–सिरामर्माणि भवन्ति।

**आणीविटपकक्षधरकूर्चकूर्चशिरोबस्तिक्षिप्रांसविधुरोत्क्षेपाः स्नायुमर्माणि॥**

**स्नायुमर्माणि–चत्वारः आणि, द्वौ विटपौ, द्वौ कक्षधरौ**

**चत्वारः कूर्चाः, चत्वारिः कूर्चसिराषि चतस्त्रः बस्तयः, चत्वारः**

**क्षिप्रः, द्वौ अंसौ, द्वौ विधुरौ द्वे उत्क्षेप स्नायुमर्माणि चास्ति।**

**कटीकतरूणनितम्बांसफलकशंखास्तवस्थि मर्माणि ॥**

**अस्थिमर्मसुद्वौ कटिकतरूणे, द्वौ नितम्बौ, द्वे अंसफलके, द्वे शंखास्थिनी मर्मेति प्रसिद्धम्।**

**जानुकूर्परसीमन्ताधिपतिगुल्फमणिबन्धकृकुन्दरावर्तकुकाटिकाश्चेति सन्धिमर्माणि॥**

सन्धिमर्मसु द्वौजान्वोः, द्वौः कूर्परयोः, पञ्च सीमन्तस्य, अधिपतेश्च, द्वौः गुल्फयोः, द्वौः मणिबन्धयोः, द्वौः कुकुन्दरयोः द्वयोः आवर्तयोः, द्वयोः कृकाटिकयोश्चेति मर्माणि सन्धिमर्माणि।

**परिणामानुसारं मर्मवर्गीकरणम्**

**तान्येतानि पञ्चविकल्पानि मर्माणि भवन्ति।**

**तद्यथा–सद्यः प्राणहराणि, कालान्तरप्राणहराणि,**

**विशल्यघ्नानि, वैकल्यकराणि, रूजाकराणीति। तत्र**

**सद्यः प्राणहराण्येकोनविंशतिः, कालान्तरप्राणहराणि त्रयस्त्रिंशत्, त्रीणि विशल्यघ्नानि, चतुश्चत्वारिंशद्**

**वैकल्यकराणि, अष्टौ रूजाकराणीति॥**

परिणामानुसारं मर्मणः पञ्चप्रकाराः भवन्ति

(१) सद्यःप्राणहराणि (२) कालान्तरप्राणहराणि (३) विशल्यघ्नानि (४) वैकल्यकराणि (५) रूजाकराणि इति। एतेषु प्राणहरमर्माणि एकोनविंशतिः, कालान्तरप्राणहराणि त्रयस्त्रिंशत्, विशल्यध्नानि त्रिणि, त्रयः, वैकल्यकराः चतुश्चत्वारिंशद् रूजाकरमर्माणि अष्टौ भवन्ति।

(१) सद्यःप्राणहराणि : गुढ हृदयवस्त्यादयोपदि आघात भवति तर्हि सद्यः मरणं प्राप्नोति। अतः सद्यःप्राणहृशाळीत्युच्यन्ते।

(२) कालान्तरप्राणहराणि – अपस्तम्भस्तनरोहितस्तनमूलाढयः कालान्तरप्राणहृशाणि मर्माणि सन्ति तस्योवरि आघातेन मनुष्यः शीघ्रं मरणं न प्राप्नोति। किन्तु शीघ्रकालान्तरे व्याधितः बूत्वा म्रियते।

(३) विशल्यघ्नानि – उत्क्षेपयो एवं स्थपन्यः उपरि आघाते भवति तदा मनुष्ये शल्यस्योपस्थितिं यावत् अस्ति तावत् जीवेत्। यदि शल्यमाहरति तर्हि तत्क्षणमेव मनुष्यः मृत्यु प्राप्नोति।

(४) वैकल्यकर – मर्मोपरि आघातेन तस्य तस्य अङ्गस्य विकलतां प्राप्नोति।

(५) रूजाकर – गुल्फ मणिबन्धकूर्चशिरादि मर्माणि बहुवेदनाकारि स्वभावात् रूजाकरणाीत्युच्यने।

**''सुश्रुतानुसारं मर्मप्रकाराः''**

**( रचनानुसारम् )**

| मांसमर्माणि | सिरामर्माणि | स्नायुमर्माणि | अस्थिमर्माणि | सन्धिमर्माणि |
|---|---|---|---|---|
| (११) | (४१) | (२७) | (०८) | (२०) |
| तलहृदयानि–४ | नीले–२ | आणि–४ | कटिकतरूणे–२ | जानू–२ |
| इन्द्रबस्तयः–४ | धमन्यौ–२ | विटप–२ | नितम्बौ–२ | कूर्परौ–२ |
| गुदम् – १ | मातृकाः–८ | कक्षधरौ–२ | अंसफलक –२ | सीमन्ताः–५ |
| स्तनरोहित–२ | श्रृगांटकाः–४ | कूर्चाः–४ | शंख–२ | अधिपतिः–१ |
| | अपांगाः–४ | कूर्चसिरांसि–४ | | गुल्फौ–२ |
| | स्थपनी–१ | बस्तिः–१ | | कुकुन्दरौ–२ |
| | फणा–२ | क्षिप्राः–४ | | आवर्तौ–२ |
| | स्तनमूले–२ | अंस–२ | | कृकाटिके–२ |
| | अपलाप–१ | विधुर –२ | | |
| | अपस्तम्भौ–२ | उत्क्षेप –२ | | |
| | हृदयम्–१ | | | |
| | नाभिः–१ | | | |
| | पार्श्वसन्धी–२ | | | |
| | लोहिताक्षाः–४ | | | |
| | उर्वी–४ | | | |
| | बृहती–२ | | | |

**चिकित्सायां मर्मस्य महत्वम्**

**मर्मचिकित्सयाः महत्त्वम्**

**मर्माणि शल्यविषयार्धमुदाहरन्ति**

**यस्माच्च मर्मसु हता न भवन्ति सद्यः।**

**जीवन्ति तत्र यदि वैद्यगुणेन केचित्**

**ते प्राप्नुवन्ति विकलत्वमसंशयं हि ॥ सु.शा. ६/३४-३५॥**

**शल्यतन्त्रे मर्ममहत्त्वम्**-यदि मर्मोपरि आघातः भवति तर्हि तत्कालैव मनुष्यस्य अस्तित्वनाशः भवति। वैद्यस्य कौशल्येन कश्चित् रक्षितः भवति तथाऽपि तस्य वैकल्यं (पङ्गुता) तु निःसंशय भवति। अतः शल्यतान्त्रिकाः मर्मणः शल्यविषयाधर्मपि कथयन्ति।

**स्वाध्यायः**

**१. बहुवैकल्पिकप्रश्नानां योग्यम् उत्तरं लिखत।**

(१) मर्मणां संख्या कति सन्ति?

(क) ०३ (ख) १०७ (ग) ११० (घ) ८०

(२) सद्यप्राणहरमर्मणः संख्या कति?

(क) ३३ (ख) ४४ (ग) १९ (घ) ०३

(३) सिरामर्मणः कति संख्या?

(क) २७ (ख) २० (ग) ११ (घ) ४१

(४) कालान्तरप्राणहरमर्मणः संख्या कति?

(क) ४४ (ख) ३३ (ग) ११ (घ) ४१

(५) प्रत्येकस्यां शाखायां कति मर्माणि सन्ति?

(क) ११ (ख) ४४ (ग) १४ (घ) ०९

(६) मातृका मर्माणि संख्या कति सन्ति?

(क) ०५ (ख) ०७ (ग) ०८ (घ) ०४

(७) वैकल्यकरमर्माणि कति भवन्ति?

(क) ४४ (ख) २२ (ग) ५४ (घ) ३२

(८) मांसमर्मणः कति संख्या सन्ति?

(क) ३३ (ख) २२ (ग) ११ (घ) ४४

**२. प्रश्नानाम् एकेन वाक्येन उत्तराणि लिखत।**

(१) उदरोरसोर्कति मर्माणि भवन्ति?

(२) सिराममर्माणि कति भवन्ति?

(३) क्षिप्रमर्मण: किं स्थानम्?

(४) इन्द्रबस्तिन: किं स्थानम्?

(५) रूजाकरमर्मस्य: संख्या का?

**३. संक्षेपेण उत्तरं लिखत।**

(१) मर्मणां व्याख्यां कुरुत।

(२) सद्य:प्राणहरमर्म नाम किम्?

(३) विशल्यघ्नमर्म नाम किम्?

(४) मर्मणां प्रकारान् लिखत।

(५) रचनानुसारं मर्मविषये लिखत।

**४. सविस्तरम् उत्तराणि लिखत।**

(१) मर्मण: आवश्यकतां लिखत।

(२) महागतमर्माणि विलिख्य कति मर्माणि कानि च तल्लिखत।

(३) परिणामानुसार मर्मस्य प्रकारं लिखत च तानि स्पष्टयत।

●

# विभाग : २ क्रियाशारीरम्

# ११ आयुर्वेदस्य मूलभूतसिद्धान्ताः

शास्त्राणाम् अस्तित्वं तेषां मूलभूतसिद्धान्तेषु एव आधारितं भवति। तथैव आयुर्वेदशास्त्रस्य वैशिष्टयम् अपि तस्य आधारभूतेषु सिद्धान्तेवेव वर्तते। एते सिद्धान्ताः आयुर्वेदस्य आधारस्तम्भाः विद्यन्ते। तेषु क्रियाशारीरविभागस्य सिद्धान्ताः अत्र प्रदत्ताः वर्तन्ते।

**१. मूलभूतज्ञानम्**

कस्यापि शास्त्रस्य अस्तित्वं वा प्रमाणिकरणं तथा च आधारशिला तस्य मूलभूतसिद्धान्तेषु एव आधारितं भवति। आयुर्वेदस्य मौलिकाः सिद्धान्ताः आयुर्वेदस्य मुख्यं कशेरुकास्थि कथ्यते। एते सिद्धान्ताः आयुर्वेदस्य आधारस्तम्भाः वर्तन्ते।

आयुर्वेदस्य अनेके मूलभूतसिद्धान्ताः सन्ति। एतेषां सिद्धान्तानां कारणेन आयुर्वेदस्य स्वरूपं विज्ञानरूपेण प्रस्थापितं वर्तते।

**मूलभूतसिद्धान्ताः**

पञ्चमहाभूतानि, त्रिदोषाः, त्रिगुणाः, त्रीणि सूत्राणि, सप्तधातवः, षट् पदार्थाः, रसादिपञ्चपदार्थाः, आत्मा-परमात्मा, चतुष्पासिद्धान्तः, दोषधातुमलमूलं हि शरीरम्, लोकपुरुष साम्य-सिद्धान्तः, चतुर्विंशतिः एवं पञ्चविंशतिः पुरुषाः, पुनर्जन्म, मोक्षः, अन्यविषयाः च।

**(१) पञ्चमहाभूतानि**




आकाशः, वायुः, अग्निः, जलम्, पृथ्वी च एतानि पञ्चमहाभूतानि सन्ति।

**महाभूतानि खं वायुरग्निरापः क्षितिस्तथा।**

**शब्दः स्पर्शश्च रूपं च रसो गन्धश्च तद् गुणाः॥** (च. शा. १/२७)

शब्दः, स्पर्शः, रूपम्, रसः गन्धः च क्रमशः एतेषां स्वाभाविकगुणाः सन्ति। एतेषां मात्राः परमाणुषु निहिताः भवन्ति। ताः मात्राः ''तन्मात्रा'' इति नाम्ना ज्ञायन्ते। महाभूतानाम् उत्पत्तिः तन्मात्रातः भवति।

| तन्मात्राः | महाभूतानि |
|---|---|
| शब्दः | आकाशः |
| शब्दः, स्पर्शः | वायुः |
| शब्दः, स्पर्शः, रूपम् | अग्निः |
| शब्दः, स्पर्शः, रूपम्, रसः | जलम् |
| शब्दः, स्पर्शः, रूपम्, रसः, गन्धः | पृथ्वी |

संसारस्य सर्वे पदार्था: पञ्चभौतिका: सन्ति।

**सर्वद्रव्यं पाञ्चभौतिकम् अस्मिन्नर्थे। ( च.सू. २६/१० )**

औषधीषु, अन्नेषु, पुरुषेषु च एते सर्वदा विद्यमाना: भवन्ति। येषु पदार्थेषु यस्य महाभूतस्य मात्रा अधिका भवेत्। स: पदार्थ: तेन महाभूतेन ज्ञायते। यथा यदा पृथ्विमहाभूतस्याधिकता भवति तदा स पदार्थ: पार्थिव: इति ज्ञायते। क्रमश: जलीय: आग्नेय: इत्यादि।

**(२) त्रिदोषवर्णनम्**

किं नाम् दोष: ?

**प्रकृत्यारंभकत्वे सतिस्वातन्त्र्येण दृष्टिकतृत्वं दुष्टिकर्तृत्वात् दोषत्वम्।** (विजयरक्षित)

वात-पित्त-कफ़ा: एते त्रिदोषा: कथ्यन्ते। यदा ते प्रकृतावस्थायां भवन्ति तदा शरीरं धारयन्ति तथा विकृतावस्थायां भवन्ति तदा ते विकारान् उत्पादयन्ति। एते त्रिदोषा: वायु-सूर्य-चन्द्रमा समाना: इत्यैव परिगण्यन्ते।

**विसर्गोदानविक्षेपौ: सोमसूर्यानिला यथा।**

**धारयन्ति जगद्देहं कफपित्तानिलास्तथा॥** (सु.सू. २१/८)

यथा ''चन्द्रमा'' पोषणेन, ''सूर्य:'' पाचनेन तथा शोषणेन एवं ''वायु:'' गत्या अखिलसंसारस्य सञ्चालनं कुर्वन्त: सन्ति तथैव एते त्रिदोषा: शरीरं धारयन्ति।

**प्रकृतिनिर्माणकर्तृत्वात् एवं स्वतन्त्रापूर्वकं**

**दृष्टिकर्तृत्वात् दोष इति नाम्ना आयुर्वेदे वर्तते।**

त्रिदोषेषु प्रकृतिनिर्माणक्षमता एवं स्वतन्त्रापूर्वकं शरिरं दोषयुक्तकरणस्य प्रवृत्ति: अपि भवति। अनेन प्रकारेण दोषाणां साम्यताम् विषमतां च ज्ञात्वा अनुकृत्य च रोगमुक्त: भवितुं शक्यते।

**(३) त्रिगुणवर्णनम्**

प्रत्येकं पदार्थस्य संघटनं पाञ्चभौतिकं भवति। किन्तु एतेषां पदार्थानां निर्माणं त्रिगुणानां माध्यमेन एव भवति। अत: सत्त्वरजमश्चेति महागुणा: प्राक्ता:।

**सत्त्वरजतमश्चेति त्रयो प्रोक्ता महागुणा:।**

शार्ङ्गधर: पू.ख. अ. ५

जिज्ञासा, प्रेरणा एवं प्रेरणानिवृत्ति: त्रिगुणै: एव स्पष्टं भवति। पृथिव्यां विद्यमानानां सर्वेषां पदार्थानां पाञ्चभौतिकत्वं वर्तन्ते। अनेन सह तेषां पदार्थानां त्रिगुणात्मकत्वम् अपि च विद्यते।

**सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रज:।**

**गुरुवरणकमेव तम: प्रदीपवच्चार्थतो वृत्ति:॥** (सा.का. १३)

सत्त्वगुण: लघु:, प्रकाशक:, ज्ञानदायक:, प्रिय:, अभीष्टफलदायक: च प्रोक्त:। रजोगुण: उपष्टम्भक:, प्रवर्तक:, चञ्चल एवं गतिमान् अस्ति। तमोगुण: गुरु:, आवरक:, नियामकश्च अस्ति। त्रय एव विरुद्धधर्मयुक्ता: भूत्वा अपि परस्परं मिलित्वा प्रयोजनं सिद्धं कुर्वन्ति। यथा दीपे अग्नि:, तैलम्, ज्योति:, परस्परं विरोधितत्त्वधारिण: खलु ! किन्तु मिलित्वा प्रकाशरूपं कार्यं सुसम्पादयन्ति।

**आयुर्वेदे त्रयाणां गुणानाम् उपादेयता**

| गुणः | रूपम् | |
|---|---|---|
| सत्वगुणः | लघुः | सात्त्विकः |
| रजोगुणः | गतिशीलः | राजसिकः |
| तमोगुणः | गुरुः | तामसिकः |

**(४) लोकपुरुषसाम्यसिद्धान्तः**

यावन्तः मूर्तिमन्तः भावाः लोकेषु विद्यन्ते, तावन्तः पुरुषेः अपि भवन्ति। तथा च यावन्तः मूर्तिमन्तः भावाः पुरुषेषु प्राप्यन्ते, तावन्तः एव जनाः संसारेष्वपिच वर्तन्ते।

लोकपुरुषेषु निहितानाम् प्रमुखभावानाम् एवं च तन्मध्ये साम्यतां दर्शयितुं उदाहरणानि।

| **लोकपुरुषः** | **भावः** |
|---|---|
| पृथ्वी | मूर्तिः (शरीरम्) |
| जलम् | क्लेदः |
| अग्निः | अभिसन्तापः |
| वायुः | पृथ्वी |
| आकाशः | सुषिरः |
| इन्द्रः | अहङ्कारः |
| आदित्यः | आदानम् |
| सत्ययुगः | बाल्यावस्था |
| त्रेतायुगः | युवावस्था |
| द्वापरयुगः | वृद्धावस्था |
| कलियुगः | रोगयुक्तः देहः |
| युगान्तः | मृत्युः |

**लोके विततमात्मानं लोकं चात्मनि पश्यतः।**
**परावरदृशः शान्तिर्ज्ञानमूला न नश्यति॥** (च.शा. ५/२०)

लोकेषु स्वस्मिन् आत्मनि लोकं पश्यन्तः तत्त्वज्ञानिनां पुरुषाणां शान्तिः कदापि नष्टा न भवति। ज्ञानस्य कारणात् पुरुषः दुःखी न भवति।

**क्रिया व्याख्या**

निरुक्ति - **प्रवृत्तिस्तु खलु चेष्टाकार्यार्था, सा एव क्रिया, कर्म, यत्नः, कार्यसमारंभश्च।**

(च.वि. ८/७७)

अर्थात् - कार्यम्, गतिविधिः, चलनम्, प्रवृत्तिः, आदयः।

किमपि कार्यं साधयितुं या चेष्टा क्रियते सा एव क्रिया। **सुश्रुतेन अपि क्रियायाः वर्णनम् अनेन प्रकारेण कृतम्।**

**चिकित्साक्रिया - या ह्युदीर्णं शमयति नान्यं व्याधिं करोति च।**

**सा क्रिया, न तु या व्याधिं हरत्यन्यमुदिरयेत॥**

**( सु.सू.३५/२७ )**

**अस्य तात्पर्यं यत् उत्पनानां रोगाणां शमनं करोति, अन्य व्याधीन् न उत्पादयति सा एव क्रिया उच्यते। किन्तु या मूल- रोगं शरीरे चाल्यमाना पाचन उत्सर्जनादि क्रियाः अत्र क्रिया शब्देन वर्ण्यते। नाशयति एवम् अन्यान् रोगान् उत्पादयति सा क्रिया नास्ति।**

**शारीरदोषः, मानसदोषः च**

**शरीरंसत्त्वसंज्ञं च व्याधीनां आश्रयो मतः**

(च.सू.१/५५)

शरीरम् एवं मनः, पृथक्-पृथक् अथवा संयुक्तस्वरुपेषु व्याधीनाम् आश्रयः भवति।

**शारीरदोषाः**

**वायुःपित्तं कफश्चोक्तः शारीरो दोषसग्रहः।**

(च.सू.१/५७)

- वातः, पित्तम्, कफः च एते त्रयः शारीरदोषाः कथ्यन्ते।

**मानसदोषाः**

**मानसः पुनरुद्दिष्टो रजश्च तम एव च।**

(च.सू.१/५७)

**(८) शरीरशारीरयोः भेदः**

**शरीरम् - शीर्यते इति शरीरम्।**

अर्थात् यस्य निरन्तरं नाशः भवति तत् शरीरम् । शरीरे प्रत्येकं क्षणं धातूनां पाकः (Metabolism) भवति। तथा च स्वभावकालानुगुणं शरीरस्य केशिकानाम् ऊर्जाणां च प्रति क्षणं नाशः (Catabolism) तत् शरीरं कथ्यते।

**शारीरम् - शरीरम् अधिकृत्य कृतं तन्त्रं शारीरम् ।**

अर्थात् शरीरसम्बन्धिशास्त्रं ''शारीरम्'' उच्यते। तत्रापि प्रकारद्वयं वर्तते।

१. रचनाशारीरम् -Human Anatomy २. क्रियाशारीरम् - Human Physiology.

**(९) पुरुषनिरूपणम्**

**पुरुषः - पुरि शरीरे शेते इति पुरुषः। ( चक्रपाणिटीका. च. शा. १/१६ )**

शरीरे यः आत्मा शयनं करोति सः एव पुरुषः प्रोक्तः।

**व्युत्पत्तिः** - ''पुर'' (अग्रगमने) धातोः उत्पन्नः पुरुषः शब्दः अयम्।

अर्थात् एकस्मात् शरीरात् द्वितीयं शरीरं प्रति गमनलक्षणम्। पुरुषाणां विषये चरकः विवृणोति यथा;

१. अतिवाहिकः पुरुषः (सूक्ष्मशरीरम्)

२. राशिपुरुषः (संयोगपुरुषः)

३. षड्-धात्वात्मकपुरुषः (कर्मपुरुषः/चिकित्स्यपुरुषः)

**अतिवाहिकः पुरुषः ( सूक्ष्मशरीरम् )**

**पूर्वोत्पन्नसक्तं नियतं महदादि सूक्ष्मपर्यन्तम्।**
**संसरति निरूपभोगं भावैरधिवासितं लिङ्गम्॥**

(सांख्यकारिका)

अस्य तात्पर्यार्थः एतदेव यत् – संसारस्य यदा उत्पत्तिः जाता तदा प्रकृतिद्वारा एतत् सूक्ष्मशरीरम् अपि उत्पन्नम्। अतः पुरुषोऽयं पूर्वोत्पन्नः वर्तते। प्रकृत्या पुरुषस्य कृते भिन्नं भिन्नं सूक्ष्मशरीरम् उत्पन्नम् सञ्जातम्। शरीरमेतत् देवः, मनुष्यः, पशुःपक्षी इत्यादि योनिषु संयुक्तं न भवति। कस्मिन् अपि स्थाने व्यवधानेन विना गन्तुं शक्नोति। एतत्तु पाषाणे, शिलायां च अप्रतिहतगत्या प्रवेष्टुं शक्नोति।

**राशिपुरुषः ( संयोगपुरुषः )**

**बुद्धीन्द्रियमनोऽर्थानां विद्याद् योगधरं परम्।**
**चतुर्विंशतिको ह्येषः राशिः पुरुषसंज्ञकः॥** (च.शा.१/३५)

मनः, बुद्धिः, इन्द्रियाणि, अर्थः, आत्मा च चतुर्विंशतितत्त्वान्वितः पुरुषोऽयं ''राशिपुरुषः'' कथ्यते। अत्र अर्थस्य स्थाने पञ्चमहाभूतानां तात्पर्यं गृहितमस्ति।

**२४ तत्त्वानि यथा :**

- मनः + दशेन्द्रियाणि + अर्थः (पञ्चमहाभूतानि) = १६ तत्त्वानि (विकाराः)
- अव्यक्तं + महत् + अहङ्कारः + पञ्च-तन्मात्राः = ८ तत्त्वानि (प्रकृतयः)

आद्रत्य = २४ तत्त्वानि

**षड्-धात्वात्मकपुरुषः ( कर्मपुरुषः/चिकित्स्यपुरुषः )**

**खादयश्चेतनाषष्ठा धातवः पुरुषः स्मृतः।**
**पुनश्च धातुभेदेन चतुर्विंशतिकः स्मृतः। मनो देशेन्द्रियाण्यर्थाः प्रकृतिश्चाष्टधातुकी ॥** (च.शा.१/१६-१७)

अर्थात् आकाशः, वायुः, अग्निः, जलम्, पृथ्वी एवं षष्ठतमा चेतना (आत्मा) एते पुरुषसंज्ञया ज्ञायन्ते। अत्र चेतना शब्दः आत्मरूपेण गृहीतः अस्ति। धातूनां भेदेन चतुर्विंशतिकं स्वरूपं चोक्तम्।

**षड्धात्वात्मकपुरुषः एवं चिकित्सा**

**पञ्चमहाभूतशरीरिसमवायः पुरुषः इत्युच्यते। स एव कर्म पुरुषश्चिकित्साऽधिकृतः॥** (सु.सू.१/२२)

अनेन प्रकारेण पञ्चमहाभूतानां चेतनया सह संयोगेन पुरुषनिर्माणं भवति। किन्तु केवलं पञ्चमहाभूतानां संयोगात् जडतायाः एव प्रतीतिः भवति। अत एव आत्मना सह मेलनेन षड्धात्वात्मकः पुरुषः उत्पद्यते। एवञ्च सः पुरुषः चिकित्सायै उपयुक्तः अधिकृतश्च वर्तते। एतस्मात् कारणात् पुरुषोऽयं ''चिकित्स्यपुरुषः'' इति नाम्ना अपि ज्ञायते।

**स्वाध्यायः**

**१. योग्यं विकल्पं चित्वा अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

(१) महाभूतानि कति सन्ति?

(क) द्वे (ख) सप्त (ग) पञ्च (घ) नव

(२) महाभूतानाम् उत्पत्तिः कुतः भवति?

(क) तन्मात्रातः (ख) तत्त्वतः (ग) पुरुषतः (घ) शरीरतः

(३) त्रिदोषेषु प्रथमः दोषः कः?

(क) कफः (ख) पित्तम् (ग) वातः (घ) रजः

(४) वायु-सूर्य-चन्द्राः समानाः के ?

(क) महाभूतानि (ख) त्रिदोषाः (ग) त्रिगुणाः (घ) पुरुषाः

(५) तमोगुणस्य रूपं किम् ?

(क) गतिशीलरूपम् (ख) लघुरूपम् (ग) गुरुपम् (घ) एकमपि न

(६) त्रेतायुगस्य भावः कः ?

(क) बाल्यावस्था (ख) युवावस्था (ग) मृत्युः (घ) वृद्धावस्था

(७) शास्त्रस्य आधारस्तम्भाः के ?

(क) मूलभूतसिद्धान्ताः (ख) शब्दाः (ग) वाक्यानि (घ) पुरुषाः

**२. प्रश्नानाम् एकेन वाक्येन उत्तराणि लिखत।**

(१) आकाशस्य तन्मात्रा का ?

(२) शारीरं कतिविधम् ?

(३) मानसदोषाः कति सन्ति ?

(४) कः पुरुषः चिकित्स्यपुरुषः इति नाम्ना ज्ञायते ?

**३. प्रश्नानां लघुतराणि लिखत।**

(१) त्रिदोषाणां वर्णन कुरुत।

(२) गुणः नाम किम् ? कति गुणाः सन्ति ?

(३) क्रिया अर्थात् किम् ?

(४) २४ तत्त्वानि कानि ?

(५) कस्मात् कारणात् पुरुषः दुःखी न भवति ?

**४. सूचनानुसारं लिखित।**

| अ | | ब |
|---|---|---|
| (१) आकाशः | - | शब्दः स्पर्शः रूपम् |
| (२) वायुः | - | शब्दः |
| (३) अग्निः | - | शब्दः स्पर्शः रूपम् रसः |
| (४) जलम् | - | शब्दः स्पर्शः |

**५. प्रश्नानां सविस्तरम् उत्तरं लिखत।**

(१) पुरुषाणां वर्णनं कुरुत।

(२) महाभूतैः सह गुणानां सम्बन्धं प्रतिपादयन्तु।

•

# १२ दोषवर्णनम्

**दोषः**

संस्कृत साहित्ये ''दोषः'' इत्यस्य सामान्यः अर्थः ''विकारः'' इति वर्णितमस्ति। किन्तु आयुर्वेदे दोषस्य अर्थः वात-पित्त-कफादीनां कृते प्रयुक्तः वर्तते। एते स्वयं दूषिताः भवन्ति मनश्चशरीरं च दूषयन्ति। अथ ते दोषाः कथ्यन्ते।

**निरुक्तिः - दूषयन्ति मनः शरीरं चेति दोषाः।** (सिद्धान्तनिदानः तत्वदर्शिनी)

शार्ङ्गधरोऽपि प्रतिपादयति यत् ''शरीरदूषणादोषाः''। दोषाणाम् अस्माकं शरीरेण सह नित्यसम्बन्धः भवति। सम्बन्धोऽयं स्थायित्वेन भवति। जीविते देहे एते सदैव विद्यमानाः भवन्ति। किन्तु एतेषां स्थितयः सर्वदा परिवर्तिताः भवन्ति। दोषाणां स्वरूपद्वयं वर्तते- प्राकृत विकृतश्च च। महर्षिचरकेन एतयोः द्वयोः स्वरूपयोः ज्ञानं प्राप्तव्यम् इति उपदिष्टम् अस्ति।

**नित्याः प्राणभृतां देहे वातपित्तकफास्त्रयः।**
**विकृता प्रकृतिस्था वा तान् बुभुत्सेत पण्डितः॥**

(च.सू.१८/४८)

तात्पर्यार्थः - वातःपित्तं एवं श्लेष्मा (कफः) आदयः प्राकृतवस्थायां स्थित्वैव शरीरं धारयन्ति तथा विकृतावस्थांयां शरीरं नाशयन्ति। यदा एते बातादिदोषाः स्वस्मिन् स्थानेषु भूत्वा गतिः-उष्मा, स्निग्धता चेत्यादीन्, उत्पादयन्ति, तदा पोषणम् धारणम् च प्रति उत्तरदायीत्वम् वहन्ति। एवं यदा विकृताः भवन्ति तदा धातु-मलादीन् दुषयित्वा देहे रोगान् उत्पादयन्ति। अनेन कारणेन एते ''दोषाः'' इति कथ्यन्ते।

वातादयः शरीरे प्रकृतावस्थायां नैकाः क्रियाः संपादयन्ति। यथा।

वातः - इदं शरीरस्य मूलकं तथा प्राणदायकं द्रव्यमस्ति।

पित्तम् - एतत् शरीरस्य उष्माजनकद्रव्यं वर्तते।

कफः (श्लेष्मा) - शरीरे ओजस्विता बलञ्च प्रददाति।

**दोषसंख्या**

दोषाणां संख्याविषये आचार्यैः वातपित्तकफः इति त्रयः दोषरूपेण परिगण्यन्ते।

उक्तं च-

**वायुः पित्तंकफश्चेति त्रयो दोषा समासतः।**
**विकृताऽविकृता देहं घ्नन्ति ते वर्तयन्ति च॥** (अ.ह्र.सू. १/६)

वात-पित्त-कफाः एते त्रयः दोषाः विकृतीभूत्वा शरीरं नाशयन्ति रोगीकुर्वन्ति च। अविकृताः भूत्वा ते सुस्वास्थ्यं प्रददति। चरकः वर्णयति -

**वायुः पित्तं कफश्चोक्तः शारीरो दोषसंग्रहः।**
**मानसः पुनरुदिष्टो रजश्च तम एव च॥** (च.सू. १/५७)

वातादिदोषैः सह अन्यौ द्वौ दोषौ वर्णितौ वर्तेते।

**रजस्तमश्च मनसो द्वौ च दोषावुदाहृतौ॥** (अ.हृ.सू.१/२१)

दद्यपि ''रजोदोषः'' एवं ''तमोदोषः'' मानसदोषौ इति वर्णितौ स्तः किन्तु शरीरस्य दूषितावस्थायां वातादीनां प्रधानता भवति। यतोहि शारीर वातादीनाम् वातदीनाम् एव विकृतयः भवन्ति एवञ्च ते मनः अपि मलिनं कुर्वन्ति। कामशोकभयादी मानसरोगेषु रजस्तमसोः विकृतिः भवति। तत्रापि आचार्यैः सर्वेषु दोषेषु वातदोषः प्रधानः इत्येव निर्दिष्टमस्ति।

### ( १ ) दोष-रस-गुणानां ऋतुणां सह सम्बन्धः

यद्यपि रसस्य उत्पत्तिविषये प्रधानतमं महाभूतं जलम् अस्ति, तथापि जलेन सह अन्यमहाभूतानां संसर्गात् षड्-रसाः उत्पद्यन्ते। महाभूतानां न्यूनाधिकभावात् संसर्गात् च द्रव्याणां विभिन्नवर्णाः एवं आकृतयः उत्पन्नाः भवन्ति। वस्तुतः अनेन न्यूनाधिक-परिमाणेन अपि च रसाः जायन्ते।

महाभूतानां न्यूनाधिकतायाः मूलकारणं षड्-ऋतव एव सन्ति। यस्मिन् ऋतौ यस्य महाभूतस्य अधिकता वा न्यूनता भवति, तस्मिन् ऋतौ तस्मात् महाभूतात् तस्यगुणानुसारं रसस्य अपि उत्पत्तिः भवति। प्रथमे प्रकरणे यथा पठितं यत् महाभूतानां दोषैः सह प्रत्यक्षसम्बन्धः अस्ति । तस्मात् कारणात् गुणानां अपि सम्बन्धः साहजिकतया भवति नात्र संदेहः। अतः यस्य महाभूतस्य यस्मिन् ऋतौ प्रभावः भवति तस्मिन्नेव ऋतौ गुणदोषाणाम् अपि पारस्परिकरीत्या प्रभावः सम्भवति।

| क्रमः | ऋतुः | मासः | दोष-संचयः | दोष-प्रकोपः | दोष-शमनम् | बलम् | रसवृद्धिः |
|---|---|---|---|---|---|---|---|
| १. | शिशिरः | माघः, फाल्गुनः | कफः | - | - | श्रेष्ठबलम् | तिक्तः |
| २. | वसन्तः | चैत्रः, वैशाखः | - | कफः | - | मध्यमबलम् | कषायः |
| ३. | ग्रीष्मः | ज्येष्ठः, आषाढः | वातः | - | कफः | अल्पबलम् | कटुः |
| ४. | वर्षा | श्रावणः, भाद्रपदः | पित्तम् | वातः | - | अल्पबलम् | अम्लः |
| ५. | शरद् | आश्विनः, कार्तिकः | - | पित्तम् | वातः | मध्यमबलम् | लवणः |
| ६. | हेमन्तः | मार्गशीर्षः, पौषः | - | - | पित्तम् | श्रेष्ठबलम् | मधुरः |

### ( २ ) त्रिदोषाणां वयः-काल-आहारानुगुणं प्रभावः

वयोचितं, कालानुसारं भोजनक्रियायाः च प्रभावः त्रिषु एव दोषेषु प्रत्यक्षरीत्या भवति। वयः अर्थात् मानवदेहस्य अवस्थाः (बाल्यावस्था, युवावस्था, वृद्धावस्था)। एतासु अवस्थासु समुचितं स्वस्थवृत्तस्य पालनं अकरणेन शरीरे रोगोत्पत्तेः महती संभावना अस्ति। सामान्यतया दोषः एवं कालः शरीरस्य अवस्थासु अनेन प्रकारेण प्रभावं जनयति।

| अवस्था | कालः | दोषः | आहारप्रक्रिया |
|---|---|---|---|
| बाल्यावस्था | प्रथमप्रहरः | कफः | भोजनसमये |
| युवावस्था | मध्याह्नः | पित्तम् | पाचनकाले |
| वृद्धावस्था | अपराह्नः | वातः | पाचनान्ते |

**''तत्र सञ्चितानां खलु दोषाणां स्तब्धपूर्णकोष्ठता, पित्तावभासता मन्दोष्मता**

**चाङ्गानां गौरवमालस्यं, चयकारणविद्वेषश्चेति लिङ्गानि भवन्ति।''** (सु.सू.२१/१८)

१. वायुसञ्चयेन कोष्ठे भारः, पूर्णता च अनुभूयते।

२. पित्तसञ्चयेन त्वचि, नखेषु, नेत्रयोः पीतता च भासते।

३. कफसञ्चयेन अग्निमन्दता, अङ्गेषु भारः, आलस्यं च अनुभूयते।

**प्रकृतिनिर्माणे दोषाणां प्रभुत्वम्**

प्रकृतिः मनुष्यस्य शरीरमनक्रियाणां मनोवैज्ञानिकानां च अभिव्यक्तीनां प्राकृतिकं स्रोतः वर्तते।

**शुक्रशोणितसंयोगे यो भवेद्दोषः उत्कटः। प्रकृतिर्जायते तेन...।** (सु.शा.अ ४/६३)

गर्भाधानसमये शुक्रशोणितयो संयोगात् यद्दोषस्य आधिक्यं भवति तदनुसारं देहस्य प्रकृतिनिर्माणं तदा भवति।

सप्तप्रकृतयो भवन्ति-दोषैः पृथक् द्विशः। अर्थात् (i) वातज (ii) पित्तज (iii) कफज (iv) वात-पित्तज (v) पित्त-कफज (vi) वात-कफज (vii) समदोषज (वात-पित्त-कफज) इति सप्त प्रकृतयो सन्ति।

**प्राकृत एवं वैकृतदोष**

त्रयाणां दोषाणां समानत्वम् एव स्वस्थप्रकृतेः लक्षणं विद्यते। किन्तु तेषां दोषाणाम् असमानत्वं विकारं जनयति।

**उत्कटास्वभावस्थितो न प्रकुपितः, द्विविधा उत्कटा वातादया-प्राकृताः**

**वैकृताश्च। तत्र प्राकृताः सप्तविधयाः प्रकृति हेतुर्भूताः, शरीर जन्मानः**

**वैकृताश्च गर्भव्यघातकाः।**

(सु.शा. ४/५३)

उत्कटः (प्रावधानः) अर्थात् सामान्य शारीरिकीसीमायां दोषस्य वृद्धिः। किन्तु सामान्य शरीरसीमातः परे न भवेत् वा देहसीमायाः लङ्घनं न भवेत्। यः दोषः शारीरिकीसीमां लङ्घयित्वा अग्रे याति सः दोषः ''वैकृतदोषः'' उच्यते। दोषोऽयं गर्भं नष्टकर्तुं समर्थः भवति।

आयुर्वेदे आनुवंशिकरूपेण पूर्वनिर्धारिताः रोगाः भवन्ति। यथा कुष्ठरोगः, अर्शरोगः, मधुमेह आदयः। वर्गीकृतेषु रोगेषु जन्मतः वैकृतदोषस्य प्रभावात् गर्भस्य नाशः भवति।

**स्वाध्यायः**

**१. योग्यं विकल्पं चित्वा अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत।**

(१) दोषस्य सामान्यः अर्थः कः?

(क) प्रकारः (ख) गुणः (ग) विकारः (घ) एकोऽपि न

(२) कफदोषस्य अपरं नाम किम्?

(क) श्लेष्मा (ख) तत्त्वम् (ग) वातः (घ) त्रयः एव

(३) तमोदोषः कस्य दोषस्य प्रकारः?

(क) स्वभावदोषस्य (ख) शरीरदोषस्य (ग) प्रकृतिदोषस्य (घ) मानसदोषस्य

(४) रसः कतिविधः?

(क) त्रिविधः (ख) द्विविधः (ग) षड्विधः (घ) एकोऽपि न

(५) शिशिर ऋतौ कस्य दोषस्य सञ्चयः भवति?

(क) कफस्य (ख) वातस्य (ग) रजसः (घ) पित्तस्य

(६) कफदोषस्य कालः कः?

(क) प्रथमप्रहरः (ख) मध्याह्नः (ग) मृत्युः (घ) वृद्धावस्था

(७) महर्षिचरकेन कति प्रकृतिभेदाः प्रतिपादिताः ?

(क) त्रयः (ख) चत्वारः (ग) द्वौ (घ) सप्त

(८) वैकृतदोषः किं नाशयति ?

(क) गर्भं (ख) नेत्रम् (ग) शरीरम् (घ) मनः

**२. प्रश्नानाम् एकेन वाक्येन उत्तराणि लिखत।**

(१) शरीरेण सह केषां नित्यसम्बन्धः भवति ?

(२) पित्तदोषस्य कालः कः ?

(३) स्वस्थप्रकृतेः लक्षणं किम् ?

(४) कफसञ्चयेन किम् अनुभूयते ?

(५) उत्कटः अर्थात् किम् ?

**३. प्रश्नानां लघुत्तराणि लिखत।**

(१) दोषस्य निरुक्तिं लिखत।

(२) वैकृतदोषः कदा प्रभवति ?

(३) दोषाणां शरीरे कः प्रभावः ?

(४) अम्लरसस्य वृद्धिः कस्मिन् ऋतौ भवति ?

(५) प्रकृतिः केषां प्राकृतिकं स्रोतः ?

**४. प्रश्नानां सविस्तरम् उत्तरं लिखत।**

(१) ऋतु-काल-वयानुसारं दोषाणां वर्गीकरणं कुरुत।

(२) देहप्रकृतेः सश्लोकं विवेचनं क्रियताम् ।

●

# १३ वायुदोषः

शरीरस्य सर्वेषां गतिविधिनां कारणभूतः अयं वायुदोषः वर्तते। अस्य दोषस्य शरीरे विशेष महत्त्वम् अस्ति। अमरसिंहः स्वस्मिन् अमरकोशग्रन्थे अपि यत् प्रतिपादयति। वायोः पर्यायाः यथा-मारुतः, मरुत्, समीरः, श्वसन्, स्पर्शन्, सदागतिः,गन्धवाहः, अनिलः, पवनः, जगत्प्राणः, समीरणः, इत्यादयः।

**व्युत्पत्तिः**

**गतिगन्धोपादानार्थस्य वा धातोः त प्रत्यये वात इति रूपम् ।** (च.शा.७/१५)

''वा'' धातुः गतिसूचकः। अनेन सह उत्साहस्य सम्बन्धः अस्ति यत् अत्र निरुक्त्या स्पष्टः कृतः।

**निरुक्तिः**

**उत्साहेन च हिंसायां सूचनेनापि गन्धनम्।**

अत्र गन्धनस्य अर्थः उत्साहः, हिंसनम्, सूचनम् च गृहीतः वर्तते। अस्मिन्नर्थे सुश्रुतेन अपि वातशब्दस्य निरुक्तिः कृतोस्ति यथा ; -

**''वा गति गन्धनयोः'' सु.सूत्र २१/५**

**वायोः कार्याणि**

**उत्साहोच्छवासनिः-श्वासचेष्टा धातुगति समा।**
**समोमोक्षो गतिमतां वायोः कर्मविकारजम्॥** (च.सू.१८/४९)

वायुदोषस्य कार्याणि यथा, कार्यं कर्तुम् उत्साहः अर्थात् मानसिक-क्रियाशीलता, श्वासोच्छश्वासक्रिया, शारीरिक-मानसिकचेष्टाः यथा-वाचनम्, उपवेशनम्, उत्स्थापनम् इत्यादयः, रसादीनां धातूनां साम्यतारक्षणम्, मलमूत्रादीनां वेगस्य सम्यक् निर्हरणं च वायोः कर्माणि सन्ति।

**पित्तं पङ्गुः कफ पङ्गुः पङ्गवो मलधातवः।**
**वायुना यत्र नीयन्ते तत्र गच्छन्ति मेघवत्॥** (शा.पू.खं.५/४३)

सर्वा हि चेष्टाः वातेन सह प्राणः प्राणिनां स्मृतः तेनैव रोगाः जायन्ते तेन च एव उपरुध्यते। शरीरस्य गतीनां प्रेरकः वायुः। अनेन विना पित्तदोषः, कफदोषः, सप्तधातवः, मलादि सर्वे घटकाः पङ्गव एव भवन्ति। किमपि कार्यं वायोः सहाय्यं विना न शक्यम्। वायोः महत्त्वं ज्ञात्वैव आचार्यैः वायवे शीर्षस्थं स्थानं प्रदत्तं वर्तते।

**वायुः यन्त्र तन्त्रधरः, प्राण-उदान-समान-व्यान-अपानात्मा, प्रवर्तक चेष्टानाम् उच्च वचानाम्, नियन्ता प्रणेता च मनसः, सर्वेन्द्रियाणाम् उद्योजकः, सर्वेन्द्रियार्थानाम् अभिवोढा, सर्वशरीरधातूव्यूहकरः, सन्धानकरः शरीरस्य, प्रवर्तको वाचः, प्रकृतिः शब्दस्पर्शयोः, श्रोत्रस्पर्शयोर्मूलं, हर्षेत्साहर्योनिः, समीरणो अग्रेः दोषसंशोषणः क्षेप्ता बहिर्मलानां स्थूलाणुस्त्रोतसां भेत्ता, कर्तागर्भाकृतीनाम्, आयुषो अनुवृत्ति प्रत्ययभूतः भवति अविकृतः॥... च.सू.१२/८**

**वायोः प्रकाराः**

**पञ्चात्मा कोष्ठे वायुः प्रादुर्भवति-वाग्भट्टः**

स्थानकर्मयोः भेदात् वायोः पञ्चप्रकाराः शास्त्रे दर्शिताः सन्ति।

**प्राणोदानौ समानश्च व्यानना पान एव च।**

**स्थानस्था मारुताः पञ्च यापयन्ति शरीरिणाम्॥** (सु.नि.१/१२)

आचार्य सुश्रुतः विवृणोति यथा वायोः ''नामस्थानक्रियामये'' पञ्च भेदाः सन्ति। प्राणः, उदानः, समानः, व्यानः, अपानः च। एते स्वस्थाने अव्याहतरीत्या विचरन् सुयोग्यतया शरीरं धारयन्ति।

**वायुदोषस्य स्थानानि**

दोषः सर्वव्यापि खलु! ''ते दोषाः सर्वव्यापिनः'' तथापि येषु अवयवेषु वायुदोषस्य आधिक्यम् अस्ति इति उल्लेखः अष्टाङ्गहृदयग्रन्थे प्राप्यते।

**पक्वाशय-कटी-सक्थि-श्रोत्राऽस्थिस्पर्शनेन्द्रियम्।**
**स्थानं वातस्य तत्रापि पक्वाधानं विशेषतः॥** (अ.हृ.सू १२/१)

अर्थात् पक्वाशये, कट्याम्, सक्थ्याम् (पादयोः), श्रोत्रे (कर्णयोः), अस्थिषु, त्वक्षु च वायोः स्थानानि सन्ति। तेषु पक्वाधाने वायोः विशेषस्थानं परिगण्यते। उपर्युक्तेषु स्थानेषु वातस्य विशेषप्रभावः दृश्यते। वायुदोषस्य विषये अन्यग्रन्थेष्वपि च उल्लेखः विद्यते।

**अधोनाभ्यास्थिमज्जानौ वातस्थानं प्रचक्षते।** (काश्यपसंहिता सू. २७)

आयुर्वेदाचार्याः सामान्यतया वायोः स्थानं नाभितः अधः अस्ति इति प्रतिपादयन्ति।

**वायोः विशेषलक्षणानि -**

**तत्र प्रस्पन्दोद्वहनपूरणविवेकधारणलक्षणो वायुः पञ्चधा विभक्तः शरीरं धारयति।** (सु.सू.१५/१)

- **प्रस्पन्दनम्** - शरीरस्य गतयः यथा-चलनम्, उत्थानम् उपवेशनम्, आदयः।
- **उद्वहनम्** - श्वासः, प्रश्वासः, भाषणम् इत्यादीनां ज्ञानेन्द्रियानां अर्थानां धारणम्।
- **पूरणम्** - फुफ्फुसयो : प्राणवायुपूरणम्, आमाशये आहारपूरणम्।
- **विवेकः** - प्रसादकिट्टभागयोः पृथक्करणम् अर्थात् धातूनाम् एवं मलानां विभाजनम्।
- **धारणम्** - वीर्य-मूत्र-पुरीष-आर्तवादीनाम् अवेग-अवस्थायां धारणम् एवं वेगावस्थायां त्यागः।

उपर्युक्तपञ्चलक्षणानां धारकः वातदोषः एतानि लक्षणानि धृत्वा शरीरं गृह्णाति।

**विशेषकार्यम्**

**उत्साहोच्छ्वासनिश्वासचेष्टावेगप्रवर्तनैः।**
**सम्यग्गत्या च धातूनांमक्षाणां पाटवेन च॥** (अ.ह.सू. ११/१)

वागभटानुसारं वायोः विशेषतया एतानि कार्याणि सन्ति। यथा-शरीरे सर्वदा उत्साहसञ्चारम्, श्वास-निश्वासौ, शारीरिकी चेष्टा, रसादीनां धातूनां सम्यक् गतिः, अक्ष्यादि— इन्द्रियाणां पटुता (विषयग्रहणम्) इत्यादयः।

## स्वाध्यायः

**१. बहुवैकल्पिकान् प्रश्नान् साधयत।**

(१) के सर्वव्यापिनः ?

(क) दोषाः (ख) गुणाः (ग) प्रकाराः (घ) पदार्थाः

(२) वायुः कतिविधः ?

(क) द्विविध (ख) चतुर्विधः (ग) पञ्चविधः (घ) त्रिविधः

(३) वायोः पर्यायाः कस्मिन् ग्रन्थे उल्लिखिताः ?

(क) अमरकोषे (ख) चरकसंहितायाम् (ग) सुश्रुतसंहितायाम् (घ) एकोऽपि न

(४) वातदोषस्य कति स्थानानि ?

(क) २ (ख) ३ (ग) ८ (घ) ६

(५) कश्यपसंहितानुसारं वायोः स्थानं कुत्र ?

(क) नाभितः अधः (ख) कण्ठे (ग) हस्तयोः (घ) शिरसि

(६) वातदोषस्य स्थानं कुत्र विशेषतः ?

(क) पादयोः (ख) अस्थिषु (ग) पक्वाधानं (घ) पित्तेषु

(७) वायोः प्रभावः कतिषु स्थानेषु वर्तते ?

(क) षड्षु (ख) त्रिषु (ग) बहुषु (घ) सप्तसु

(८) प्रसादकिटभागयोः पृथक्करणम् ...

(क) विवेकः (ख) पूरणम् (ग) धारणम् (घ) उद्वहनम्

**२. प्रश्नानाम् एकेन वाक्येन उत्तराणि लिखत।**

(१) वायुना विना दोषधातवः कीदृशाः भवन्ति ?

(२) शरीरे उत्साहसञ्चारं कः करोति ?

(३) वायोः लक्षणानि कति ?

(४) ''ते दोषाः सर्वव्यापिनः'' इति उल्लेखः कस्मिन् ग्रन्थे प्राप्यते ?

(५) शरीरस्य गतीनां नामानि लिखत।

**३. प्रश्नानां लघूत्तराणि लिखत।**

(१) वायोः निरुक्तिं लिखत।

(२) वायोः व्युत्पत्तिं लिखत।

(३) पूरणस्य लक्षणं लिखत।

(४) वातदोषस्य स्थानानि लिखत।

**४. सूचनानुसारं लिखत।**

आचार्य चरकप्रतिपादितं ''वायुः यन्त्रतन्त्रधरः लिखत।

**५. प्रश्नानां सविस्तरम् उत्तरं लिखत।**

(१) वायुदोषस्य विशेषकार्यं प्रतिपादयत।

(२) वायुलक्षणानि पृथक्-पृथक् विवेच्यताम्।

●

# १४ पित्तदोषः

पृथिव्यां स्थितानाम् अन्नजलाद्याहाराणां सेवनानन्तरम्  एतान् विजातीयतत्त्वान् शरीरसात्म्यभावे रूपान्तरयितुं पाचनक्रिया अत्यावश्यकी वर्तते। शरीरे पाचनं, परिणमनं च पित्तदोषद्वारा एव शक्यते।

**व्युत्पत्तिः**

**''तप'' सन्तापे''** (सु.सू. २१/५)

आचार्य सुश्रुतेन पित्तशब्दस्य व्युत्पतिः ''तप'' सन्तापे इति कृतास्ति। सन्तापः तप धातोः ''मयूरव्यंसकादयश्च'' इति सूत्रेण इच्प्रत्ययेन एवं वर्णविपर्ययेन, तकारस्य द्वित्वेन चं पित्त शब्दः उत्पद्यते। पित्तं नपुंसकलिङ्गे अपि + द + क्तः, त आदेशे अल्लोपे न दीर्घः देहस्थे धातुभेदे। तप इत्यस्य अर्थः उष्णिमा वा दहनम् इत्यस्य संदर्भे वर्तते। ''तप दाहे'', ''तप ऐश्वर्ये'' आदिषु अर्थेषु पित्तद्वारा अग्निसत्तायाः स्वीकरणं दर्शितमस्ति।

**निरुक्तिः**

**''तापयतीति पित्तम्''**

अर्थात् यत् शरीरे तापम् उत्पादयति तद् पित्तम्। अतः पित्तस्य पर्यायनामानि वैश्वानरः, वह्निः, अग्निः, पावकः, अनलः चादयः सन्ति।

''अपि दीयते प्राकृतवस्थया रक्ष्यते विकृतावस्थया नाशयते वा शरीरम् अनेन इति पित्तम्''

अर्थात् यत् प्राकृतावस्थायां स्थित्वा शरीरं रक्षति एवञ्च विकृतावस्थायां शरीरं नाशयति तत् पित्तम्।

**पित्तस्य कार्यम्**

**पित्तं पक्त्युष्मदर्शनैः।**

**क्षुतृट्-रुचिप्रभामेधाधीशौर्यतनुमार्दवैः। वा.सू. ११/३**

पक्तेः अर्थः पचनम् अथवा परिणमनम्। सर्वेषु कार्येषु पचनं भूत्वा पृथिव्यां व्याप्तानां बाह्यपदार्थानां घटकेषु परिणमनम् भवति। यथा बाह्याग्निः पदार्थान् दाहयति पाचयति, अर्थात् विघटनं विश्लेषणं च कृत्वा अन्य स्वरूपं प्रददाति। तस्य पाकं करोति, तथैव पित्तमपि खादिताहारं द्वितीयं स्वरूपम् ददाति। तेन धातुः तदुपयोगं कृत्वा पुष्टः भवति। शरीरे पित्ताग्निः सूर्यसमानः प्रतिनिधिः वर्तते।

**पित्तदोषस्य प्रकाराः**

**पाचकं भ्राजकं चैव रञ्जकालोचके तथा।**

**साधकश्चेति पञ्चैव पित्तानामान्यनुक्रमात्॥**

(शा.पू.५/३२)

रसभेदेन पित्तस्य पञ्च प्रकाराः भवन्ति यथा–पाचकपित्तम्, भ्राजकपित्तम्, रञ्जकपित्तम्, आलोचकपित्तम्, साधकपित्तम् च।




**पित्तस्य स्थानानि –**

**स्वेदोरसोलसिकारुधिरमामाशयश्च पित्तस्थानानि, तत्राप्यामाशयो विशेषेण पित्तस्थानम्। (च.सू. २०/८)**

स्वेदः, रसः, लसिका, रुधिरम्, आमाशयः च पित्तस्य स्थानानि सन्ति। तेषु आमाशयः पित्तस्य विशेषस्थानं विद्यते। स्थानकर्मानुसारं पञ्चप्रकारकं पित्तम् आचार्यैः वर्गीकृतमस्ति । तद्यथा ;

| | पित्तम् एव अग्निः | |
|---|---|---|
| प्रकारः | स्थानम् | कर्म |
| पाचकपित्तम् | पच्यमानाशयः आमाशयः मध्यः | पक्तिः–उष्मा, क्षुत्, तृषा |
| रञ्जकपित्तम् | यकृत्–प्लीहा | रसरञ्जनम् |
| साधकपित्तम् | हृदयम् | धी, मेधा |
| आलोचकपित्तम् | नेत्रम् | दर्शनम् |
| भ्राजकपित्तम् | त्वक् | शरीरस्थ–उष्मानियन्त्रणम् |

**पित्तस्य विशेषलक्षणानि –**

**पित्तं तीक्ष्णं द्रवं पूति नीलं पीतं तथैव च।**
**उष्णं कटुरसं चैव विदग्धं चाम्लमेव च॥**

(सु.सू.२१/१)

उल्हणाचार्यः वर्णयति यत् – तीक्ष्णं राजिकामरिचादिवत्। पूति विस्रगन्धिः। नीलं सामावस्थायाम्। पीतं निरामावस्थायाम्। विदग्धं चाम्लमेवेति विरुद्धपाकोपन्नं पुनरम्लरसं भवति, विदग्धाजीर्णसंसृष्टमम्ल रसं भवति इत्यनेन, विदग्धं पित्तमम्लंपित्तमिति रोगविशेषं केचिन्मन्यन्ते।

**विशेषकार्यम्**

**रागपक्तितेजोमेधोष्मकृत् पित्तं पञ्चधा प्रविभक्तमग्निकर्मणाऽनुग्रहं करोति।**

(सु.सू.१५/४)

आचार्य सुश्रुतेन राग-पक्त्यादिकार्यात् पित्तस्य कार्यवर्णनात्मकं लक्षणं कृतमस्ति। इत्यस्मात् लक्षणात् स्वस्थ शरीरस्थप्राकृतपित्तस्य बोधः भवति।

**अग्निपित्तयोः साधर्म्यम् एवं वैधर्म्यम्**

**अग्निरेव शरीरे पित्तान्तर्गतःकुपिताकुपितः शुभाशुभानि करोति।**

शरीरे पित्तम् अग्नेः वा सूर्यस्य प्रतिनिधिः वर्तते। यथा बाह्याग्निः पदार्थानां दहनं कृत्वा, विघटनं कृत्वा च अन्यरूपं प्रददाति। तथैव पित्तं भुक्तानाम् आहाराणां पाकं कृत्वा समुचितोपयोगेन पुष्टं करोति।

**स्वाध्यायः**

**१. बहुवैकल्पिका प्रश्नानाम् उत्तरं लिखत।**

(१) शरीरे पाचनम् एवं परिणमनं केन शक्यम्?

(क) पित्तेन (ख) कफ़ेन (ग) वायुना (घ) पदार्थेन

(२) पित्तं कतिविधम्?

(क) द्विविधम् (ख) चतुर्विधम् (ग) पञ्चविधम् (घ) त्रिविधम्

(३) कस्मात् धातोः पित्तशब्दस्य उत्पतिः?

(क) वा (ख) पठ् (ग) तप (घ) एकोऽपि न

(४) पित्तस्य विशेषस्थानं कुत्र?

(क) कण्ठे (ख) नासिकायाम् (ग) आमाशये (घ) नेत्रे

(५) पित्तं विकृतावस्थायां कं नाशयति?

(क) शरीरम् (ख) शारीरम् (ग) कोशम् (घ) प्रकृतिम्

(६) साधकपित्तस्य स्थानं किम्?

(क) हृदयम् (ख) अस्थिः (ग) त्वक् (घ) यकृत्

(७) नेत्रयोः कस्य पित्तस्य स्थानं भवति?

(क) पाचकपित्तस्य (ख) आलोचकपित्तस्य (ग) भ्राजकपित्तस्य (घ) रञ्जकपित्तस्य

**२. प्रश्नानाम् एकेन वाक्येन उत्तराणि लिखत।**

(१) पक्तेः अर्थः कः?

(२) पित्तं शरीरे किमुत्पादयति?

(३) पित्तस्य स्थानानि कानि?

(४) पाचकपित्तस्य कार्यं किम्?

(५) शरीरस्थ-प्राकृतपित्तस्य बोधः कथं भवति?

**३. प्रश्नानां लघूत्तराणि लिखत।**

(१) पित्तस्य निरुक्तिं लिखत।

(२) पित्तस्य व्युत्पत्तिं लिखत।

(३) कस्याम् अवस्थायां पित्तस्य कः वर्णः इति प्रतिपादयत।

(४) पित्तं कस्य प्रतिनिधित्वं करोति?

**४. सूचनानुसारं लिखत।**

पित्तस्य वैज्ञानिकं लक्षणं लिखत।

**५. प्रश्नानां सविस्तरम् उत्तरं लिखत।**

(१) पित्तदोषस्य कार्यं लिखत।

(२) अग्निपित्तयोः साधर्म्यं चर्चयत।

●

# १५ कफदोषः

''शीर्यते तत् शरीरम्'' अनया उक्त्या शरीरस्य प्रतिक्षणं क्षरणं जायमानं भवति। तथापि मृत्युपर्यन्तं शरीरं रक्षितं भवति, कारणं क्षरणेन सह शरीरस्य रक्षणस्य कार्यमपि सातत्येन चलति। शरीरस्य एतत् व्यवस्थापनं त्रिभ्यः दोषेभ्यः कफदोषद्वारा भवति।

**व्युत्पत्तिः**

**''केन जलेन फलति इति कफः''।** (सु.सू. २१/५)

कफशब्दे 'क' इत्यस्य अर्थः 'जलम्' एवं 'फ' इत्यस्य अर्थः 'फलम्' इति भवति। तात्पर्यं वर्तते यद् यस्मिन् पदार्थे पार्थिवानां तत्त्वानां, विशेषतः जलीयतत्त्वानां च प्रभावेण नैकान् परिणामान् उत्पादयितुं सामर्थ्यं भवति सः कफः कथ्यते। कफस्य नामनि ये श्लेष्मा-बलासे स्तः।

**निरुक्तिः**

**''श्लिष आलिङ्गने''**

श्लेष्मा शब्दस्य व्युत्पत्तिः यथा-आलिङ्गनार्थस्य ''श्लिष आलिङ्गने'' धातोः, मनिन् प्रत्यये सर्वधातुभ्योर्मनिन् इति, गुणे च श्लेष्मेति रूपम्।

**कफस्य कार्यम्**

**श्लेष्मा स्थिरत्वस्निग्धत्वसन्धिबन्धक्षमादिभिः।**

(अ.हृ.सू-११/३)

**शरीरस्थः कफः**

शरीरस्थफफः सदैव स्थिरतां, स्निग्धतां, सन्धिबंधनं, क्षमादीनि कर्माणि करोति।

**सन्धिसंश्लेषणस्नेहरोपणपूरणबलस्थैर्यकृच्छ्लेष्मा पञ्चधा प्रविभक्तं उदककर्मणामनुऽग्रहं करोति।**

कफस्य कार्याणि पञ्चधा विभक्तानि।

- कफः देहे सन्धिभ्यः स्निग्धतां प्रददाति।
- आहारशरीरयोः स्नेहनम्।
- व्रणादीनाम् आरोपणम्।
- देहस्य रिक्तस्थानानि पूरयति।
- स्थिरतायाः बलस्य च रक्षणम्।

अनया रीत्या पञ्चधा विभक्तः भूत्वा, उदककर्माणि च कृत्वा दोषोऽयं शरीराय (लाभः) अनुग्रहं ददाति।

**कफदोषस्य प्रकाराः**

**अवलम्बक्लेदकबोधकतर्पकश्लेषकभेदैः श्लेष्मा।**

(अ.सं.सू-२०)

अष्टाङ्गसङ्ग्रहकारेण श्लेष्मायाः (कफ़स्य) पञ्चभेदाः प्रोक्ताः।

**पञ्चधाभिन्नस्य श्लेषकस्य क्लेदक-बोधक-तर्पक-अवलम्बकान्याहुः।** (डल्हणटीका)

अनेन स्पष्टः भवति यत् मूलतः कफः तु एकः एव वर्तते किन्तु स्थानकार्ययोः भेदात् उक्तटीकया च कफस्य पञ्च -प्रकाराः भवन्ति यथा - अवलम्बककफः, क्लेदकफकः, तर्पकफकः, बोधकफकः, श्लेषकफकः च।

अवलम्बककफ: | क्लेदककफ: | तर्पककफ:

बोधककफ: | श्लेषककफ:

**कफस्य स्थानानि**

**उर: शिरोग्रीवापर्वाण्यमाशयो मेदश्च श्लेष्मस्थानानि,**

**तत्राप्युरो विशेषेण श्लेष्मस्थानम्।** (च.सू. २०/८)

उर:प्रदेश-शिर-ग्रीवा-सन्धि-मेद:-आमाशय: श्लेष्माश्रया:सन्ति। स्थानमस्ति किन्तु विशेषत: कफस्य स्थानं वक्षस्थलं वर्तते।

| | **कफ: चन्द्रमा इव...** | |
|---|---|---|
| प्रकार: | स्थानम् | कर्म |
| क्लेदककफ: | आमाशय: | अन्नस्य क्लेदनम् |
| अवलम्बकफ: | हृदयम् | अवलम्बनम्, त्रिकधारणम् |
| बोधककफ: | जिह्वामूलम् | रसबोधनम् |
| तर्पककफ: | शिर: | मस्तिष्कस्य तर्पणम् |
| श्लेषककफ: | सर्वसन्धि: | सन्धिसंश्लेषणम् |

**कफ़स्य विशेषलक्षणानि**

**माधुर्य्यस्नेहगौरवशैत्यपैच्छिल्यगुणलक्षणा:** (सु.सू.४२/९)

सुश्रुतानुसारं माधुर्यं, स्नेह:, गौरवं, शैत्यं, पैच्छिल्यश्च लक्षणयुक्त: युक्तो कफ: भवति। आयुर्वेदप्रतिपादकेषु विभिन्नेषु ग्रन्थेषु व्याख्या कृतास्ति अत: स्थानभेदानुगुणं वायो: लक्षणं वा गुणानां विषये भिन्नमतानि दरीदृश्यन्ते। तद्यथा;

**गुरुशीतमृदुस्निग्धमधुरस्थिरपिच्छला:।**

**श्लेष्मण: प्रशमं यान्ति विपरीतगुणैर्गुणा:॥** (च.सू.१)

अर्थात् कफ: गुरु:, शीत:, मृदु:, स्निग्ध:, मधुर:, स्थिर: एवं पिच्छलादि लक्षणयुक्त: भवति।

**विशेषकार्यम्**

**स्नेहमङ्गेषुसन्धीनां स्थैर्य बलमुदिर्णताम्।**

**करोत्यन्यान् गुणाश्चापि बलास: स्वा: सिराश्चरन्॥** (सु.शा.७/११)

स्वस्य सिराषु संचार्यमाण: श्लेष्मा अङ्गेषु स्निग्धा, सन्धिषु स्थिरता, बलम्, उत्साहादिगुणकार्याणि करोति।

**स्वाध्याय:**

**१. बहुवैकल्पिका प्रश्नानानां उत्तरं लिखत।**

(१) शरीरस्य व्यवस्थापनं कै: भवति?

(क) दोषै: (ख) गुणै: (ग) पदार्थै: (घ) तत्त्वै:

(२) श्लेष्मा इति कस्य पर्यायी शब्दः ?

(क) वायोः (ख) कफ़स्य (ग) पित्तस्य (घ) मलस्य

(३) कफशब्दे 'क' इत्यस्य अर्थः कः ?

(क) अन्नम् (ख) प्राणः (ग) जलम् (घ) एकोऽपि न

(४) कफस्य कति प्रकाराः ?

(क) द्वौ (ख) पञ्च (ग) त्रयः (घ) चत्वारः

(५) कफस्य विशेषतः स्थानं कुत्र भवति ?

(क) वक्षस्थले (ख) नाभिप्रदेशे (ग) आमाशये (घ) कट्याम्

(६) क्लेदककफस्य कार्यं किम् ?

(क) अन्नस्यक्लेदनम् (ख) मस्तिष्कस्य तर्पणम् (ग) रसबोधनम् (घ) अवलम्बनम्

(७) शिरसि कः कफः वसति ?

(क) अवलम्बककफः (ख) क्लेदककफः (ग) तर्पककफः (घ) बोधककफः

**२. प्रश्नानाम् एकेन वाक्येन उत्तराणि लिखत।**

(१) कफस्य कार्याणि कति-विधानि ?

(२) जिह्वामूले कस्य कफ़स्य प्रभावः दृश्यते ?

(३) कफस्य कति स्थानानि ?

(४) श्लेषककफस्य कार्यं किम् ?

(५) बलासः इत्युक्ते कः ?

**३. प्रश्नाह्यनां लघूत्तराणि लिखत।**

(१) कफदोषस्य निरुक्तिं लिखत।

(२) श्लेष्माशब्दस्य व्युत्पत्तिं लिखत।

(३) कस्याम् अवस्थायां पित्तस्य कः वर्णः इति प्रतिपादयत।

(४) कफस्य कति प्रकाराः ? के च ते ?

**४. यथायोग्यमुत्तरं संयोजयत।**

| अ | ब |
|---|---|
| (१) क्लेदककफः | हृदयम् |
| (२) अवलम्बककफः | आमाशयः |
| (३) तर्पककफः | जिह्वामूलम् |
| (४) बोधककफः | शिरः |

**५. प्रश्नानां सविस्तरम् उत्तरं लिखत।**

(१) कफस्य विशेषकार्यं लिखत।

(२) त्रिदोषेषु कफदोषस्य महत्त्वं चर्चयत।

•

| १६ | प्रकृतिवर्णनम् |
|---|---|

प्रत्येकं मानवस्य एका भिन्ना विशेषता अस्ति। या अन्यमानवेभ्यः समाना न भवति। सर्वेषु मानवेषु भिन्नता तु दृश्यते एव। सैव भिन्नता मानवस्य प्रकृतिः कथ्यते। संक्षेपतः शरीरस्य स्वभावधर्मः, स्ववैशिष्ट्यं चैव प्रकृतिः।

**शुक्रशोणितसंयोगे यो भवेद्दोषः उत्कटः।**
**प्रकृतिर्जायते तेन तस्या मे लक्षणं शृणु।** (सु.शा.अ. ४/६२)

गर्भाधानसमये शुक्रशोणितयोः यद्दोषस्य आधिक्यं स्यात् तदनुसारं देहस्य प्रकृतिः भवति। कस्यापि दोषस्य उष्णताधारेण गर्भाधानात् प्रारभ्य जीवनपर्यन्तं शरीरस्य विशिष्टस्वरूपं प्रकृतिरस्ति।

**देहप्रकृतिः**

**समपित्तानिलकफाः केचिद्गर्भादिमानवाः।**
**दृश्यन्ते वातलाः केचित् पित्तलाः श्लेष्मलास्तथा।।**
**तेषामनातुराः पूर्वे वातलाद्याः सदाऽऽतुराः।**
**दोषानुशयिता ह्येषां देहप्रकृतिरुच्यते॥** (च.सू.७/३९-४०)

केचित् मानवाः गर्भावस्थातः वातलाः, पित्तलाः, श्लेष्मलाः (कफप्रकृतिकाः), समप्रकृतिकाः च भवन्ति। एतेषु समप्रकृतिकाः मानवाः स्वस्थाः तथा पृथक्पृथक् प्रकृतिधारकाः मानवाः सर्वदा रुग्णाः भवन्ति। एतेभ्यः दोषेभ्यः प्रकृतीनां निर्माणं भवति। प्रकृतीनां जन्मकालात् एव देहेन सह सानुकुल्येन एताः ''देहप्रकृतिः'' इति कथ्यन्ते महर्षिसुश्रुतेन अन्यैः आचार्यवर्यैः च देहस्य सप्त देहप्रकृतयः समुल्लिखिताः वर्तन्ते।

चरकमहर्षिणा केवलमत्र चतस्रः प्रकृतयः एव प्रतिपादिताः सन्ति। यदि प्रकृतिनिर्माणे दोषाणाम् अधिकता भवति तर्हि प्रकृतिः स्वस्था इति कथितुं न शक्यते।

अत्र सुश्रुतः कथयति यथा

**विषजातो यथा कीटो न विषेण विपद्यते।**
**तद्वत्प्रकृतयो मर्त्यं शक्नुवन्ति न बाधितुम्॥** (सु.शा. ४/७९)

अर्थात् विषतः उत्पन्नः कीटः यथा स्वस्य शरीरस्थितविषात् बाधितः न भवति। तथैव देहगत-प्रकृतयः मानवाय बाधाः न उत्पादयन्ति। यत् दोषाणां प्रबलता गर्भकालात् भवति एवञ्च सहजतया भवति। एतस्मात् कारणात् ताः प्रकृतयः नाशशीलाः वा बाधायुक्ताः न भवन्ति। यथा विषकृमीणां विषः सहजतया मारकः न भवति।

**व्युत्पत्तिः**

**प्रकरोति वा प्रकर्षेण करोति इति प्रकृतिः।**

अर्थात् प्रकर्षतां प्रकटयति इति प्रकृतिः। 'प्र' उपसर्गात् 'कृ' धातोः उत्पन्नः शब्दोऽयम्।

**निरुक्तिः**

''प्रकरोति इति प्रकृति'' इति व्युत्पत्या प्रकृतेः अर्थः मानवस्वभावः। आयुर्वेदस्य अन्यैः आचार्यैः अपि मानवस्य विशिष्टस्वभावम् एव प्रकृतिः इति कथितं वर्तते।

''सकर्षेण करोति इति प्रकृतिः'' अर्थात् या स्वस्य आधिक्येन मानवशरीरे विशेषाम् अभिव्यक्तिं प्रकटीकरोति सा प्रकृतिः।

**व्याख्या**

- प्रकृतिः अर्थात् सहज शरीरस्वरूपम् इति।

- जन्ममरणान्तरालभाविनि अधिकारिणी दोषस्थितिप्रकृतिः।
- गर्भावक्रान्तिसमये स्वकारणोद्रेकजनिता निर्विकारिणी दोषस्थितिः।

अर्थात् उद्रिक्तदोषाणां निर्विकारस्थितिः एवं जन्मतः आरभ्य मृत्युपर्यन्तं सर्वदा या ध्रुवा सा प्रकृतिः।

**प्रकाराः**

आचार्य सुश्रुतः सुश्रुतेन दोषानुसारं सप्त 'देहप्रकृतयः', षोडश 'मानसप्रकृतयः' एवं महाभूतानुसारं 'पाञ्चभौतिक-प्रकृतयः' इति वर्गीकृताः सन्ति।

**देहप्रकृतयः (i) ( दोषजप्रकाराः )**

**(१)** वातज-प्रकृतिः **(२)** पित्तज-प्रकृतिः **(३)** कफज-प्रकृतिः **(४)** वातपित्तज-प्रकृतिः

**(५)** वातकफज-प्रकृतिः **(६)** पित्तकफज-प्रकृतिः **(७)** समदोषज-प्रकृतिः

**(ii) पाञ्चभौतिक-प्रकृतयः**

गर्भकालात् महाभूतानां बाहुल्येन शरीरस्वभावेन सह प्रत्यक्षसम्बन्धेन पञ्चभौतिकप्रकृतिः इति ज्ञायते।

**(१)** पार्थिव-प्रकृतिः **(२)** आप्य-प्रकृतिः **(३)** तेजस्-प्रकृतिः **(४)** वायवीय-प्रकृतिः

**(५)** आकाशीय-प्रकृतिः

**(iii) मानसप्रकृतयः**

मनः त्रिगुणात्मकंः भवति। मनसि यस्य गुणस्य प्रधानता भवति तदनुसारमेव मानस प्रकृतीनां निर्माणं भवति।

तच्च सात्त्विक राजसतामसभेदन त्रिधा।

**प्रकृतिलक्षणानि**

वात-पित्त-कफाः यत्र समानाः भवेयुः, तत्प्रकृतिः समस्थप्रकृतिरस्ति। दोषानुगुणं प्रकृतेः भिन्नलक्षणानि वर्तन्ते।

**वातप्रकृति-लक्षणम्**

- अल्पकेशः
- कृशः
- रुक्ष त्वक् एवं केशम्
- वाचालः
- चंचलः मनयुक्तः
- स्वप्रेषु आकाशचारी

**पित्तप्रकृति-लक्षणम्**

- अकालपलितः
- धीमान्
- स्वेदी
- कारण स्वल्पेन रुष्टी भवति
- स्वप्रेषु ज्योतिषां दृष्टा

**कफप्रकृति-लक्षणम्**

- गम्भीरबुद्धिः
- स्थूल-अङ्गम्
- स्निग्धकेशयुक्तः
- महान् बलशाली
- स्वप्रेषु जलाशयदर्शनकर्ता

## स्वाध्यायः

**१. बहुवैकल्पि प्रश्नानां उत्तरं लिखत।**

(१) प्रकृतेः प्रभावः कस्मात् कालात् भवति ?

(क) बाल्यकालात् (ख) गर्भाधानकालात् (ग) भूतकालात् (घ) वर्तमानकालात्

(२) प्रकृतेः सामान्यः अर्थः कः ?

(क) मानवस्वभावः (ख) सत्त्वगुणः (ग) दोषः (घ) पञ्चमहाभूतम्

(३) सुश्रुतेन कति देहप्रकृतयः वर्णिता सन्ति ?

(क) ३ (ख) २ (ग) ४ (घ) ७

(४) सत्वरजतमाहत्य मानसप्रकृतयः कति भवन्ति ?

(क) षोडश (ख) पञ्च (ग) तिस्रः (घ) चतस्रः

(५) त्रिगुणात्मकः कः ?

(क) शरीरम् (ख) मनः (ग) प्रकृतिः (घ) कफः

(६) राजस्यप्रकृतिः कस्य प्रकारः ?

(क) देहप्रकृतेः (ख) पाञ्चभौतिकप्रकृतेः (ग) जीवप्रकृतेः (घ) मानसप्रकृतेः

(७) वाचालः कस्याः प्रकृतेः लक्षणम् ?

(क) वातिक (ख) पैत्तिक (ग) कफया (घ) तेजस्

**२. प्रश्नानाम् एकेन वाक्येन उत्तराणि लिखत।**

(१) गम्भीरबुद्धिः कस्यां प्रकृतिलक्षणे आयाति ?

(२) कफप्रकृतियुक्तः स्वप्नेषु किं पश्यति ?

(३) समप्रकृत्यर्थं के समानाः भवेयुः ?

(४) तामसप्रकृतिः कस्याः प्रकृतेः उपप्रकृतिः ?

(५) काः प्रकृतयः मानवाय बाधाः न उत्पादयन्ति ?

**३. प्रश्नानां लघूत्तराणि लिखत।**

(१) प्रकृतेः निरुक्तिं लिखत।

(२) प्रकृतिशब्दस्य कः अर्थः ?

(३) प्रकृतेः कति प्रकाराः ?

(४) प्रकृतेः विशेषलक्षणानि लिखत।

**४. यथायोग्यमुत्तरं संयोजयत।**

| अ | ब |
|---|---|
| पित्तप्रकृतिः | स्थूलम् अङ्गम् |
| कफप्रकृतिः | कृशः |
| वातप्रकृतिः | स्वेदी |

**५. प्रश्नानां सविस्तरम् उत्तरं लिखत।**

(१) प्रकृतेः सम्यक् व्युत्पत्तिं लिखित्वा व्याख्यां कुरुत।

(२) मानसप्रकृतिवर्णनं लिखत।

●

# १७ आहारवर्णनम्

शरीरस्य पोषणं पाञ्चभौतिकेन आहारेण एव भवति। आहारं विना शरीरे उपयोगितत्त्वानां निर्माणं शक्यं न प्रभवति। अतः समतुल्यस्य आहारस्य अत्यन्तं महत्त्वम् आचार्यैः उक्तं वर्तते।

**पञ्चभूतात्मके देहे ह्याहारः पाञ्चभौतिकः।**
**विपक्वः पञ्चधा सम्यग् गुणान् स्वानभिवर्द्धयेत्॥**

(सु.सू. ४६/५२६)

मनुष्यदेहः पाञ्चभौतिकः अतः तस्य कृते आवश्यकः आहारः अपि पाञ्चभौतिकः भवेत् इति प्रशस्तं वर्तते।

**व्युत्पत्तिः**

पाणिनिव्याकरणानुसारम् 'आङ्' उपसर्गात् 'हञ्' हरणधातोः 'घञ्' प्रत्ययसंयोजनेन 'आहारः' शब्दः उत्पन्नः भवति।

**निरुक्तिः**

**आह्रियते उपश्रीयते शरीरमनेनेति आहारः।**

प्रत्येकदेहधारिणः शरीरस्य उपादानानां स्वस्य स्वभावतः प्रतिक्षणं ह्रासः भवति एवञ्च तेषां क्षतिं पूरयितुं यस्य द्रव्यस्य आवश्यकता भवति सः आहारः कथ्यते।

**आहारवर्गीकरणम्**

हितकरः वा अहितकरः आहारस्य आहारद्रव्याणां विविधेन दृष्टिकोणेन वर्गीकरणं कर्तुं शक्यते। तद्यथा-

- उत्पत्तिभेदात् - जाङ्गम् (पयः, घृतम्, इत्यादि प्राणिजन्यम्), औद्भिदम् (फल, मूल इत्यादि), पार्थिवम् (सैन्धवः, सुवर्णः इत्यादि भूमिजन्यम्)
- स्वरूपभेदात् - सेन्द्रियः/ निरिन्द्रियः।
- शरीरपरिणामस्वरूपम् - हितकरः/ अहितकरः।
- दोषपरिणामस्वरूपम् - शमनम्, कोपनम्, स्वस्थहितम्।
- **रसाधारण -**

**रसास्वाद्वम्ललवणतिक्तोषणकषायकाः।**
**षड्द्रव्यमाश्रितास्तेतु यथापूर्वं बलावहाः॥** (अ.सं.सू १/१४)

द्रव्यस्य मधुरः, अम्लः, लवणः, तिक्तः, कटुः, कषायः, इति षड्-रसैः युक्तः आहारः षड्-रसात्मकः आहारः कथ्यते। नित्यक्रमेण षड्रसयुक्तः आहारः एव ग्रहणीयः किन्तु एतेषां सर्वेषां रसानां समानता न आवश्यकी। प्रायः आहारे मधुररसस्य आधिक्यं भवति।

- सप्तधातूनां वृद्धेः सामर्थ्यं मधुररसे भवति।
- अम्लरसेण रुचिवृद्धिः भवति। अम्लरसः मनसेन्द्रियाणां सामर्थ्यं वर्धयति।
- लवणरसः आहार-रोचकः पाचकश्च अस्ति।
- तिक्तरसः स्वयमरोचिष्णुः अपि अरोचकहनो भवति।

- कटुरसः अन्नशोषकः, इन्द्रियाणां स्फोटकः।
- कषायः शोषकः स्तम्भकः बलह्रासकरः अस्ति।

अत्र दोषानुसारेण आहाररसानां वृद्धि शमनं च वर्गीकृतं अस्ति।

| दोषः | वृद्धिकारकरसः | शामकरसः |
|---|---|---|
| वातः | कटुः, तिक्तः, कषायः | मधुरः, अम्लः, लवणः |
| पित्तम् | अम्लः, लवणः, कटुः | तिक्तः, कषायः, मधुरः |
| कफः | मधुरः, अम्लः, लवणः | कटुः, तिक्तः, कषायः |

**आहारपरिणामकराः भावाः**

आहारं परिणामपर्यन्तं प्रापयितुं आहाररसे परिवर्तनकारकाणां भावानां वर्णन विविधैः आचार्यैः कृतं।

**आहारपरिणामकरास्त्विमे भावा भवन्ति।**

**तद्यथा-उष्मा,वायुः, क्लेदः, स्नेहः, कालः, समयोगश्चेति।** (च.शा.६/१४)

(१) उष्मा (२) वायुः (३) क्लेदः (४) स्नेहः (५) कालः (६) समयोगः।

अत्र उष्मा अग्निप्रधानभावः विद्यते एवञ्च अन्ये वायुः, क्लेदः, स्नेहः, कालः, समयोगादयः सहकारिणः भावाः प्रोक्ताः।

**(१) उष्मा** - ''**उष्मा पचति**'' अर्थात् उष्मया अन्नस्य पाचनकार्यं भवति। इयं पित्तोष्मा, पाचकपित्तः, अग्निः, जठराग्निः, इत्यादिः नामभिः ज्ञायते।

**(२) वायुः** - ''**वायुरपकर्षति**'' अर्थात् आहारपाचनकार्ये अपकर्षणस्य कार्यं करोति।

वायुः आहारम् अग्निं समीपे नयति, अग्निं प्रदीप्तं करोति च।

**(३) क्लेदः** - '**क्लेदःशैथिल्यमापादयति।**' अर्थात् आहारम् आर्द्रं करोति। शिथिलं कृत्वा पचितुं योग्यं निर्माति।

**(४) स्नेहः** - ''**स्नेहो मार्दवं जनयति**'' अर्थात् स्नेहः अन्नं मृदुरूपं करोति। घृततैलादीनाम् आहारात् विभाजनं करोति।

**(५) कालः** - ''**कालः पर्याप्तिभिनिवर्तयति**'' अर्थात् गृहीतम् आहारं सुपक्वरूपं ददाति।

**(६) समयोगः**- ''**समयोगस्त्वेषां परिणामधातुसाम्यकरः सम्पद्यते**'' अर्थात् पाचितान् रसादिधातून् समं करोति। आचार्य-चक्रपाणिना अष्टहारविधिविशेषायतनानां गणनां समयोगे कृताऽस्ति।

**आहारविधिः**

''**आहारस्यविधिः प्रकारो विधानं व इत्याहारविधिः।**'' (चक्रपाणिः)

**अथात्मवान् स्वभावसंयोगसंस्कारमात्रादेशकालोपयोगव्यवस्थाः सप्ताहार-कल्पना-विशेषाणां स्वास्थ्यफलानां हेतुभूताः समीक्ष्य हितमेवानुरुद्ध्येत्। (अ.सं.सू.-१०)**

अर्थात् आत्मवान् वा बुद्धिवान् (मानवेन) स्वास्थ्यस्य एवं अस्वास्थ्यस्य कारणभूतस्य आहारस्य सेवनं ''सप्ताहार कल्पना'' विशेषप्रकारेण ज्ञात्वा करणीयम्। आहारविधीनां सम्यक् ज्ञानेन देहस्य कृते हिताहारः सेवनीयः।

(१) स्वभावः (२) संयोगः (३) संस्कारः (४) मात्राः (५) देशः (६) कालः (७) उपयोग-व्यवस्था

**अष्टाहारविधिविशेषायतनानि**

महर्षिचरकेण चरकसंहितायां ''रसविमानाध्याये'' अष्टाहारविधिविशेषायतनानि विस्तृतरूपेण समुल्लिखितानि सन्ति।

**खल्विमान्यष्टावाहारविधिविशेषायतनानि भवन्ति, तद्यथा**

**प्रकृतिकरणसंयोगराशिदेशकालोपयोगसंस्थोपयोक्तष्टमानि ( भवन्ति )।** (च.वि.१/२१)

अनेन प्रकारेण आहारविधिविशेषायतनानि अष्ट सन्ति।

**(१) प्रकृति: (Natural qualities of food stuff)**

''तत्र प्रकृति रुच्यते स्वभावो य:'' (च.वि.१/२१-१) अर्थात् द्रव्येषु य: स्वभाव: भवति सा 'प्रकृति:' कथ्यते।

**(२) करणम् (Preparation of food)**

''क्रियते यत् करणम्'' द्रव्याणां स्वाभाविकगुणत: भिन्नगुणानाम् उत्पत्ति: एव 'करणम्'।

**(३) संयोग: (Combination of food)**

द्वयो: पदार्थयो: परस्परं संमेलनम् एव 'संयोग:' कथ्यते।

**(४) राशि: (Quantity of food stuff)**

पदार्थानां मात्रा वा परिमाण: 'राशि:' नाम्ना ज्ञायते।

**(५) देश: (Habit)**

''देश: पुन: स्थानम्'' - द्रव्याणाम् उत्पत्ति: एवं तेषां स्थानदर्शक: 'देश:' कथ्यते।

**(६) काल: (Time)**

आहारोत्पत्तिग्रहणयो: नियतसमय: 'काल:' इति नाम्ना ज्ञायते।

**(७) उपयोग-संस्था: (Rules of use)**

भोजनस्य ग्रहणस्य नियमा: एव 'उपयोगसंस्था:'।

**(८) उपयोक्ता (User) उपयोकतृ -**

आहारस्य भोक्ता, भोजनग्राहक: एव 'उपयोक्ता'।

विशेषायतनानि मूलत: शुभफलदायकानि परस्परम् उपकारकाणि च भवन्ति। अत एव एतानि सम्यक् ज्ञात्वा अनुकर्तव्यानि। भोज्यपदार्थानां स्वादादीनां मोहात् वा असावधानेन सेवनम् अन्ततो गत्वा कष्टकरम् भवति। एतादृशा: आहारा: सदैव त्यक्तव्या:। विशेषायतनानां साहाय्येन रोगमुक्ता: भवितुं शक्नुम:।

**स्वाध्याय:**

**१. बहुवैकल्पिक प्रश्नानां उत्तरं लिखत।**

(१) शरीरपोषणं केन आहारेण भवति?

(क) सुयोग्येन (ख) पाञ्चभौतिकेन (ग) गुणयुक्तेन (घ) दोषयुक्तेन

(२) आहारशब्दे प्रत्यय: क:?

(क) नञ् (ख) घञ् (ग) झञ् (घ) एकोऽपि न

(३) 'सेन्द्रियः' इति कस्मात् भेदात्?

(क) स्वरूपभेदात् (ख) शरीरपरिणामभेदात् (ग) दोषपरिणामभेदात् (घ) उत्पत्तिभेदात्

(४) सप्तधातूनां वृद्धेः सामर्थ्यं कस्मिन् रसे वर्तते?

(क) मधुरः (ख) अम्लः (ग) कटुः (घ) कषायः

(५) अम्लरसेण कस्य बुद्धिः निर्माणं भवति?

(क) प्रकृतेः (ख) रुचिः (ग) दोषस्य (घ) गुणस्य

(६) अम्लः, लवणः, कटुः एते कस्य दोषस्य वृद्धिकारकाः?

(क) वातस्य (ख) पित्तस्य (ग) कफस्य (घ) श्लेष्मायाः

(७) आहारपरिणामकरभावाः कति सन्ति?

(क) ५ (ख) ६ (ग) ८ (घ) २

**२. प्रश्नानाम् एकेन वाक्येन उत्तराणि लिखत।**

(१) आहारविधि विशेषायतनानि अपरं नाम किम्?

(२) आहरविधयः कति सन्ति?

(३) अग्निप्रधानः भावः कः?

(४) आहारम् आर्द्रं कः करोति?

(५) आहारविधि विशेषायतनानि कति?

**३. प्रश्नानां लघुत्तराणि लिखत।**

(१) आहारस्य व्युत्पत्तिं कुरुत।

(२) स्नेहस्य कार्यं लिखत?

(३) आहारविधिविशेषायतनानि प्रतिपादकश्लोकं लिखत?

(४) आहारविधिविशेषायतनानां नामानि लिखत।

**४. सूचनानुसारं लिखत।**

अम्लमधुररसयोः भेदं ज्ञापयत।

**५. प्रश्नानां सविस्तरम् उत्तरं लिखत।**

(१) आहारविधिं सम्यक् चर्चयत।

(२) दोषानुसारेण आहारवर्गीकरणं क्रियताम्।

●

# १८ आहारपाकवर्णनम्

आहारः जीवनस्य अविभिन्नम् अङ्गं विद्यते। जीवनं नित्यं यापयितुं भोजनम् अत्यावश्यकं वर्तते। किन्तु आहारोऽयं विधिवत् न क्रियते चेत् असंख्य-व्याधीनां उत्पत्तिः भवति।



**अन्नवहस्त्रोतसः वर्णनम् ( महास्त्रोतस् )**

आहारपाकस्य प्रक्रियायां स्त्रोतसां महत्त्वपूर्णं योगदानं भवति। महास्त्रोतसः मुखात् आरभ्य गुदापर्यन्तं भवति। चरकमतानुसारं महास्त्रोतसः आभ्यंतर-रोगमार्गे समाविष्टः अस्ति।

**कोष्ठः पुनरुच्यते-महास्त्रोतः शरीरमध्यं महानिम्नम्।**

**आमपक्वाशयश्चेति पर्यायशब्दैः तन्त्रे स रोगमार्ग आभ्यन्तरः ॥** च.सू.११/४

महास्त्रोतस् कोष्ठः, शरीरमध्यः, महानिम्नः, आमपक्वाशय इत्याभिः नामभिः ज्ञायन्ते।

**मूलस्थानम्** - अन्नवहस्त्रोतसाम् आमाशयमूलं वामपार्श्वं च।

**आहारपाकक्रिया** - आहारपाचनस्य संपूर्णप्रक्रियायां गृहीताहारानन्तरं महास्त्रोतसि तस्य विविधस्थानेषु रूपान्तरं भवति। विविधस्त्रावोत्पत्तिः ग्रहणसारकिट्टविभजनम्, सारशोषणम्, किट्टविसर्जनादीनां कर्मणां समावेशः भवति। आधुनिकमतानुसारेण प्रक्रियेयं पूर्णायां सत्यां सामान्यतया ६ तः ७ घण्टापर्यन्तः कालः



आहारपाचनस्य संपूर्णप्रक्रियायाः मुख्य चतुर्विभागाः सन्ति।

(१) गलनप्रक्रिया (२) पाचनक्रिया (३) शोषणक्रिया (४) उत्सर्जनक्रिया

**(१) गलनप्रक्रिया** - मुखेस्मिन् आहारग्रहणानन्तरं मुखगुहायाः अवयवद्वारा चर्वणानन्तरं ग्रासः भूत्वा ग्रसनिकाद्वारा अन्ननलिकाद्वारा आमाशये प्राप्नोति तावत् कालिका प्रक्रियास्ति।

**मुखगुहा (Oral Carity)** - दन्तैः आहारस्य चर्वणकार्यं क्रियते। जिह्वया रसस्य ज्ञानं भवति, क्रियते वा। तत्र स्वादाङ्कुराः आगताः भवन्ति। जिह्वा गलनप्रक्रियायां वाचः उत्पन्नकरणे मुख्यास्ति। एवञ्च आहारस्य ग्रासनिर्माणेऽपि सहायतां करोति।



**लालाग्रन्थिः** एतस्मात् ग्रन्थितः निःसरन् स्त्रावः मुखं आर्द्रीकरोति। आहारकाले स्त्रावोऽयं वर्धते। तेनाहारः चीक्कणः रासायणिकदृष्ट्या पाचितः गलितः च भवति। लालाग्रन्थिः लालामुत्पाद्य मुखगुहायां स्थापयति प्रक्षिपति च। लालाभिधानेन परिचितास्ति। तत्र वायुः तथा $Co_2$ इत्यस्य कारणेन

बुदबुदाः दृष्यन्ते। प्रतिदिनं १ तः $\frac{1}{2}$ लि. मात्रायां स्रवन् लालरसे ९९.५% जलं ०.५% घनद्रव्याणि तत्र निगरणीभूतानि सन्ति।

घनद्रव्येषु सोडियम-पोटाशियमस्य क्लोराइड्स्, बायकार्बोनेट्स् फोस्फेट्त्त स्थिताः सन्ति।

कानिचित् कार्बनिकतत्त्वं, युरिया, युरिकएसिड्, सीरम आल्ब्युमीन, सीरमग्लोब्युविन, म्युसीन, जन्तुनाशकतत्त्वानि-निगरणीभूय स्थिताः वायवः तथा सेलिवरी एमीलेइझ-टायलिन्-नाम्नः पाचकप्रकिण्वम् स्थितमस्ति।

कार्बनिकक्षारेषु केल्शियमकार्बोनेट् मुख्यमस्ति।

तेनप्रक्रियया क्षारीया अथवा तटस्थी भवति।

कार्यम् - मुख्यकार्य आर्द्रता स्निग्धतायाः उत्पन्नकारकमस्ति। ''स्टार्च'' इत्यस्य पाचनं करोति।

चर्वणक्रिया -

यान्त्रिकी क्रियास्ति, दन्तपंक्तिदूयस्य मध्ये प्रेषणभूत आहारस्य पिष्टनं करोति। आहारः दन्तानां समीपं सरति तदा कपोलस्य पेश्यः जिह्वा च पुनः तमाहारं दन्तपंक्तिमध्ये स्थापयति। दन्ताः आहारं कर्तयित्वा, चर्वयित्वा, चूर्णीकृत्य च महदंशान् त्रोटयित्वा सूक्ष्मांशान् गलितुं योग्यान् कुर्वन्ति। मुखं लालाग्रन्थिः च स्वकीयस्रावमुत्पाद्य आहारं ग्रासमयं करणाय जिह्वा-अधर-कपोलसदृशावयवेषु साहाय्यं करोति। चर्वणक्रियायाम् उर्ध्वहन्वस्थिनिष्क्रियं भवति, स्थिरीभवति च। यदा अधस्तं हन्वस्थिचर्वणक्रियायां साहाय्यं करोति। चर्वणपेशीनां सञ्चालनं (५) पञ्चमशीर्षण्यनाड्यतृतीयशाखा करोति।

गलनप्रक्रिया - आहारस्य चर्वणानन्तरं लालासहायेन आहारस्य ग्रासं भूत्वा मुखतः आमाशयं प्रति गमनक्रियामेव गलनक्रिया कथ्यते। गलनस्य विभागत्रयं वर्तते।

● **स्वैच्छिकभागः** - ग्रासः मुखस्य आभ्यन्तरद्वारग्रसनिकां प्रति गच्छति।

● **ग्रसनिकाभागः** - ग्रसनिकापेश्यः कार्यान्विताः भवन्ति।

● **अन्ननलिकागतभागः** - अनैच्छिकरीत्या प्रभवति। लिप्समाना अथवा अपकर्षणीगतिद्वारा ग्रासः आमाशयं प्राप्नोति।

अन्ननलिका - अन्नं नीयमानावयवोऽस्ति तदामाशयं यावत् ग्रासं प्रापयति तस्य श्लेष्मकलायाः स्रावः आभ्यन्तरमार्गं स्निग्धीकृत्य ग्रासमामाशयं प्रति सुगमतया प्रापयति। आमाशयस्य हार्दिकद्वारकर्त्री पेशी तद्द्वारं पिघाय अर्धपक्वान्नं अन्ननलिकायां प्रविष्टुमवरुध्यति।

**(२) पाचनक्रिया** - आहारपाचनस्य सर्वमहद्भागः मुखतः प्रारभ्य पक्वाशयं यावत् चलति, अत्र यान्त्रिक -रसायणिकक्रियाद्वारा आहारस्य एतादृक् विघटनं क्रियते तद् आन्त्रेऽस्मिन् शोषणयोग्यः भवति।

पाचनमर्थात् आहारघटकानां त्रोटनं परिणमनश्च भवति।

आमाशयस्य कार्यम् -

(१) आहारं द्रव्यं च एवं आलोडनस्य प्रक्रियाद्वारा भिन्नसंघातीकृत्य प्रवाहीरूपं कारयति निर्मापयति च।

(२) HCL आहारम् अम्लीयम् करोति, लालापाचनं बद्धीभवति, ''पेप्पीनोजेनन'' इत्यस्य ''पेप्सीन'' इत्यस्मिन् रूपान्तरं भवति। शरीराय हानिकारकजन्तूनां नाशं करोति।

(३) पेप्सीनप्रकिण्वप्रोटिनस्य विघटनं कृत्वा तस्य पेप्टोन यावत् पाचनं करोति

(४) रक्तनिर्माणपकायन्तरतत्त्वम् आमाशयतः एव उत्पद्यते तदैव बहितः आहारे नेतुं (Vitamin $B_2$) विटामिन आन्त्रेषु शुष्यते तथा रक्तोत्पत्तिक्रिया पूर्णा भवति।

(५) HCL इक्षुशर्करायाः द्राक्षशर्करायां फलशर्करायां च परिणमनं करोति।

(६) आमाशये उत्पद्यमानः श्लेष्माणं (क्लेदककफः) अन्य स्थानगतश्लेष्माणम् आधारम् प्रददाति।

(७) मधुरावस्थानपाकस्याधारेण फेनभृत्कफस्योत्पत्तिः भवति, यत् फवर्गीयतत्त्वानां पोषणं करोति।

(८) अधो आमाशयं पित्तस्य स्थानं मन्यते, गण्यते च अत्र पितस्य कार्यं भवति।

**लघ्वान्त्रेपाचनक्रिया** - सर्वप्रथमावयवः ग्रहणी आगच्छति।



**ग्रहणी** - ग्रहण्यां पाचकाग्नेः मुख्यस्थानमागतमस्ति। तस्याः कार्यं अग्नेः अधिष्ठाने सति पित्तधराकलायाः स्थाने सति अपक्वान्नं पक्वं करोति, चतुर्विधान्नस्य पाचनं करोति।

''षष्ठीपित्तधरा सा चतुर्विधमन्नपानम् आमाशयात् पच्युत्तं पक्वाशयोपस्थितं धारयति।''

**मध्यान्त्रम्** - लघ्वान्त्रे पाचनं तस्य विशिष्टयान्त्रिक क्रियाः एवञ्च यकृदग्न्याशययोः पाचकरसाणां रासायणिकक्रियाः भवन्ति।

**यान्त्रिकपाचनम्** - आन्त्रेषु पाचनं शोषाणार्थं प्रकारत्रया यान्त्रिकक्रियाः भवन्ति।

(१) परिमर्दनक्रिया (२) अपकर्षणीगतिः (३) दोलनगतिः।

एतत् त्रिप्रकारकक्रियाभिः आहाररसः आन्त्ररसः आमाशयरसः पाचकप्रकिण्वाश्च परस्परं मिलित्वा एकजीविनः भवन्ति। सर्वे पाचकप्रकिण्वाः स्वकीय-आहारघटकैः सह मिलित्वा पाचनं स्वकीयचरमावधिं प्राप्नोति। तेनैव सह एतत् त्रिप्रकारकयान्त्रिकक्रियाद्वारा आहारस्य रसाङ्कुरिकासुशोषणं भवति।

**(१) परिमर्दनक्रिया** - लघ्वान्त्रस्य मुख्या प्रबला च क्रियास्ति। यस्मिन् भागे आहारः भवति तस्य भागस्य गोलमांससूत्रे इयं क्रिया भवति। तत्र आहारद्रव्याणि अग्रे न प्रेषितव्यानि भवन्ति किन्तु मिश्रीकरणं भवति।

प्रत्येकस्यां कलायां १२ तः १६ (द्वादशतः षोडशः) वारं एतस्यां परिमर्दनक्रियायां सत्यां आहारः पृष्ठे अग्रे च भवति।

**(२) अपकर्षणीगतिः** - गतिरियं लघ्वान्त्रे बहु मृदुरूपा भवति। आहाररसः प्रति कलां १ c.m. यावत् अग्रे वर्धते अर्थात् आन्त्रे आहारः ४ तः ५ (चतुर् तः पञ्च) घण्टा यावत् तिष्ठति। शेषान्त्रे क्रियेयं अधिका दृश्यते। क्रियाद्वयं समयान्तरे भवति, यत्-परस्परं पूरकरूपा वर्तते।

**(३) दोलनगतिः** - दोलनगतिः परिमर्दनक्रियायाः भागैकोऽस्ति। गतिरियं प्रतिक्षणं २ तः ५ (द्वि तः पञ्च) c.m. यावत् भवति।

**रासायणिकपाचनक्रिया** - आन्त्रेऽस्मिन् रासायणिकपाचनक्रिया आन्त्रस्य स्वकीययकृतः तथा अग्न्याशयस्य पाचकप्रकिण्वैः सह सम्मेलनात् संयुक्तरूपा भवति।

(१) आहारस्य सर्वघटकानां पाचनं तथा महद्भागस्य पोषकतत्त्वानां शोषणं भवति। लघ्वान्त्रस्य २/५ भागे अन्नस्य पाचनं तथा ३/५ भागे आहाररसस्य शोषणं भवति।

(२) आन्त्ररसस्य प्रकिण्वा: अग्न्याशयस्य किण्वेषु साहाय्यं प्रदाय संपूर्णं पाचनं करोति।

(३) आन्त्ररसस्थितं ''एन्टेरोपेप्टाइडेज'' अग्न्याशयरसस्य निष्क्रिय ''ट्रीप्सिनोजेन'' तथा ''कीमोट्रीप्सीनोज'' इत्यस्मिन् रूपान्तरं भवति। तस्मात् ''पेप्टोन'' इत्यस्य ''पेप्टाइड'' तथा ''पोलीपेप्टाइड'' इत्यस्मिन् रूपान्तरणं भवति।

(४) आहारस्य विधटकार्थम् आन्त्ररस: विविधसहकारिण: तथा मुख्यान् प्रकिण्वान् प्रापयन्ति।

(५) आन्त्रस्य त्रिभिक्रियाभि: आहारस्य द्रवरूपे सति तत्र प्रकिण्वा: एकरस: भवन्ति। तस्मात् एकमपि घटकं अपाचितं न भवति तिष्ठति च।

(६) आन्त्ररस: उत्पद्यते।

(७) शरीरार्थम् आवश्यकपोषकतत्त्वानि शोषयित्वा रक्तमार्गेण वा रसायनीमार्गेण परिवहने प्रवेशयित्वा यस्मिन् तद्योग्यस्थाने प्रेषयति।

**यकृत: कार्यम्** - यकृत् शरीरस्य सर्वश्रेष्ठ: कार्यकर्ता अवयवोऽस्ति। तस्य कार्याणि इत्थं वर्तन्ते।

(१) ''एमिनोएसिड्स'' इत्यस्य त्रोटनानन्तरम् अनावश्यकं ''नाइट्रोजन'' दूरीकृत्य तस्य युरिया निरूपयति यस्य मूत्रद्वारा बहि: निष्कासनं भवति।



(२) शरीस्य रक्तप्रवाहगतत्रुटितकोषाणां ''न्यूकिलओप्रोटिन'' इत्यस्य विघटनं कृत्वा तत: ''युरिकएसिड्'' निरूपयति यस्य मूत्रद्वारा उत्सर्जनं भवति।

(३) अग्न्याशयस्य अन्त:स्राव: ''इन्स्युलीन'' इत्यस्योपस्थितौ ''ग्लुकोझ'' इत्यस्य ''ग्लायकोजन'' इत्यस्मिन् परिवर्तनं करोति तथा अन्त: स्राव: ''ग्लुकोगान'' इत्यस्योत्पस्थितौ ''ग्लायकोजन'' इत्यस्य ग्लुकोझ इत्यस्मिन् परिणमनं करोति।

(४) स्नेहस्य संचितभूततत्त्वानि मृदूनि अल्पानि च करोति। तेन उलका: स्वस्य शक्त्युत्पादनाय उपयोगं कृत्वा सर्वमहत् उष्णतामुत्पादयति।

(५) याकृतपित्तस्य उत्पत्तिं करोति यत् स्नेहस्य पाचनाय आवश्यकं वर्तते।

(६) आन्त्रस्य पटलात् (भित्तित:) शोषणीभूत Vit-B१२ इत्यस्य सङ्ग्रहं करोति। यदा अस्थिमज्जां रक्तकणानामुत्पत्त्यर्थम् आवश्यकता भवति चेत् तदा प्रमाणानुसारं प्रददाति।

(७) आहारादागतानां तथा प्लीहायां रक्तकणानां विभञ्जनेन विमुक्तलोहतत्त्वानां सङ्ग्रहं करोति।

(८) आहारप्राप्तत्वात् Vita-A, D, E, K इत्यस्य सङ्ग्रहं करोति।

(९) हरित्पर्णयुक्तवनस्पतिसदृशघटकेभ्य: प्राप्त Vita - A इत्यस्य निर्माणं करोति।

(१०) एमिनोएसिड्त: आल्ब्युमिन्, ग्लोब्युलीन्, प्रोथोम्बीन, फाईब्रीनोजन् इति चतुर्धा प्लाजमाप्रोटिन इत्यस्य निर्माणं करोति।

(११) शरीराय हानिकारकतत्त्वानि, विषाक्तपदार्थाः, जन्तवः इत्यादिभिः उत्पादितविषतत्त्वानां नाशं करोति अथवा तानि कार्यक्षमरहितानि मन्दमयानि च कारयति।

(१२) "Mast cell" इत्यनेन सह मिलित्वा रक्तमस्थिरीकृत्य हिपेरिन तत्त्वस्योत्पत्तिं करोति।

(१३) जालकमयान्तः कलाकोषाः जन्तुभक्षणस्य प्रक्रियाद्वारा त्रुटितरक्तकणाः श्वेतकणाः तथा केचन जन्तवः इत्यादीनां नाशं करोति।

(१४) ताम्बतत्त्वानां तथा येषां विघटनं न शक्यते तादृशाणां-विषाक्ततत्त्वानां यकृत् सङ्ग्रहं करोति।

(१५) आहारतः प्रतिहारिणीशिरा द्वारा आगतपोषकतत्त्वानि शरीरार्थं सात्म्यानि करोति, निर्मापयति च।

(१६) सगर्भावस्थायां रक्तकणानामुत्पत्तिं करोति।

(१७) रसधातुतः रक्तस्योत्पत्तिः यकृत् द्वारा क्रियते इति प्रदर्शितमस्ति।

अग्न्याशयः - अग्न्याशयः आहारस्य पाचने सर्वमहान् अस्ति। आहारस्य सर्वघटकानां अन्तिमपरिणामप्रदायकः पाचकप्रकिण्वः तस्य रसेऽस्मिन् स्थिते सति तत्पाचकाग्नेः स्थानं कथ्यते।

''पेन्टीएटिक एमाइलेज'' प्रगुणशर्करायाः विघटनं कृत्वा ''ग्लुकोझ'' इत्यस्मिन् परिणमनं कारयति।

ट्रीप्सिन तथा कीमोट्रीप्सिन प्रोटिन इत्यस्य पेप्टाइड इत्यस्मिन् तथा कार्बोक्सि पोलीपेप्टाईडेज पेप्टाइड इत्यस्य एमिनो एसिड् इत्यस्मिन् रूपान्तरं कृत्वा प्रोटिनस्य सम्पूर्णं पाचनं करोति।

स्नेहस्य पचनं भवति।

**( ३ ) शोषणक्रिया** - लघ्वान्त्रतः महत्भागे आहारस्य सर्वघटकानां पाचनं भूत्वा तस्यान्तिमस्वरूपाणि भवन्ति। यदान्त्रस्य भित्तिकायां (पटले) शोषणयोग्यानि भवन्ति तथा लघ्वान्त्रे तत्पोषकतत्त्वानि शुष्यन्ति यत्सारकिट्टविभजनमपि कथितुं शक्यते, ज्ञातुं शक्यते चेति।

पाचनस्य यान्त्रिकरासायणिकक्रियानन्तरम् एकगुणशर्करा, एमिनोऐसिड्, फेटिएसिड्, ग्लीसरोल् तथा ग्लीसराईड्स सदृशाः आहारस्य घटकानामन्तिमं स्वरूपं भवति। यस्य आन्त्रस्य पटले स्थितउपकलाकोषद्वारा शुष्यते क्रियामिमां शोषणक्रियां कथयन्ति। पोषकतत्त्वस्य ९०% नवतिप्रतिशतं क्षुद्रान्त्रे १०% दशप्रतिशतं आमाशये बृहदान्त्रे च शुष्यत इति।




**बृहदान्त्रम्** - जलीयांशस्य शोषणं करोति, मलस्य निर्माणं करोति, समग्रलेह्यगतिद्वारा मलम् अग्रे प्रेषयति, कानिचित् विटामिन्स निरूपयति, मलविसर्जनं करोति अस्मिन् तृतीयकटु-अवस्थापाके वायोरुत्पत्तिः भवति।

## स्वाध्याय:

**१. बहुवैकल्पिकान् प्रश्नान् उत्तरं लिखत ।**

(१) जीवनस्य अविभिन्नम् अङ्गं किम्?

(क) आहार: (ख) तृष्णा (ग) क्षुधा (घ) मलम्

२. मांसनालिका कियती लम्बमाना भवति?

(क) १० त: १२ मि. (ख) ७ त: ८ मि. (ग) ६ त: ९ मि. (घ) ३ त: ४ मि.

(३) अभ्यन्तर-रोगमार्गे क: समाविष्ट:?

(क) पाचकग्रन्थि: (ख) महास्रोतस् (ग) व्याधि: (घ) दोषा:

(४) आहारपाकप्रक्रियाया: कति घण्टात्मक: काल: भवति?

(क) ६ त: ७ (ख) ७ त: ८ (ग) २ त: ३ (घ) ४ त: ५

(५) आहारस्य चर्वणकार्यं कै: क्रियते?

(क) दन्तै: (ख) ओष्ठै: (ग) हस्तै: (घ) कर्णै:

(४) शरीरस्य सर्वश्रेष्ठ: कार्यकर्ता क:?

(क) यकृक् (ख) मुखम् (ग) उदरम् (घ) पक्वाशय:

(५) अन्नवहस्रोतस: मूलस्थानं किम्?

(क) ग्रहणि (ख) यकृत् (ग) आमाशय: (घ) मुखम्

**२. प्रश्नानाम् एकेन वाक्येन उत्तराणि लिखत।**

(१) शरीरमध्य: इति कस्य अपरं नाम अस्ति?

(२) क्लेदककफ: कुत्र भवति?

(३) पाचनपक्रियाया: कार्यं मुख्यत: कस्मिन् स्थाने भवति?

(४) आमाशयपक्वाशययो: मध्ये का स्थिता?

**३. प्रश्नानां लघूत्तराणि लिखत।**

(१) यकृत: त्रीणि कार्याणि लिखत।

(२) ग्रहण्या: कार्यं लिखत।

(३) ग्रहण्या: स्थान-प्रतिपादकं श्लोकं लिखत।

(४) यान्त्रिकपाचनस्य नामानि लिखत।

**४. सूचनानुसारं लिखत।**

आहारपाकप्रकियाया: चर्वणाक्रियाया च भेदं ज्ञापयत।

**५. प्रश्नानां सविस्तरम् उत्तरं लिखत।**

(१) आमाशयस्य कार्यं लिखत।

●

# १९ अवस्थापाकवर्णनम्

**अविदग्धः कफं पित्तं विदग्धः पवनं पुनः।**
**सम्यग्विपक्वनिस्सारः आहारः परिबृंहयेत्॥**

सू.सु.४६/५२७

आहारपाकवर्णनम् आयुर्वेदाचार्यैः विभिन्नपाकानाम् अवस्थाद्वारा ज्ञापयितुं प्रयत्नः कृतः वर्तते। बाह्यसृष्टितः प्राप्तेभ्यः पदार्थेभ्यः आहाररसस्य निर्माणार्थं स्थूलपचनं भवति। पाचनप्रक्रिया मुख्यतः तिसृषु अवस्थासु भवन्ति। इयं प्रक्रिया एव अवस्थापाकः कथ्यते। अवस्थापाकः निम्नप्रकाराः सन्ति।

(१) मधुर-अवस्थापाकः (प्रथमावस्था-अविदग्धावस्था)

(२) अम्ल-अवस्थापाकः (द्वितीयावस्था-विदग्धावस्था)

(३) कटु-अवस्थापाकः (तृतीयावस्था-पक्वावस्था)



**मधुर-अवस्थापाकः**

आहारपाकस्य अवस्थायाम् इयं प्रथमा पाकावस्था वर्तते। आहारः यदा प्रथमं मुखे प्रविशति तदा चर्वणेन सह उष्मा एवं बोधककफादीनां संमिश्रणात् पचनोन्मुख-आहारनिर्माणं भवति। अस्मिन अपक्वे, अविग्धे च आहारे मधुररसः उत्पन्नः भवति।

स्थानम् - अस्याः अवस्थायाः प्रारम्भः मुखात् भवति। मुख्यतः आमाशये अस्यां अवस्थायां पचनकार्यं भवति।

**अन्नस्यभुक्तमात्रस्य षड्रसस्य प्रपाकतः।**
**मधुराद्यात् कफो भावात् फेनभूतमुदीर्यते॥**

(च.चि. १५/९)

अत्र लघुवाग्भटः अपि वर्णयति यत् षड्रसयुक्तः आहारः अपि प्रथमं मधुरं भूत्वा फेनभूतं कफम् उढीरयति।। मधुरावस्थापाकः मुखात् आरभ्य आमाशये सुसम्पन्नः भवति।



**अम्ल-अवस्थापाकः**

प्रथमपाकावस्थायाः अनन्तरम् आमाशये द्वितीय अवस्थापाकः भवति। अस्मिन् अवस्थायाम् अन्नम् अर्धपक्वं वा विदग्धं भूत्वा अम्लरूपं प्राप्नोति। आहारः पच्यमानः भवति अर्थात् अस्य क्वचित् अंशः पक्वः क्वचित् अपक्वः च भवति। पच्यमानः आहारः अम्लरसप्रधानः। अतः इयम् अम्लावस्था कथ्यते।

**परंतु पच्यमानस्य विदग्धस्याम्ल भावतः।**
**आशयाच्च्यवमानस्य पित्तमच्छमुदिर्यते॥** (च.चि. १५/१०)

प्रथमावस्थापाकतः मधुरीभूतः आहारः पश्चात् विदग्धगुणकारणात् अम्लतां प्राप्नोति। आमाशयात् च्युतः भूत्वा सः आहारः पित्तम् उढीरयति।

स्थानम् - पाचनस्य मुख्यक्रिया अस्याम् अवस्थायां भवति। अतः अवस्था एषा विदग्धावस्था कथ्यते। पचनप्रक्रिया मुख्यतः ग्रहण्याः स्थाने भवति।

**कटु-अवस्थापाकः**

पाचनप्रक्रियायाम् अवस्था इयम् अन्तिमा अवस्था (अवस्थापाकः) रूपेण ज्ञायते। ग्रहण्याम् अन्नस्य पाचनं, सारकिट्टयोः विभाजनम् एवं सारभाग-उपशोषणम् अतिरिक्तं किट्टरूपस्य परिवर्तितमस्य आहारस्य अंशः स्थूलान्त्रं प्रति प्राप्नोति।

**पक्वाशयं तु प्राप्तस्य शोष्यमाणस्य वह्निना।**

**परिपिण्डितपक्वस्य वायुः स्यात् कटुभावतः॥** (च.चि. १५/११)

ततः च्युतः भूत्वा असारः भागः पक्वाशयं प्राप्नोति। अत्र उपस्थितेन अग्निना शुष्कम् एवं परिपक्वं भूत्वा कदुरसप्राधान्यात् वायुमुदीरयति।

स्थानम् - मध्यकोष्ठस्य अन्ते पक्वाशय स्थाने स्थूलपचनस्य अन्तिम-अवस्था दृश्यते।

| अवस्था | स्थानम् | विघटकमहाभूतम् | दोष-उदीरणः | चिकित्सा |
|---|---|---|---|---|
| मधुरावस्था | आमाशयः | पृथ्वी + आपः | कफः | वमनम् |
| अम्लावस्था | ग्रहणी | तेजः | पित्तम् | विरेचनम् |
| पक्वावस्था | पक्वाशयः | वायुः + आकाशः | वातः | बस्तिः |

**सारभाग-अवशोषणम्** -

**आहारमूलाभ्यां रसः साम्यमुत्पादयत्यारोग्याय, किट्टं च मलानामेवमेव स्वमानातिरिक्ताः पुनरुत्सर्गिणः शीतोष्णपर्यायगुणैश्चोपचर्यमाणामलाः शरीरधातुसाम्यकराः समुपलभ्यन्ते।** (च.सू. २८/४)

आहारस्य यः उत्तमः परिणामः अस्ति सः रसः (उत्पत्तिः) अवशिष्टः भागः मलः भवति। यस्य निर्माणम् अपि आहारतः एव भवति। रसनिर्माणात् अवशिष्टः भागः किट्टमित्युव्य ते।




## स्वाध्यायः

१. **बहुवैकल्पिकान् प्रश्नान् उत्तरं लिखत।**

(१) पाचनप्रक्रियायाः मुख्यतः कति अवस्थाः?

(क) ६ (ख) ७ (ग) ९ (घ) ३

(२) प्रथमा अवस्था का?

(क) अम्लावस्था (ख) कटु-अवस्था (ग) मधुरावस्था (घ) पक्वावस्था

(३) मधुरावस्थायाः प्रारम्भः कस्मात् भवति?

(क) मुखात् (ख) शिरसः (ग) हस्तात् (घ) उदरात्

(४) अम्लावस्थाया: स्थानं कुत्र ?

(क) ग्रहण्यां (ख) कण्ठे (ग) हृदये (घ) मुखे

(५) आमाशयात् च्युत: भूत्वा आहार: किम् उदीस्थति ?

(क) रस: (ख) पित्तम् (ग) वात: (घ) कफ:

(६) का अन्तिमावस्था ?

(क) अम्लावस्था (ख) कटु-अवस्था (ग) मधुरावस्था (घ) विदग्धावस्था

(७) पित्तोदीरणं कुत: भवति ?

(क) कटु अवस्थापकत: (ख) अम्ल अवस्थापकत (ग) मधुरावस्थापाकत: (घ) एकमपि न

**२. प्रश्नानाम् एकेन वाक्येन उत्तराणि लिखत।**

(१) का प्रक्रिया अवस्थापाक: कथ्यते ?

(२) पचनोन्मुखं आहाररस निर्माणं कथं भवति ?

(३) फेनभूत कफनिर्माणं कथं भवति ?

(४) पक्वाशयस्थितेन अग्निना किम् उत्पाद्यते ?

**३. प्रश्नानां लघूत्तराणि लिखत।**

(१) सारकिट्टविभजनं लिखत।

(२) अम्लावस्थापाकस्य वर्णनं कुरुत।

(३) सारभाग-अवशोषणम्।

(४) मधुरावस्थापाकस्य स्थानं लिखत।

**४. सूचनानुसारं लिखत।**

(१) मधुरावस्थापाकस्य कटु अवस्थापाकस्य च भेदं ज्ञापयत।

**५. प्रश्नानां सविस्तरम् उत्तरं लिखत।**

(१) अवस्थापाकवर्णनं कुरुत।

●

# २० अग्निवर्णनम्

आहारद्रव्यं शरीरसात्म्यम् अथवा प्रत्यक्षशरीरस्वरूपं यः ददाति सा शक्तिः अग्निः। यतो हि आहारे अग्निद्वारा पचनसंस्कारः भवति एवं शरीरस्य वृद्धिः भवति। आहारस्य रूपान्तरणं परिणमनं च अग्नेः प्रमुखकार्यं वर्तते।

**आयुर्वर्णो बलं स्वास्थ्यमुत्साहोपचयौ प्रभा।**

**ओजस्तेजोऽग्नयः प्राणाश्चोक्ता देहाग्निहेतुका॥**

**शान्तेऽग्नौ म्रियते युक्ते चिरं जीवत्यनामयः।**

**रोगी स्याद्विकृते मूलमग्निस्तस्मान्निरुच्यते॥** (च.चि. १५/२)

**आयुरादिनां देहाग्निना सहसंम्बधः**

आयुः, वर्णः, बलं, स्वास्थ्यं, उत्साहः, शरीरवृद्धिः, प्रभा, ओजः, तेजः, अगूयः एवं प्राणादयः देवस्थ अग्नेः तीव्रत्वात् एव स्वस्य उत्तमस्थितौ स्थिराः भवन्ति। यदि सः जठराग्निः शान्तः भवति वा निर्वपति तर्हि मनुष्यः मृतः भवति। तस्थ सम्यक् सञ्चलनेन मनुष्यः अरोगतां प्राप्नोत्ति, दीर्घायुः च भवति एवं यदा सः जठराग्निः विकृतिं, मन्दतां वा अतितीव्रतां प्राप्नोति तर्हि मानवः रोगयुक्तो भवति। अतएव अग्निः जीवनस्थ प्रधानमूलम् उच्वते।

**वर्गीकरणम् -**

परमाणुभेदात् अग्नेः नैके प्रकाराः सन्ति। किन्तु स्थूलस्वरूपात् अस्य त्रिप्रकाराः सन्ति।

(१) कोष्ठाग्निः - १ (२) धात्वग्निः - ७ (३) पाञ्चभौतिकाग्निः - ५

**जठराग्निः ( पाचकाग्निः )**

शरीरान्तर्गताः (१३) त्रयोदशाग्नयः सन्ति। तत्र जठराग्नेःप्राधान्यमस्ति।

**अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः। प्राणापानसमायुक्तं पचाम्यन्नं चतुर्विधम्॥ ( भ.गी. ) अ १५/१४**

अशितखादित्तपीतलीढादयः आहाराः। एषु चतुर्षु प्रकारेषु अन्नस्वरूपेषु विविधप्रकारकानाम् आहारविकृतीणां समावेशः भवति। भुक्तपदार्थाः प्राणिनां यत् हितकारी तत् जठराग्निना प्रवृद्धा, ते स्वस्य उष्णतया सम्यग् पाचयति। पाचकाग्निचतुर्विधानाम् आहाराणां विविधरीत्या पाचनं करोति। यदन्नं शरीरधातूनां ओजसः च पोषणं करोति तथा बलं वर्णं प्रददाति, तत्सर्वं कर्म अग्नेः हेतुभूता भवति।

पाचकाग्नेः मुख्यकर्म तु अन्नपाचनम्। आयुर्वेदे तु अन्नस्य पाचनं सामान्यविशेषौ इति द्वाभ्यां प्रकाराभ्यां जायते। सामान्यपचनमुखम् एवं आमाशये भवति। एवं तस्मै भौतिकक्रियाः पर्याप्ताः भवन्ति किन्तु विशेषपाचनं ग्रहण्याम् उदरकोष्टाङ्गेषु च भवति, तस्मिन् अनेकानि द्रव्याणि स्रावरसरूपाभ्यां स्वस्य योगदानं प्रददाति। अयं स्रावः आमाशय-अधो-आमाशय-यकृत्-अग्न्याशय-आन्त्र-पित्तधराकलादि-अवयवेषु स्रवति, तेषां स्रवणकः वायुः एव।

मन्यते प्रायः आहारः पाञ्चभौतिकः भवति, तथापि यस्य पदार्थस्याधिकता भवति, तथैव पार्थिवजलीयादीनि आहारस्य नामानि भवन्ति। आहाराणां पचनक्रिया मुखतः एव प्रारभ्यते। यथा-दन्तैः चूर्णीकृतपदार्थानां मुख रससम्मिश्रणं भूत्वा मुखे किञ्चिदन्नस्य पचनान्तरम् आहारः आशयं प्राप्नोति। तत्र श्लेष्म वा कफदोषोढीरण भवति। आमाशये आहारस्य अल्पांशः पचति एवम् अवशिष्टाहारः अधो-आमाशयं प्रति गच्छति, तत्र स्थितनाडीसूत्रकारणात् दीपकपाचकस्रावः स्रवति वा स्रवितः भवति।

अस्य पाचकाग्नेः तीक्ष्णाग्निः मन्दाग्निः विषमाग्निः समाग्निश्चेति चत्वारः प्रकाराः सन्ति।

**भूताग्निः** – पञ्चमहाभूतनिर्मितभावेषु, शरीरावयवेषु च यदग्निः वसति, सः अग्निः भूताग्निः। कथयन्ति। भूताग्नेः पञ्चप्रकाराः वर्तन्ते।

(१) पार्थिवाग्निः (२) आप्याग्निः (३) आग्नेयाग्निः (४) वायव्याग्निः (५) नाभसाग्निः

शरीरे गृह्यमाणाहारः पाञ्चभौतिकत्वे सति पञ्चभूतांशान् पाचनं क्रियमाणभूताग्निरपि पञ्चप्रकारस्य भवति। जठराग्निना पक्वीभूताहारः यदा अन्नरसं शरीरस्य पोषणार्थं ददाति, तदा तदन्नरसः अपि शरीरस्य कृते उपयोगाय न भवति, किन्तु भूताग्निना तदुपरि पाकक्रिया भवति तदैव शरीरस्य कृते सजातीयः भूत्वा अनुकूलः भवति। भूताग्नेराधारः कोष्ठः गण्यते। चतुर्विधस्वरूपे स्वतः भूताग्निः स्थितः। जठराग्निपाकस्य पश्चात् एवं धात्वग्निपाकस्य पूर्वं भूताग्निरयं कर्म करोति। यदा अन्नरसः सञ्जीभवति तदा अग्निः वायोः सहयोगेन विभजनं कर्म कृत्वा पार्थिवाप्यादीनाम् आहारभागानां वर्गीकरणं करोति। तन्महाभूतानाम् आहारोपरि अग्निः स्वकीयं पाचनकर्म करोति। शरीरे द्रव्यस्य गुणः स्वकीयांशैः एव पुष्टः भवति यथा पार्थिवगुणान् पोषयति।

**धात्वग्निः** – शरीरे सप्तधातवः सन्ति। एषु धातुषु स्व-स्व-अग्निः स्थितः वर्तते। यदग्निः तेषां धातूनां पचनकार्यार्थं कार्यं करोति। जठराग्निः यदा स्वकीयांशैः सह अन्नरसमाध्यमेन धातुषु प्राप्नोति तदा तद्धात्वग्निस्वरुपं धारयति।

पाचकाग्नेः अंशाः सर्वधातुषु आप्नुवन्ति, प्रापयन्ति च। एतदंशः प्रत्येकऽस्मिन् धातोः अन्तभागे विद्यमानोऽस्ति। सर्वधातुस्थितः आग्नेयांशः एव धात्वग्निः वर्तते।

सूक्ष्मातिसूक्ष्मकोषेषु चलच्चयापचयस्य प्रक्रियाः धात्वग्नीनां अंशैः शक्याः भवन्ति। रसधातौ स्थिताग्नेरंशाः रसाग्निः कथ्यते। अन्नरसः देहानुकूलः भूत्वा यदा देहपोषकरसस्य स्वरूपं धृत्वा हृदयं प्राप्नोति तदा तस्मिन् कालेऽपि देहपोषकरसे जठराग्नेरंशाः स्थितः वर्तते, किन्तु रसधातुत्वे सति रसाग्निः कथ्यते। रसः सम्पूर्णे शरीरे भ्रमति तत्कारणात् रसधात्वग्निं संपूर्णदेहव्यापी कथयितुं शक्यते।

इयं रसधात्वग्निः स्वकीयस्थितपाचकतत्त्वेन रसधातोः प्रसादे एवं किट्टभागे विभाजनं करोति। रसः आप्यांशस्य आधिक्यवान् भवति, तथापि तत्र अग्निकर्मकारकतत्त्वानि अपि निवसन्ति, एतैस्तत्त्वैः रसस्य पाचनं क्रियते तथा तस्य सारे किट्टभागे च विभाजनं कृत्वा सूक्ष्मोत्तर धातोः निर्माणं करोति।

तथैव अन्येषां सर्वेषां धातूनां अपि धात्वग्निः भवति। यद्सारकिट्टभागं निर्माय उत्तरोत्तरधातूनां पोषणं करोति एवञ्चोत्तरोतरधातुषु परिवर्तितं भवति।

**अग्नेः दोषानुगुणं वर्गीकरणम्।**

तैरभवेद्विषमस्तीक्ष्णो मन्दाग्निः समैःसमः। वा.सू. १/८

वातकारणात् विषमाग्निः

पित्तकारणात् तीक्ष्णाग्निः

कफ़कारणात् मन्दाग्निः

समदोषकारणात् सामाग्निः

सामाग्निः – यो अग्निः सम्यक् काले सम्यक् मात्रायां गृहीतम् आहारं सुयोग्यकाले पचनं करोति सः सामाग्निः।

विषमाग्निः – क्वचित् सम्यक् पचनम् एवं क्वचित् आध्मानं करोति सः विषमाग्निः।

तीक्ष्णाग्निः – विधिविरहितस्य अन्नस्य सेवनात् यः अग्निः शीघ्रतया पचनं करोति सः तीक्ष्णाग्निः कथ्यते।

मन्दाग्निः – योगकाले, योग्यमात्रायाम् अन्नसेवनात् अपि पचनं विलम्बेन करोति सः मन्दाग्निः।

## स्वाध्यायः

**१. योग्य विकल्पं चित्वा प्रश्नस्य उत्तरं लिखत।**

(१) आहारस्य रूपान्तरणं परिणमनं च कस्य प्रमुखकार्यं वर्तते ?

(क) पित्तस्य (ख) अवस्थायाः (ग) अग्नेः (घ) वायोः

(२) स्थूलस्वरुपात् अग्नेः मुख्य-कति प्रकारः सन्ति ?

(क) ३ (ख) २ (ग) ५ (घ) ४

(३) १३ प्रकारकाः अग्नयः के ?

(क) जठराग्निः (ख) भूताग्निः (ग) धात्वग्निः (घ) पाचकाग्निः

(४) आप्याग्निः कस्य अग्नेः उपप्रकारः अस्ति ?

(क) धात्वग्नेः (ख) भूताग्नेः (ग) जठराग्नेः (घ) मंदाग्नेः

(५) तीक्ष्णाग्निः कस्मात् दोषकारणात् प्रभवति ?

(क) वातदोषात् (ख) पित्तदोषात् (ग) समदोषात् (घ) कफदोषात्

(६) समदोषकारणात् कः अग्निः जायते ?

(क) विषमाग्निः (ख) तीक्ष्णाग्निः (ग) मन्दाग्निः (घ) सामाग्निः

(७) धात्वग्नयः कति सन्ति ?

(क) ७ (ख) ५ (ग) ३ (घ) ८

**२. एकेन वाक्येन उत्तरं लिखत।**

(१) पाचकाग्निः कतिविधानाम् आहाराणां पाचनङ्करोति ?

(२) भूताग्नेः कति प्रकाराः ?

(३) कफकारणात् किं भवति ?

(४) किन्नाम विषमाग्निः ?

**३. प्रश्नानां लघूतराणि लिखत ।**

(१) प्रायः आहारः कीदृशः भवति ?

(२) धात्वग्नि नाम किम् ?

(३) भूताग्निनां नामानि लिखत।

(४) धात्वग्निः सारकिट्टभागं निर्मीय केषां पोषणं करोति ?

**४. सूचनानुसारं लिखत।**

जठराग्नेः भूताग्नेः च भेदं ज्ञापयत।

**५. सविस्तरम् उत्तरं लिखत।**

भूताग्निः सविस्तरं विवृणुत।

• • •